वेदनिधि ग्रन्थमाला ... 406DV

# अथर्व वेदीय

# गोपथ ब्राह्मणम्

## मुण्डक- प्रश्न - माण्डूक्य उपनिषदः

सम्पादकः

वंशीकृष्ण घनपाठी

अवधूत दत्त पीठम्

श्रीगणपति सच्चिदानन्द आश्रमः

मैसूरु 570025

Sri Ganapati Sachchidananda Avadhoota Datta Peetham

वेदनिधि ग्रन्थमाला -45

अथर्ववेदीय गोपथ ब्राह्मणम्, उपनिषदश्च

May 2017

Editor

**Dr.Vamshi Krishna Ghanapathi**

Printed by

**Ma Prints,** Bengaluru

**Published by**

**SVAMI (SGS VedaNidhi Academy & Masters' Institute)**

**Avadhoota Datta Peetham**

**Sri Ganapathy Sachchidananda Ashrama**

Datta Nagara, Ooty Road, Mysore 570025 India

**Email - veda@dattapeetham.com**

Website - www.vedanidhi.in/books

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore •



अवधूत दत्तपीठाधीश्वराणां जगद्गुरूणां परमपूज्यानां

## श्री श्री श्री गणपति सच्चिदानन्द स्वामिश्रीचरणानां

# आविष्कार वचांसि

## ।। नमो ब्रह्मणे धारणं मे अस्त्वनिराकरणम् ।।

महतां सज्जनानां सम्पत्तिः - ऋचः, यजूंषि, सामानि, तद्विनियोजकानि प्रख्यापकानि ब्राह्मणवाक्यानि - इति श्रुतिः ब्रवीति। तथाविध सम्पत्तिमन्तः नैके महान्तः श्रोत्रियाः ब्रह्मनिष्ठागरिष्ठाः शब्दब्रह्मोपासनधुरीणाः वर्षेऽस्मिन् भारते राराजन्ते स्म। ऋषिकल्पानां तादृशां महतां परम्परा अद्यापि प्रकर्षेण वर्तते, यस्याः परिपोषणाय छात्राणामधीतिः निदानमास्ते। तदधीत्यै उपकुर्वन्ति महान्ति उपकरणानि बहूनि वर्तन्ते, यदन्यतमं पुस्तकजातम् - इति सम्प्रति वैदिकलोकः गाढं विश्वसिति।।

आचार्योपदिष्टानि वेदवाक्यानि समामनन्तः छात्राः, स्वेषामध्ययनाय मुद्रितग्रन्थानेव सर्वधा आद्रियन्ते। अतः गुरुणा उपदिष्टान्, उपदेष्टव्यान्, विकार- लोप- आगम- आदेशात्मकान् विषयान् सङ्कलय्य मुद्रापितो वेदग्रन्थः, नितरां छात्रोपकाराय कल्पते। तथा च मन्त्रसम्बन्धि ऋषि-

च्छन्दो- दैवत-विनियोग-प्रकरणादिकं तत्तद्देशेषु निविष्टं सत्, पाठकेषु सुकृतं सम्पादयेत्।

एवंविधग्रन्थसहायेन अध्ययनसम्पत्त्या समासादितयशसः संसाधितपरमेश्वरानुग्रहाः भूयासुरिति सङ्कल्पः दत्तगुरोरनुग्रहेण पूर्वं समजनि।

तदीयमहितकृपावशेन, सद्यः अस्माकं दत्तपीठस्य वेदनिधिबृन्दः पूर्वोदित-बह्वंश-कलितं वेदग्रन्थसमुदायं प्रकाशयतीति महान्तमानन्दमनुबोभूयामहे। तदस्य ग्रन्थजातस्य पठनेन, अधीयाना अपि भूयिष्ठानन्दभाजस्सन्तः, शब्दब्रह्मोपासनधुरं ससुखं वहन्तः श्रेयसे पारयेयुरिति श्रीदत्त सद्गुरुं प्रार्थयामहे।

प्रायेण संवत्सराष्टकात् सञ्चलतः वेदग्रन्थप्रकाशनस्य आविष्कृतिरूपा समुद्गतिः महत्यस्मिन् वज्रोत्सवे विधीयत इति विषयं, दत्तगुरोः समधिकवरिवस्याफलत्वेन सम्भावयामः। महतोऽस्मात् वज्रोत्सवादारभ्य वैदिकलोकः निरायासं निश्शुल्कं ग्रन्थजातमिदं (अन्तर्जालात्) वेदनिधि निवेशनात् (वेब्सैट् द्वारा) प्राप्नुवन्तु - इति श्रीदत्तस्मरणपूर्वकं समाशास्महे।

शेवधिर्यः पुमर्थानां षडध्वातीत विग्रहः।
राद्धान्तो निगमार्थानां प्रसद्यात् दत्तसद्गुरुः।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham Mysore

# विज्ञापनम्

विद्वान् वंशीकृष्ण घनपाठी
निर्देशकः - वेदनिधि प्रकाशनम्

तद्विश्वमुप जीवति।

यददो ब्रह्म- विश्वस्य अधिष्ठानत्वेन परस्सहस्रैः श्रौत स्मार्त पौराणिक वाक्य प्रमाणैः सङ्कीर्तितं- तदिदं विश्वं सञ्जीवयति, तदाधारेण विश्वमिदं उपजीवतीति भारतीयेषु सम्प्रदायसिद्धं सत्यम्। विश्वसिसृक्षोः अभितप्ताद्ब्रह्मणः- त्रयो लोकाः, त्रयो वेदाः, गायत्र्यास्त्रयः पादाः, तिस्रो व्याहृतयो जज्ञिर इति मन्त्रेभ्यः, तदुपबृंहक ब्राह्मणवाक्येभ्यश्च अवगम्यते।

तदासु वेदवाक्यराजीषु सर्वप्रथमतया विजेगीयमानः ऋगात्मको मन्त्रः इति वैदिकलोके नितरां रूढ एव विषयः। ऋच (स्तवने ) धातोः उत्पन्नः ऋक् शब्दः, योगरूढ इति ज्ञायते। यज्ञकर्मणि उपासनाविशेषेषु च स्तुतिपरतया देवतानामधेय- गुण शंसकतया च उपयुज्यमाना मन्त्राः ऋक्- नामकाः सर्वमन्त्र मूर्धन्यतया राराजन्ते। पद्यात्मकता- मिताक्षरता- सच्छन्दस्कता चेत्येतत्त्रय.मृचां लक्षणमिति स्पष्टं विभाव्यते। सर्ववेद ग्रन्थेषु सतीष्वप्यृक्षु, शाकल संहितामन्तरा नान्यत्र ऋग्वेद इति प्रसिद्धि मुपलभामहे। प्राचुर्येण बाहुल्येन तदितरलक्षणयुक्त.वाक्यविरहितत्वेन च ऋङ्मयता शाकलसंहितायामेव लभ्यते।

ऋचां वेदः, ऋग्भि र्लक्षितो वा वेदः इति ऋग्वेदपदस्य व्युत्पत्तिः कथ्यते, यत्र शाकल बाष्कल नामिके शाखे आस्तामिति वेदलक्षणग्रन्थेषु कथ्यते।

तेषां ऋङ्मन्त्राणां विनियोग- समुद्गम- प्रशंसकवाक्य समूहाऽऽत्मकौ ग्रन्थावुभौ ऐतरेय-शाङ्खायन ब्राह्मणनामकौ वर्तेते इति च जानीमः। परन्तु संप्रति अध्ययन क्रमे शाकल संहिता- ऐतरेय ब्राह्मणारण्यक ग्रन्थावेव वरिवर्त इति लोकसिद्धमेव। (बाष्कल ग्रन्थस्य अनुपलब्धिं, शाङ्खायन ग्रन्थस्य लुप्त प्रायिकत्वञ्च लोकेऽधुना पश्यामः।)

प्रकृतः ऐतरेय ब्राह्मण- आरण्यकग्रन्थः 8 पञ्चिकासु, 40 अध्यायैर्विभक्तस्सन् अधुना अधीयते। यद्यपि मन्त्रविधायकत्वं व्याख्यायकत्वं ब्राह्मणवाक्येषु प्रसिद्धं, तथाऽपि भूतार्थवादरूपेण वृत्तान्तकथनं, पूर्वेषां पुण्यपुरुषाणां कीर्तनञ्च ग्रन्थेऽस्मिन् वरीवर्ति। तथा च अग्निष्टोमप्रभृति सत्रयागपर्यन्तं शस्त्रप्रकारो वर्णितः। इत्थम्भूतः ऐतरेय ब्राह्मणग्रन्थः, आरण्यकग्रन्थश्च बहुभिः धार्मिकैः बहुवारं मुद्रितोऽपि तत्तत्कालिकच्छात्र पठितृवर्ग प्रयोजनाय, पौनःपुन्येन बहुधा प्राकाश्यं नीयत इति मोदस्य महत आस्पदं भवति।

सम्प्रति पाठकोपकाराय श्रीमदवधूत दत्तपीठाधीश्वराणां श्री श्री **गणपति सच्चिदानन्द स्वामि** श्रीचरणानां दिव्याशीर्मञ्जूषया, दत्तपीठस्य

विद्वांसः नैकान् वर्षानधीत्य ग्रन्थमेनं प्रकाशयन्तीति, तेषु गुरुकृपा वृष्टिर्नूनं भूयोभूयो भवेदिति समाशासाना निवेदयामः।

तथा च वेदनिधि.ग्रन्थमालायां बहवो वैदिका ग्रन्थाः देशभाषासु मुद्राप्यन्त इति, तत्तत्सम्पादका विपश्चितो वेदविद्व.दुपकारैकपथिकाः वेदपुरुषस्वरूपं सद्गुरुवर्यं सेवमाना इति, तेषु सर्वेषु- आदिगुरोः दत्तात्रेयस्य वात्सल्य.दृक्पातो निरन्तरं संपद्यतामिति च प्रार्थयन्तो विरमामः।

समानी व आकूति स्समाना हृदयानि वः।।

# अस्मिन् प्रकाशने प्रयुक्तानि चिह्नानि

- आदौ अष्टक - अध्याय संख्या (यथा - प्रथमाष्टके प्रथमाध्यायः)
- वेदः - स्तरः1, शाखा - स्तरः 2, ग्रन्थः - स्तरः 3

ʊ अष्टक/ काण्ड प्रारम्भः (स्तरः 4)

S◊S अध्याय/ प्रपाठक प्रारम्भः (स्तरः 5)

(कलश) सूक्त/ अनुवाक प्रारम्भः (स्तरः 6)

❀ वर्गः/ पञ्चाशत्/ दशतिः (स्तरः 7)

卐 मन्त्र/ ब्राह्मण वाक्य समूहः (स्तरः 8)

✡ परिशिष्टम्

। वाक्यावसानः

।। (ऋक्/ यजुः/ साम मन्त्र) वाक्यसमूहावसानः

‡ मन्द्रस्थायिना वक्तव्यम् अथवा इतः प्राक् पाठं नावसादयेत्।

Sri Sachidananda Avadhoota Datta Peetham

ऽऽ आकार प्रश्लेषः, ऽअकार प्रश्लेषः

ꣳ उपध्मानीय/जिह्वामूलीये

अनुदात्तः (यथा – अ॒ग्निमी॑ळे), ॑स्वरि॑तः (यथा - पव॑स्व सोम),

अध्यर्ध स्वरितः (य॒ज्ञेषु॑ वर्धते), ᳚दीर्घ स्वरितः (सोमो᳚ धेनुम्)

ꣿ अनुस्वार आगमः (देवाꣿ एह)

^ विसर्जनीय स्थलानि (यथा शि॒वा^ न॑ꣳ प्र॒दिश॑ः)

अयावाद्यादेश स्थलम्, उच्चारणे धारणे वा विशिष्टं स्थलम्,

ँ सानुनासिक यकार/वकार/ लकार विशिष्टः (अर्धानुस्वारः) (यँ वयम्, त्र्यम्बकँ यजामहे)

ं अनुस्वारः

- द्विमात्रादि कालोच्चारण संकेतः '2', '3', '4'
- क्लिष्टा दशतिः ☞, मन्त्रविशेषाः ✍,



आथर्वणाभिधो वेदो
धवलो मर्कटाननः ।
अक्षसूत्रञ्च खट्वाङ्गं
बिभ्राणोऽयं जयप्रियः।।

# गोपथ ब्राह्मणम्

# ॐ पूर्वार्धम्

## ऽ॑ऽप्रथमः प्रपाठकः

ओं ब्रह्म ह वा इदमग्र आसी.त्स्वयन्त्वेकमेव, तदैक्षत महद्वै यक्षं तदेकमेवास्मि, हन्ताहं मदेव मन्मात्र न्विवेतीय न्देव न्निर्मम इति, तदभ्यश्राम्य दभ्यतप.त्समतप,त्तस्य श्रान्तस्य तप्तस्य सन्तप्तस्य ललाटे स्नेहो यदार्द्र्य माऽजायत तेनानन्द,त्तमब्रवी न्महद्वै यक्षं सुवेद मविद मह मिति, तद्यदब्रवी न्महद्वै यक्षं सुवेद मविद मह मिति, तस्मा त्सुवेदोऽभव,त्तँ वा एतं सुवेदं सन्तं स्वेद इत्याचक्षते परोऽक्षेण, परोऽक्षप्रिया इव हि देवा भवन्ति प्रत्यक्षद्विषः।। 1.1।।

1.2 स भूयोऽश्राम्य द्भूयोऽतप्य द्भूय आत्मानं समतप,त्तस्य श्रान्तस्य तप्तस्य सन्तप्तस्य सर्वेभ्यो रोमगर्तेभ्यः पृथक्स्वेदधाराः प्रास्यन्दन्त, ताभि रनन्द,त्तदब्रवी- दाभिर्वा अहमिदं सर्वं न्धारयिष्यामि यदिदङ्कि.ञ्चाऽऽभिर्वा अहमिदं सर्वं ञ्जनयिष्यामि यदिदङ्कि.ञ्चाऽऽभिर्वा अहमिदं सर्वं माप्स्यामि यदिदङ्किञ्चेति, तद्यदब्रवी-दाभिर्वा अहमिदं सर्वं न्धारयिष्यामि यदिदङ्किञ्चेति-

तस्मा.द्वारा अभवं-स्तद्धाराणा न्धारात्वँ यच्चाऽऽसु ध्रियते, तद्यदब्रवी दाभिर्वा अहमिदं सर्व ञ्जनयिष्यामि यदिदङ्किञ्चेति तस्माज्जाया अभवं - स्तज्जायाना ञ्जायात्वँ- यच्चाऽऽसु पुरुषो जायते- यच्च पुत्रः पुन्नाम.नरक मनेक.शततार- न्तस्मा.त्त्रातीति पुत्त्र-स्तत्पुत्त्रस्य पुत्त्रत्व, न्तद्य दब्रवी दाभिर्वा अहमिदं सर्व माप्स्यामि यदिदङ्किञ्चेति, तस्मादापोऽभवं-स्तदपा मप्त्व- माप्नोति वै स सर्वा न्कामान्- यान् कामयते- य एवँ वेद।। 1.2।।

1.3 ता अप स्सृष्ट्वाऽन्वैक्षत, तासु स्वाञ्छाया मपश्य,त्तामस्येक्षमाणस्य स्वयं रेतोऽस्कन्द,त्तदप्सु प्रत्यतिष्ठ,त्तास्तत्रैवाभ्यश्राम्य दभ्यतप.त्समतप,त्ताश्श्रान्ता स्तप्ता स्सन्तप्ता स्सार्धमेव रेतसा द्वैध मभवं-स्तासा मन्या अन्यतरा अतिलवणा अपेया अस्वाद्य- स्ता अशान्ता रेत स्समुद्रँ वृत्वाऽतिष्ठ- न्नथेतराः पेया स्स्वाद्य श्शान्ता, स्तास्तत्रै.वाभ्यश्राम्य दभ्यतप.त्समतप,त्ताभ्य श्श्रान्ताभ्य स्तप्ताभ्य स्सन्तप्ताभ्यो यद्रेत आसी त्तदभृज्यत, यदभृज्यत तस्मा द्भृगु स्समभव,त्तद्भृगो र्भृगुत्वं- भृगुरिव वै सर्वेषु लोकेषु भाति य एवँ वेद।। 1.3।।

1.4 स भृगुं सृष्ट्वाऽन्त.रधीयत, स भृगु स्सृष्टः प्राडैःजत, तँ वागन्ववद्- द्वायो वायो इति, स न्यवर्तत, स दक्षिणा न्दिश मैजत तँ वा.गन्ववद्- न्मातरिश्व न्मातरिश्व न्निति, स न्यवर्तत, स प्रतीची न्दिश मैजत, तँ वा.गन्ववदत्- पवमान पवमानेति, स न्यवर्तत, स उदीची न्दिश मैजत, तँ वा.गन्ववद्- द्वात वातेति, तमब्रवी न्नन्वविद मह इति, न हीत्यथार्वाङेन मेतास्वेवाप्स्वन्विच्छेति, तद्यदब्रवी दथार्वाङेन मेता स्वेवाप्स्वन्विच्छेति, तदथर्वाऽभव,त्तदथर्वणोऽथर्वत्व, न्तस्य ह वा एतस्य भगवतोऽथर्वण ऋषे- र्यथैव ब्रह्मणो लोमानि- यथाऽङ्गानि यथा प्राण- एवमेवास्य सर्व आत्मा समभवत्, तमथर्वाणं ब्रह्माऽब्रवीत्- प्रजापतेः प्रजा स्सृष्ट्वा पालयस्वेति, तद्यदब्रवी.त्प्रजापतेः प्रजा स्सृष्ट्वा पालयस्वेति, तस्मा.त्प्रजापति रभव,त्तत्प्रजापतेः प्रजापतित्व,मथर्वा वै प्रजापतिः, प्रजापतिरिव वै स सर्वेषु लोकेषु भाति य एवँ वेद।। 1.4।।

1.5 तमथर्वाण मृषि मभ्यश्राम्य दभ्यतप.त्समतप,- त्तस्माच्छ्रान्ता.त्तप्ता.त्सन्तप्ता द्दशतया नथर्वण ऋषी न्निरमिमी.तैकर्चान्- द्व्यृचां-स्तृचां-श्चतुर्ऋचा-न्पञ्चर्चा-न्ष्छडर्चा-

न्स्त्रप्तर्चा- नष्टर्चा- न्नवर्चा- न्दशर्चानिति, तानथर्वण ऋषी नभ्यश्राम्य दभ्यतप.त्समतप,त्तेभ्य श्श्रान्तेभ्य स्तप्तेभ्य स्सन्तप्तेभ्यो दशतया नाथर्वणा नार्षेया न्निरमिमी.तैकादशा-न्द्वादशां-स्त्रयोदशां-श्चतुर्दशा-न्पञ्चदशा-न्थ्षोडशा-न्त्सप्तदशा- नष्टादशा- न्नवदशान्- विंशानिति, तानथर्वण ऋषी- नाथर्वणांश्चाऽऽर्षेया नभ्यश्राम्य दभ्यतप.त्समतप,त्तेभ्य श्श्रान्तेभ्य स्तप्तेभ्य स्सन्तप्तेभ्यो- यान्मन्त्रा नपश्य-त्स आथर्वणो वेदोऽभव,त्तमाथर्वणं वेद मभ्यश्राम्य दभ्यतप.त्समतप,त्तस्माच्छ्रान्ता- त्तप्ता,त्सन्तप्ता- दोमिति मन एवोर्द्ध मक्षर मुदक्राम,त्स य इच्छे.त्सर्वै रेतै रथर्वभि श्चाऽऽथर्वणैश्च कुर्वीये-त्येतयैव तं महाव्याहृत्या कुर्वीत, सर्वैर्ह वा अस्यैतै रथर्वभि श्चाऽऽथर्वणैश्च कृतं भवति य एवँ वेद, यश्चैवँ विद्वानेव मेतया महाव्याहृत्या कुरुते।। 5।।

स भूयोऽश्राम्यद् भूयोऽतप्य,द्भूय आत्मानं समतप,त्स आत्मन एव त्रीन्लोका न्निरमिमीत, पृथिवी मन्तरिक्ष न्दिवमिति, स खलु पादाभ्यामेव पृथिवी न्निरमिमी-तोदरा दन्तरिक्षं- मूर्ध्नो दिवम्, स तांस्त्री न्लोका नभ्यश्राम्य दभ्यतप.त्समतप,त्तेभ्य श्श्रान्तेभ्य स्तप्तेभ्य स्सन्तप्तेभ्य स्त्रीन्देवा न्निरमिमी-ताग्निँ वायु मादित्य-मिति,

स खलु पृथिव्या एवाग्नि न्निरमिमी-तान्तरिक्षा द्वायु न्दिव आदित्यं, स तां-स्त्रीन्देवा नभ्यश्राम्य दभ्यतप.त्समतप,त्तेभ्य श्श्रान्तेभ्य स्तप्तेभ्य स्सन्तप्तेभ्य स्त्रीन्वेदा न्निरमिमी.तग्वेदं यजुर्वेदं सामवेद मि-त्यग्ने र्ऋग्वेदं- वायो र्यजुर्वेद- मादित्या त्सामवेदं, स तांस्त्रीन् वेदा नभ्यश्राम्य दभ्यतप.त्समतपत्, तेभ्य श्श्रान्तेभ्य स्तप्तेभ्य स्सन्तप्तेभ्य स्स्तिस्त्रो महाव्याहृती र्निरमिमीत भूर्भुव स्स्वरिति, भूरित्यृग्वेदाद्- भुव इति यजुर्वेदात्- स्वरिति सामवेदात्, स य इच्छे.त्सर्वै रेतै स्त्रिभि र्वेदैः कुर्वीये-त्येताभिरेव तं महाव्याहृतिभिः कुर्वीत, सर्वैर्ह वा अस्यैतै स्त्रिभि र्वेदैः कृतं भवति य एवँ वेद- यश्चैवँ विद्वानेव मेताभि र्महाव्याहृतिभिः कुरुते ।। 6।।

1.7 ता या अमू रेत स्समुद्रँ वृत्वाऽतिष्ठं-स्ताः प्राच्यो दक्षिणाच्यः प्रतीच्य उदीच्य स्समवद्रवन्त, तद्य त्समवद्रवन्त तस्मात् समुद्र उच्यते, ता भीता अब्रुवन्- भगवन्तमेव वयं राजानं वृणीमह इति, यच्च वृत्वाऽतिष्ठं-स्तद्वरणो ऽभव,त्तँ वा एतँ वरणं सन्तँ वरुण इत्याचक्षते परोऽक्षेण, परोऽक्षप्रिया इव हि देवा भवन्ति प्रत्यक्षद्विष, स्स समुद्रा दमुच्यत, स मुच्यु रभव,त्तँ वा एतं मुच्युं सन्तं मृत्यु रित्याचक्षते परोऽक्षेण, परोऽक्षप्रिया इव हि देवा भवन्ति

प्रत्यक्षद्विष,स्तँ वरुणं मृत्यु मभ्यश्राम्य दभ्यतप,त्समतप,त्तस्य श्रान्तस्य तप्तस्य सन्तप्तस्य सर्वेभ्योऽङ्गेभ्यो रसोऽक्षर,त्सोऽङ्गरसोऽभव,त्तँ वा एत मङ्गरसं सन्त मङ्गिरा इत्याचक्षते परोऽक्षेण, परोऽक्षप्रिया इव हि देवा भवन्ति प्रत्यक्षद्विषः।। 7।।

तमङ्गिरस मृषि मभ्यश्राम्य दभ्यतप.त्समतप,त्तस्माच्छ्रान्तात्तप्ता- त्सन्तप्ता,द्विंशिनोऽङ्गिरस ऋषी न्निरमिमीत, तान् विंशिनोऽङ्गिरस ऋषी नभ्यश्राम्य दभ्यतप.त्समतप,त्तेभ्य श्श्रान्तेभ्य स्तप्तेभ्य स्सन्तप्तेभ्यो दशतया नाङ्गिरसा नार्षेया न्निरमिमीत, षोडशिनो-ऽष्टादशिनो- द्वादशिन- एकर्चा-न्द्वृचां- स्तृचां- श्चतुर्ऋचान्- पञ्चर्चा-न्ष्-डर्चा- न्स्दप्तर्चानिति, तानङ्गिरस ऋषी नाङ्गिरसां.श्चाऽऽर्षेया नभ्यश्राम्य दभ्यतप.त्समतप,त्तेभ्य श्श्रान्तेभ्य स्तप्तेभ्य स्सन्तप्तेभ्यो- यान्मन्त्रा नपश्य-त्स आङ्गिरसो वेदोऽभव,त्तमाङ्गिरसँ वेद मभ्यश्राम्य दभ्यतप-त्समतप- त्तस्माच्छ्रान्ता- त्तप्ता.त्सन्तप्ता- ज्जनदिति द्वैत मक्षरँ व्यभव,त्स य इच्छे.त्सर्वै रेतै रङ्गिरोभि श्चाऽऽङ्गिरसैश्च कुर्वी- येत्येतयैव तँ महाव्याहृत्या कुर्वीत, सर्वैर्ह वा अस्यैतै रङ्गिरोभि

श्चाऽऽङ्गिरसैश्च कृतं भवति य एवँ वेद- यश्चैवँ विद्वा नेव मेतया महाव्याहृत्या कुरुते।। 8।।

1.9 स ऊर्ध्वोऽतिष्ठ,त्स इमा न्लोका.न्व्यष्टभ्ना,त्तस्मा दङ्गिरसोऽधीयान ऊर्ध्व स्तिष्ठति, तद्व्रतं, स मनसा ध्यायेद्- यद्वा अह.ङ्किञ्चन मनसा ध्यास्यामि- तथैव तद्भविष्यति, तद्ध स्म तथैव भवति, तदप्येत दृचोक्तम्। श्रेष्ठो ह वेद स्तपसोऽधिजातो ब्रह्मज्यानां हृदये सं बभूव। ऋच्यृग्भूतँ यदसृज्यतेद न्निवेशन मनृण न्दूर मस्येति, ता वा एता अङ्गिरसा.ञ्जामयो- यन्मेनयः, करोति मेनिभि र्वीर्यँ य एवँ वेद।। 9।। (ङ्क्तिये)

1.10 स दिशोऽन्वैक्षत- प्राची न्दक्षिणां प्रतीची मुदीची न्ध्रुवा मूर्ध्वामिति, तास्तत्रैवाभ्यश्राम्य दभ्यतप.त्समतपत्, ताभ्य श्श्रान्ताभ्य स्तप्ताभ्य स्सन्तप्ताभ्यः- पञ्च वेदा न्निरमिमीत- सर्पवेदं पिशाचवेद मसुरवेद मितिहासवेदं पुराणवेदमिति, स खलु प्राच्या एव दिश स्सर्पवेद न्निरमिमीत, दक्षिणस्याः पिशाचवेदं, प्रतीच्या असुरवेद, मुदीच्या इतिहासवेद, न्ध्रुवाया श्चोर्ध्वायाश्च पुराणवेदं, स ता न्पञ्च वेदा नभ्यश्राम्य दभ्यतप.त्समतपत्, तेभ्य श्श्रान्तेभ्य स्तप्तेभ्य स्सन्तप्तेभ्यः पञ्च महाव्याहृती र्निरमिमीत- वृधत्-करद्-

रुह-न्महत्-तदिति, वृधदिति सर्पवेदात्, करदिति पिशाचवेदाद्,रुह-दित्यसुरवेदा - न्महदि.तीतिहासवेदात्, तदिति पुराण वेदात्, स य इच्छे.त्सर्वै रेतैः पञ्चभि र्वेदैः कुर्वी-येत्येताभि रेव तं महाव्याहृतिभिः कुर्वीत, सर्वैर्ह वा अस्यैतैः पञ्चभि र्वेदैः कृतं भवति य एवँ वेद- यश्चैवँ विद्वा नेव मेताभि र्महाव्याहृतिभिः कुरुते।। 10।।

1.11 स आवतश्च परावतश्चान्वैक्षत, ता स्तत्रैवाभ्यश्राम्य दभ्यतप.त्समतप,- त्ताभ्य श्श्रान्ताभ्य स्तप्ताभ्य स्सन्तप्ताभ्य- श्श-मित्यूर्द्ध मक्षर मुदक्राम,त्स य इच्छे त्सर्वाभि रेताभि रावद्भिश्च परावद्भिश्च कुर्वी-येत्येतयैव तं महाव्याहृत्या कुर्वीत, सर्वाभिर्ह वा अस्यैताभि रावद्भिश्च परावद्भिश्च कृतं भवति य एवँ वेद- यश्चैवँ विद्वा नेव मेतया महाव्याहृत्या कुरुते।। 11।।

1.12. स भूयोऽश्राम्य,द्भूयोऽतप्य,द्भूय आत्मानं समतप,त्स मनस एव चन्द्रमस न्निरमिमीत, नखेभ्यो नक्षत्राणि, लोमभ्य ओषधिवनस्पतीन्, क्षुद्रेभ्यः प्राणेभ्योऽन्या.न्बहू.न्देवान्,त्स भूयोऽश्राम्यद्- भूयोऽतप्यद्- भूय आत्मानं समतप,त्स एत न्त्रिवृतं सप्ततन्तु मेकविंशतिसंस्थँ यज्ञ मपश्य,त्तदप्येत दृचोक्तम्। अग्नि

य॒ज्ञ न्त्रि॒वृतं स॒प्ततन्तु-मि॒,त्यथाप्येष प्राक्क्रीडित श्श्लोकः प्रत्यभिवदति- स॒प्त सु॒त्या स्स॒प्त च॑ पाकय॒ज्ञा- इति।। 12।।

1.13 तमाऽहर,त्तेनायजत, तस्याग्नि र्होताऽऽसीद्- वायु रध्वर्यु,- स्सूर्य उद्गाता- चन्द्रमा ब्रह्मा- पर्जन्य स्सदस्य- ओषधिवनस्पतय श्चमसाध्वर्यवो- विश्वे देवा होत्रका- अथर्वाङ्गिरसो गोप्तार,स्तं ह स्मैत मेवँविद्वांसः पूर्वे श्रोत्रिया यज्ञँ विततं सावसाय ह स्माऽऽहेत्यभि व्रजन्ति, मा नोऽयं घर्म उद्यतः प्रमत्ताना ममृताः प्रजाः प्रसाक्षीदिति, तान् वा एता न्परिरक्षका न्त्सदःप्रसर्पका नित्याचक्षते दक्षिणासमृद्धां,- स्तदु ह स्माऽऽह प्रजापति, र्यद्वै यज्ञेऽकुशला ऋत्विजो भव.न्त्यचरितिनो ब्रह्मचर्य मपराग्या वा, तद्वै यज्ञस्य विरिष्ट मित्याचक्षते, यज्ञस्य विरिष्ट मनु यजमानो विरिष्यते, यजमानस्य विरिष्ट मन्वृत्विजो विरिष्यन्त, ऋत्विजाँ विरिष्ट मनु दक्षिणा विरिष्यन्ते, दक्षिणानाँ विरिष्ट मनु यजमानः पुत्रपशुभि र्विरिष्यते, पुत्रपशूनाँ विरिष्ट मनु यजमान स्स्वर्गेण लोकेन विरिष्यते, स्वर्गस्य लोकस्य विरिष्ट मनु- तस्यार्धस्य योगक्षेमो विरिष्यते- यस्मिन्नर्द्धे यजन्त इति ब्राह्मणम्।। 13।।

1.14 तं ह स्मैत मेवँविद्वांसं ब्रह्माणं यज्ञविरिष्टी वा यज्ञविरिष्टिनो वेत्युपाऽऽधावेरन्- नमस्ते अस्तु भगवन्- यज्ञस्य नो विरिष्टं सन्धेहीति, तद्यत्रैव विरिष्टं स्या,त्तत्राग्नी नुपसमाधाय, शान्त्युदक.ङ्कृत्वा- पृथिव्यै श्रोत्रायेति त्रिरेवाग्नी.न्त्सं प्रोक्षति, त्रिः पर्युक्षति, त्रिः कारयमाण माचामयति च, सं प्रोक्षति च, यज्ञवास्तु च सं प्रोक्ष,त्यथापि वेदानां रसेन यज्ञस्य विरिष्टं सन्धीयते, तद्यथा लवणेन सुवर्णं सन्दध्या,त्सुवर्णेन रजतं- रजतेन लोहं- लोहेन सीसं- सीसेन त्र-प्वेव मेवास्य यज्ञस्य विरिष्टं सन्धीयते, यज्ञस्य सन्धिति मनु यजमान स्सन्धीयते, यजमानस्य सन्धिति मन्वृत्विज स्सन्धीयन्त- ऋत्विजां सन्धिति मनु दक्षिणा स्सन्धीयन्ते- दक्षिणानां सन्धिति मनु यजमानः पुत्रपशुभि स्सन्धीयते- पुत्रपशूनां सन्धिति मनु यजमान स्स्वर्गेण लोकेन सन्धीयते- स्वर्गस्य लोकस्य सन्धिति मनु तस्यार्धस्य योगक्षेम स्सन्धीयते- यस्मिन्नर्द्धे यजन्त इति ब्राह्मणम्।। 14।।

1.15 तदु हस्माऽऽहाथर्वा देवो विजानन्, यज्ञ विरिष्टानन्दानी-त्युपशमयेरन्, यज्ञे प्रायश्चित्तिः क्रियतेऽपि च, यदु बह्विव यज्ञे विलोमं क्रियते, न चैवास्य काचनाऽऽर्ति र्भवति, न च यज्ञविष्कन्ध

मुपया, त्यपहन्ति पुनर्मृत्यु, मपात्येति पुनराजाति,ङ्कामचारोऽस्य सर्वेषु लोकेषु भाति य एवँ वेद- यश्चैवँ विद्वा न्ब्रह्मा भवति- यस्य चैवँ विद्वा न्ब्रह्मा दक्षिणत स्सदोऽध्यास्ते- यस्य चैवँ विद्वा न्ब्रह्मा दक्षिणत उदङ्मुख आसीनो यज्ञ आज्याऽऽहुती र्जुहोतीति ब्राह्मणम्।। 15।।

1.16 ब्रह्म ह वै ब्रह्माणं पुष्करे ससृजे, स खलु ब्रह्मा सृष्ट श्चिन्ता मापेदे- केनाह मेकेनाक्षरेण सर्वांश्च कामा.न्त्सर्वांश्च लोका.न्त्सर्वांश्च देवा.न्त्सर्वांश्च वेदा.न्त्सर्वांश्च यज्ञा.न्त्सर्वांश्च शब्दा.न्त्सर्वांश्च व्युष्टी स्सर्वाणि च भूतानि स्थावरजङ्गमा न्यनुभवेय मिति, स ब्रह्मचर्य मचर,त्स ओमित्येत दक्षर मपश्यद्- द्विवर्णं चतुर्मात्रं सर्वव्यापि सर्ववि.भ्वयातयाम ब्रह्म, ब्राह्मीँ व्याहृतिं- ब्रह्मदैवत,न्तया च सर्वांश्च कामा.न्त्सर्वांश्च लोका न्त्सर्वांश्च देवा.न्त्सर्वाँश्च वेदा न्त्सर्वांश्च यज्ञा न्त्सर्वांश्च शब्दा- न्त्सर्वांश्च व्युष्टी स्सर्वाणि च भूतानि स्थावरजङ्गमा न्यन्वभव,त्तस्य प्रथमेन वर्णेनापस्नेह श्चान्वभव,त्तस्य द्वितीयेन वर्णेन तेजो ज्योतींष्यन्वभवत्।। 16।।

1.17 तस्य प्रथमया स्वरमात्रया - पृथिवी मग्नि मोषधिवनस्पती- नृग्वेदं- भूरिति व्याहृति- ङ्गायत्र ञ्छन्द - स्त्रिवृतं

स्तोमं - प्राची न्दिशं- वसन्त मृतुँ- वाच मध्यात्म- ञ्जिह्वां रस-मितीन्द्रिया.ण्यन्वभवत्।। 17।।

1.18 तस्य द्वितीयया स्वरमात्रया- ऽन्तरिक्षँ वायुं यजुर्वेदं- भुव इति व्याहृति- न्त्रैष्टुभ ञ्छन्दः- पञ्चदशं स्तोमं- प्रतीची न्दिशं- ग्रीष्म.मृतुं- प्राण मध्यात्म- न्नासिके गन्धघ्राण मितीन्द्रिया.ण्यन्वभवत्।। 18।।

1.19 तस्य तृतीयया स्वरमात्रया- दिव मादित्यं सामवेदं स्वरिति व्याहृति- ञ्जागत.ञ्छन्द- स्सप्तदशं स्तोम- मुदीची न्दिशं- वर्षा ऋतु- ञ्ज्योति रध्यात्म- ञ्चक्षुषी दर्शन मितीन्द्रिया.ण्यन्वभवत्।। 19।।

1.20 तस्य वकार मात्रयाऽप श्चन्द्रमस- मथर्ववेद- न्नक्षत्रा-ण्योमिति स्वमात्मान, -ञ्जन.दित्यङ्गिरसा- मानुष्टुभ ञ्छन्द- एकविंशं स्तोम- न्दक्षिणा न्दिशं- शरद मृतुं - मनोऽध्यात्मं ज्ञानं ज्ञेयमितीन्द्रिया.ण्यन्वभवत्।। 20।।

1.21 तस्य मकारश्रुत्येतिहासपुराणं- वाको वाक्य गाथा नाराशंसी- रुपनिषदोऽनुशासनानामिति- वृधत्- करद्- रुह-न्महत्-त-च्छ-मो मिति व्याहृती- स्स्वर शम्य नाना तन्त्री- स्स्वर

नृत्य गीत वादित्राण्यन्वभव, - च्चैत्ररथ न्दैवतँ - वैद्युत ञ्ज्योति - र्बार्हतं छन्द- स्त्रिणव.त्रयस्त्रिंशौ स्तोमौ- ध्रुवा मूर्ध्वा न्दिशं- हेमन्तशिशिरावृतू- श्रोत्र मध्यात्मं- शब्दश्रवण मितीन्द्रिया.ण्यन्वभवत्।। 21।।

☙ 1.22 सैषैकाक्षर ऋग् ब्रह्मण स्तपसोऽग्रे प्रादुर्बभूव, ब्रह्मवेदस्याऽऽथर्वणं शुक्र- मत एव मन्त्राः प्रादुर्बभूवु, स्स तु खलु मन्त्राणा मतपसाऽ शुश्रूषाऽनध्यायाध्ययनेन- यदूनञ्च विरिष्टञ्च यातयामञ्च करोति- तदथर्वणा न्तेजसा प्रत्याप्याययें-न्मन्त्राश्च मामभिमुखी भवेयु, र्गर्भा इव मातर मभिजिघांसुः पुरस्ता दोङ्कारं प्रयुङ्क,- एतयैव तदृचा प्रत्याप्याययें- देषैव यज्ञस्य पुरस्ता द्युज्यत,- एषा पश्चात्, सर्वत एतया यज्ञ स्तायते, तदप्येतदृचोक्तम्। या पु॒रस्ता॑ द्यु॒ज्यत॑, ऋ॒चो अ॒क्षरे॑ प॒र॒मे व्यो॑मन्नि॒ति। तदेतदक्षरं, ब्राह्मणो यङ्काम मिच्छे.त्त्रिरात्रोपोषितः प्राङ्मुखो वाग्यतो बर्हिष्युपविश्य- सहस्त्रकृत्व आवर्तयेत्- सिध्य.न्त्यस्यार्था स्सर्वकर्माणि चेति ब्राह्मणम्।। 22।।

☙ 1.23 वसोर्धाराणा मैन्द्र न्नगर, न्तदसुराः पर्यवारयन्त, ते देवा भीता आसन्, क इमा नसुरा नपहनिष्यतीति, त ओङ्कारं ब्रह्मणः

पुत्रं ज्येष्ठ न्ददृशु, स्ते तमब्रुव, न्भवता मुखे.नेमा नसुरा न्जयेमेति, स होवाच- किं मे प्रतीवाहो भविष्यतीति, वरँ वृणीष्वेति- वृणा इति, स वर मवृणीत, न मा.मनीरयित्वा ब्राह्मणा ब्रह्म वदेयु, यँदि वदेयु- रब्रह्म तत्स्यादिति, तथेति, ते देवा देवयजनस्योत्तरार्द्धेऽसुरै स्सँयत्ता आसं-स्तानोङ्कारेणा ऽऽग्नीध्रीया द्देवा असुरा.न्पराऽभावयन्त, तद्यत्पराऽभावयन्त तस्मादोङ्कारः पूर्वमुच्यते, यो ह वा एत मोङ्कार न्न वेदा-वश स्स्यादि,त्यथ य एवँ वेद- ब्रह्मवश स्स्यादिति, तस्मादोङ्कार ऋच्यृ.ग्भवति- यजुषि यजु- स्साम्नि साम- सूत्रे सूत्रं- ब्राह्मणे ब्राह्मणं- श्लोके श्लोकः- प्रणवे प्रणव इति ब्राह्मणम्।। 23।।

1.24 ओंकारं पृच्छामः- को धातुः, किं प्रातिपदिकं, किन्नामाऽऽख्यातं, किँ लिङ्गं, किँ वचनं, का विभक्तिः, कः प्रत्ययः, क स्स्वर- उपसर्गो निपातः, किँ वै व्याकरणं, को विकारः, को विकारी, कतिमात्रः, कतिवर्णः, कत्यक्षरः, कति पदः, कस्सँयोगः, किं स्थानानुप्रदानकरणं, शिक्षुकाः किमुच्चारयन्ति, किञ्छन्दः, को वर्ण इति पूर्वे प्रश्ना- अथोत्तरे- मन्त्रः कल्पो ब्राह्मण मृग्यजु स्साम, कस्मा द्ब्रह्मवादिन ओङ्कार मादितः कुर्वन्ति, किन्दैवतं, किञ्ज्योतिषं, किन्निरुक्तं, किं स्थानं, का प्रकृतिः,

किमध्यात्ममिति- षड्विंश.त्प्रश्ना॰ पूर्वोत्तराणा,न्त्रयो वर्गा द्वादशका, एतै रोङ्कारँ व्याख्यास्यामः।। 24।

1.25 इन्द्र॰ प्रजापति मपृच्छ द्भगव- न्नभिष्टूय पृच्छामीति, पृच्छ वत्सेत्यब्रवीत्, किमय मोङ्कार॰- कस्य पुत्र॰- किञ्चैत च्छन्द॰- किञ्चैत द्वर्ण॰- किञ्चैत द्ब्रह्मा- ब्रह्म सम्पद्यते, तस्माद्वै तद्भद्र मोङ्कारं पूर्व मालेभे, स्वरितोदात्त एकाक्षर ओङ्कार ऋग्वेदे, त्रैस्वर्योदात्त एकाक्षर ओङ्कारो यजुर्वेदे, दीर्घप्लुतोदात्त एकाक्षर ओङ्कार स्सामवेदे, ह्रस्वोदात्त एकाक्षर ओङ्कारोऽथर्ववेद,उदात्तोदात्त द्विपद अ उ इत्यर्धचतस्रो मात्रा- मकारे व्यञ्जन मित्याहु, र्या सा प्रथमा मात्रा ब्रह्मदेवत्या रक्ता वर्णेन- यस्ता न्ध्यायते नित्यं स गच्छे द्ब्राह्म्यं पदं, या सा द्वितीया मात्रा विष्णुदेवत्या कृष्णा वर्णेन- यस्ता न्ध्यायते नित्यं स गच्छे.द्वैष्णवं पदं, या सा तृतीया मात्रैशानदेवत्या कपिला वर्णेन- यस्ता न्ध्यायते नित्यं स गच्छे दैशानं पदं, या सार्धचतुर्थी मात्रा सर्वदेवत्या ऽव्यक्तीभूता खँ विचरति- शुद्ध स्फटिक सन्निभा वर्णेन- यस्ता न्ध्यायते नित्यं स गच्छे.त्पद मनामक,मोङ्कारस्य चोत्पत्ति र्विप्रो यो न जानाति- तत्पुनरुपनयनं, तस्मा.द्ब्राह्मणवचन मादर्तव्यँ, यथा लातव्यो गोत्रो ब्रह्मण॰ पुत्रो,

गायत्र ञ्छन्द- श्शुक्लो वर्णः- पुंसो वत्सो- रुद्रो देवता,- ओङ्कारो वेदानाम्।। 25।।

1.26 को धातु रि-त्यापृ-र्धातु, रवति मप्येके, रूपसामान्या दर्थसामान्य न्नेदीय- स्तस्मा दापे रोङ्कार- स्सर्व माप्नोतीत्यर्थः, कृदन्त मर्थवत्- प्रातिपदिक मदर्शनं, प्रत्ययस्य नाम सं पद्यते, निपातेषु चैनँ वैयाकरणा उदात्तं समामनन्ति, तदव्ययीभूत मन्वर्थवाची शब्दो- न व्येति कदाचनेति। सदृश न्त्रिषु लिङ्गेषु सर्वासु च विभक्तिषु। वचनेषु च सर्वेषु यन्न व्येति तदव्ययम्।। को विकारी- च्च्यवते प्रसारण , माप्नोते राकार-पकारौ विकार्य्यौ-वादित ओकारो विक्रियते, द्वितीयो मकार, एव न्द्विवर्ण एकाक्षर ओमि-त्योङ्कारो निर्वृत्तः।। 26।।

1.27 कतिमात्र इ-त्यादि स्तिस्रो मात्रा, अभ्यादाने हि प्लवते मकार श्चतुर्थी, किंस्थान मित्युभा वोष्ठौ स्थानं, नादानुप्रदानकरणौ च द्विस्थानं, सन्ध्यक्षर मवर्णलेशः कण्ठ्यो यथोक्तशेषः, पूर्वो विवृतकरणस्थितश्च- द्वितीय स्स्पृष्टकरणस्थितश्च, न सँयोगो विद्यत,आख्यातोपसर्गानुदात्त स्वरित लिङ्ग विभक्ति वचनानि च- संस्थानाध्यायिन आचार्याः पूर्वे बभूवु,श्श्रवणादेव प्रतिपद्यन्ते, न

कारणं पृच्छ.न्त्यथापर.पक्षीयाणां कविः पञ्चालचण्डः परिपृच्छको बभूवाऽम्बु पृथगुद्गीथ दोषा.न्भवन्तो ब्रुवन्त्विति, तद्वाऽप्युपलक्षये-द्वर्णाक्षर पदाङ्कशो विभक्त्या मृषिनिषेविता मिति वाचं स्तुवन्ति, तस्मा त्कारणं ब्रूमो- वर्णाना मयमिदं भविष्यतीति- षडङ्गविद स्तत्तथाऽधीमहे, किञ्छन्द इति गायत्रं हि छन्दो- गायत्री वै देवाना मेकाक्षरा श्वेतवर्णा च व्याख्याता, द्वौ द्वादशकौ वर्गा-वेतद्वै व्याकरणं धात्वर्थवचनं, शैक्ष ञ्छन्दो वचन.ञ्चा,थोत्तरौ द्वौ द्वादशकौ वर्गौ, वेद-रहसिकी व्याख्याता, मन्त्रः कल्पो ब्राह्मण मृग्यजु स्सामाथर्वा.ण्येषा व्याहृति, श्चतुर्णां वेदाना मानुपूर्वे-णों भूर्भुव स्वरिति व्याहृतयः।। 27।।

1.28 असमीक्षप्रवह्लितानि श्रूयन्ते,द्वापरादा-वृषीणा मेकदेशो दोषपति रिह चिन्ता मापेदे, त्रिभि स्सोमः पातव्य,स्समाप्तमिव भवति, तस्मादृग्यजु स्सामा- न्यपक्रान्ततेजां-स्यासं,-स्तत्र महर्षयः परिदेवयाञ्चक्रिरे- महच्छोकभयं प्राप्तास्मो, न चैत त्सर्वै स्समभिहित- न्ते वयं भगवन्त मेवोपधावाम, सर्वेषामेव शर्म भवानिति, ते तथेत्युक्त्वा तूष्णी मतिष्ठ न्नानुपसन्नेभ्य इत्युपोपसीदामेति नीचै र्बभूवु,स्स एभ्य उपनीय प्रोवाच-

मामिकामेव व्याहृति मादित आदितः कृणुध्व- मित्येवं मामका आऽधीयन्ते, नर्ते भृग्वङ्गिरोविद्भ्य स्सोमः पातव्य, ऋत्विजः परा भवन्ति, यजमानो रजसाऽप.ध्वस्यति, श्रुति श्चापध्वस्ता तिष्ठती- त्येवमेवोत्तरोत्तरा द्योगा त्तोकं तोकं प्रशाध्व- मित्येवं प्रतापो न परा भविष्यतीति तथाऽऽह, तथाऽऽह भगवन्निति प्रतिपेदिर, आऽप्याययंस्ते तथा वीतशोकभया बभूवु,स्तस्मा द्ब्रह्मवादिन ओङ्कार मादितः कुर्वन्ति।। 28।।

1.29 किन्देवत मि,त्यृचा मग्नि र्दैवत,न्तदेव ज्योति र्गायत्र ञ्छन्दः, पृथिवी स्थानम्। अ॒ग्निमी॑ळे पु॒रोहि॑तँ य॒ज्ञस्य॑ दे॒व मृ॒त्विज॑म्। होता॑रं र॒त्न धात॑म- मित्येवमादि ङ्कृत्वा ऋग्वेद मधीयते, यजुषाँ वायु र्दैवत, न्तदेव ज्योति- स्त्रैष्टुभ ञ्छन्दोऽन्तरिक्षं स्थानम्- इ॒षे त्वो॒र्जे त्वा॑ वा॒यव॑ स्स्थोपा॒ऽऽयव॑स्स्थ दे॒वो व॑ स्सवि॒ता प्रार्प॑यतु॒ श्रेष्ठतमा॒य कर्म॑ण- इत्येवमादि.ङ्कृत्वा यजुर्वेद मधीयते, साम्ना मादित्यो देवत, न्तदेव ज्योति- र्जागत ञ्छन्दो- द्यौ स्स्थानम्। अग्न आयाहि वीतये गृणानो हव्यदातये। निहोता सत्सि बर्हिषी- त्येवमादि.ङ्कृत्वा सामवेद मधीयते,ऽथर्वणां चन्द्रमा देवत,न्तदेव ज्योति स्सर्वाणि छन्दां-स्याप स्स्थानम्, शन्नो॑ दे॒वी र॒भिष्ट॑य॒ आपो॑

भवन्तु पीतये। शँ यो रभि स्रवन्तु न- इत्येवमादि ङ्कृत्वाऽथर्ववेद मधीयते,ऽद्म्य स्स्थावरजङ्गमो भूतग्राम स्सं भवति,

卐 तस्मा.त्सर्वमापोमयं भूतं सर्वं भृग्वङ्गिरोमयम्।

अन्तरैते त्रयो वेदा भृगू नङ्गिरस श्श्रिता- इत्यबिति प्रकृति,रपा मोङ्कारेण, चैतस्माद् व्यासः पुरोवाच- भृग्वङ्गिरोविदा संस्कृतोऽन्यान् वेदा नधीयीत, नान्यत्र संस्कृतो भृग्वङ्गिरसोऽधीयीत, नायं भृग्वङ्गिरसा न्नियमो- यतो ह्येते भार्गवा आङ्गिरसा, अथ सामवेदे खिलश्रुति- ब्रह्मचर्येण चैतस्मा दथर्वाङ्गिरसो ह यो वेद - स वेद सर्व-मिति ब्राह्मणम्।। 29।।

1.30 अध्यात्म मात्मभैषज्य मात्मकैवल्य मोङ्कार, आत्मान न्निरुध्य सङ्गममात्रीं भूतार्थचिन्ता.श्चिन्तये,दतिक्रम्य वेदेभ्य स्सर्वपर मध्यात्मफलं प्राऽऽप्नोतीत्यर्थ,स्सवितर्कं ज्ञानमय मि,त्येतैः प्रश्नैः प्रतिवचनैश्च यथार्थं पद मनुविचिन्त्य- प्रकरणज्ञो हि प्रबलो विषयी स्यात्, सर्वस्मि न्वाको वाक्य इति ब्राह्मणम्।। 30।

1.31 एतद्ध स्मैतद्विद्वांस मेकादशाक्षं मौद्गल्य.ङ्ग्लावो मैत्रेयोऽभ्याजगाम, स तस्मि न्ब्रह्मचर्य्यँ वसतो विज्ञायोवाच, किं स्विन्मर्या- अय न्तं मौद्गल्योऽध्येति- यदस्मि न्ब्रह्मचर्ये वसतीति,

तद्धि मौद्गल्यस्यान्तेवासी शुश्राव, स आचार्य्यायाऽऽव्रज्या ऽऽचचष्टे, दुरधीयानँ वा अयं भवन्त मवोच- द्योऽय.मद्यातिथि र्भवति, किं सौम्य विद्वानिति, त्रीन् वेदा न्ब्रूते भो 3 इति, तस्य सौम्य- यो विस्पष्टो विजीगीषोऽन्तेवासी तन्मे ह्वयेति, तमाजुहाव, तमभ्युवा.चासाविति भो 3 इति, किं सोम्य- त आचार्यो ऽध्येतीति, त्रीन्वेदा न्ब्रूते भो 3 इति, यन्नु खलु सौम्यास्माभि स्सर्वे वेदा मुखतो गृहीताः- कथन्त एव माचार्यो भाषते, कथन्नु शिष्टा श्शिष्टेभ्य एवं भाषेरन्, यं ह्येन महं प्रश्नं पृच्छामि- न तँ विवक्ष्यति- न ह्येन मध्येतीति, स ह मौद्गल्य स्स्वमन्तेवासिन मुवाच, परेहि सौम्य, ग्लावं मैत्रेय मुपसी.दाधीहि, भोस्सावित्री ङ्गायत्री ञ्चतुर्विंशतियोनि न्द्वादशमिथुनां, यस्या भृग्वङ्गिरस श्चक्षु- र्यस्यां सर्व मिदं श्रितं- तां भवा.न्प्रब्रवीत्विति, स चेत्सौम्य दुरधीयानो भविष्य,त्याचार्योवाच- ब्रह्मचारी ब्रह्मचारिणे सावित्रीं प्राऽऽहेति- वक्ष्यति तत्त्वं, ब्रूया द्दुरधीयान,न्तँ वै भवा.न्मौद्गल्य मवोच,त्स त्वा यं प्रश्न मप्राक्षी- न्न तँ व्यवोचः, पुरा सँवत्सरा दार्तिं माऽरिष्यसीति।। 31।।

1.32 स तत्राऽऽजगाम यत्रेतरो बभूव, तं ह पप्रच्छ, स ह न प्रति पेदे, तं होवाच दुरधीयान न्तँ वै भवा.न्मौद्गल्य मवोच,त्स त्वा यं

प्रश्न मप्राक्षी न्न तँ व्यवोचः, पुरा सँवत्सरा दार्तिं माऽरिष्यसीति, स ह मैत्रेय स्स्वा नन्तेवासिन उवाच- यथार्थं भवन्तो यथागृहँ यथामनो विप्रसृज्यन्ता,न्दुरधीयानँ वा अहं मौद्गल्य मवोचं, स मा-यं प्रश्न मप्राक्षी- न्न तँ व्यवोच,न्तमुपेष्यामि शान्ति ङ्करिष्यामीति, स ह मैत्रेयः प्रात स्समित्पाणि मौद्गल्य मुपससा.दासौ वा अहं भो मैत्रेयः- किमर्थमिति, दुरधीयानँ वा अहं भवन्त मवोच,न्त्वं मा यं प्रश्न मप्राक्षी- र्न तं व्यवोच,न्त्वामुपेष्यामि- शान्ति ङ्करिष्यामीति, स होवा.चात्र वा उपेतञ्च सर्वञ्च कृतं, पापकेन त्वा यानेन चरन्त माहू-रथोऽयं मम कल्याण- स्तन्ते ददामि तेन याहीति, स होवा.चैत.देवात्रात्विष ञ्चानृशंस्यञ्च यथा भवाना.होपाऽऽया-मित्येवं भवन्तमिति, तं होपेयाय, तं होपेत्य पप्रच्छ- किंस्विदाहु-

卐भों स्सवितु र्वरेण्यं भर्गो देवस्य कवयः किमाहु र्धियो विचक्ष्व, यदि ताः प्रविश्य- प्रचोदया त्सविता याभिरेतीति, तस्मा एतत्प्रोवाच-

卐 वेदा श्छन्दांसि सवितु र्वरेण्यं भर्गो देवस्य कवयोऽन्न माहुः। कर्माणि धिय स्तदु ते ब्रवीमि प्रचोदया त्सविता याभिरेतीति,

तमुपसङ्गृह्य पप्रच्छाधीहि भोः- क स्सविता? का सावित्री?।। 32।।

1.33 **मन एव सविता, वाक्सावित्री, यत्र ह्येव मन स्तद्वा.ग्यत्र वै वाक्तन्मन- इत्येते द्वे योनी एकं मिथुन,मग्निरेव सविता पृथिवी सावित्री- यत्र ह्येवाग्नि स्तत्पृथिवी- यत्र वै पृथिवी तदग्नि- रित्येते द्वे योनी एकं मिथुनँ, वायुरेव सविताऽन्तरिक्षं सावित्री- यत्र ह्येव वायु स्तदन्तरिक्षँ- यत्र वा अन्तरिक्ष न्तद्वायु- रित्येते द्वे योनी एकं मिथुन,मादित्य एव सविता द्यौ स्सावित्री- यत्र ह्येवाऽऽदित्य स्तद्यौ- र्यत्र वै द्यौ स्तदादित्य- इत्येते द्वे योनी एकं मिथुन,ञ्चन्द्रमा एव सविता नक्षत्राणि सावित्री- यत्र ह्येव चन्द्रमा स्तन्नक्षत्राणि- यत्र वै नक्षत्राणि तच्चन्द्रमा- इत्येते द्वे योनी एकं मिथुन,महरेव सविता रात्रि स्सावित्री- यत्र ह्येवाह स्तद्रात्रि- र्यत्र वै रात्रि स्तदह- रित्येते द्वे योनी एकं मिथुन,मुष्णमेव सविता शीतं सावित्री- यत्र ह्येवोष्ण न्तच्छीतँ- यत्र वै शीत न्तदुष्ण- मित्येते द्वे योनी एकं मिथुन,मब्भ्रमेव सविता वर्षं सावित्री- यत्र ह्येवाब्भ्र न्तद्वर्षँ- यत्र वै वर्ष न्तदब्भ्र- मित्येते द्वे योनी एकं मिथुनँ, विद्युदेव सविता स्तनयित्नु स्सावित्री- यत्र ह्येव विद्यु.त्तत्स्तनयित्नु- र्यत्र वै स्तनयित्नु**

स्तद्विद्यु- दित्येते द्वे योनी एकं मिथुनं, प्राण एव सविताऽन्नं सावित्री- यत्र ह्येव प्राण स्तदन्नँ- यत्र वा अन्न न्तत्प्राण- इत्येते द्वे योनी एकं मिथुनँ, वेदा एव सविता छन्दांसि सावित्री- यत्र ह्येव वेदा स्तच्छन्दांसि- यत्र वै छन्दांसि तद्वेदा- इत्येते द्वे योनी एकं मिथुनँ, यज्ञ एव सविता दक्षिणा सावित्री- यत्र ह्येव यज्ञ स्तद्दक्षिणा- यत्र वै दक्षिणा तद्यज्ञ- इत्येते द्वे योनी एकं मिथुन,मेतद्ध स्मैतद्विद्वांस मोपाकारिमाऽऽसस्तु ब्रह्मचारी, ते संस्थित इत्यथैत आसस्तु राचित इव चितो बभू,वाथोत्थाय प्राव्राजी,दित्येतद्वा अहं वेद, नैतासु योनिष्वित एतेभ्यो वा मिथुनेभ्य स्सम्भूतो ब्रह्मचारी- मम पुराऽऽयुषः प्रेयादिति।। 33।।

1.34 ब्रह्म हेदं श्रियं प्रतिष्ठा मायतन मैक्षत, तत्तपस्व- यदि तद्व्रते ध्रियेत, तत्सत्ये प्रत्यतिष्ठ,त्स सविता सावित्र्या ब्राह्मणं सृष्ट्वा तत्सावित्रीं पर्यदधा,त्तत्सवितु र्वरेण्यमिति सावित्र्याः प्रथमः पादः, पृथिव्यर्चं समदधा,दृचाऽग्नि- मग्निना श्रियं- श्रिया स्त्रियं- स्त्रिया मिथुनं- मिथुनेन प्रजां- प्रजया कर्म- कर्मणा तप- स्तपसा सत्यं- सत्येन ब्रह्म- ब्रह्मणा ब्राह्मणं- ब्राह्मणेन व्रतँ, व्रतेन वै ब्राह्मण स्संशितो भव-त्यशून्यो भव-त्यविच्छिन्नो भव,त्यविच्छिन्नोऽस्य

तन्तु- रविच्छिन्नं जीवनं भवति- य एवँ वेद- यश्चैवँ विद्वा नेव मेतं सावित्र्याः प्रथमं पादँ व्याचष्टे।। 34।।

1.35 भर्गो देवस्य धीमहीति सावित्र्या द्वितीयः पादो,ऽन्तरिक्षेण यजु स्समदधा- द्यजुषा वायुँ- वायुनाऽभ्र- मभ्रेण वर्षँ- वर्षेणौषधिवनस्पती- नोषधिवनस्पतिभिः पशून्- पशुभिः कर्म- कर्मणा तप- स्तपसा सत्यं- सत्येन ब्रह्म- ब्रह्मणा ब्राह्मणं, ब्राह्मणेन व्रतँ, व्रतेन वै ब्राह्मण स्संशितो भव-त्यशून्यो भव-त्यविच्छिन्नो भव-त्यविच्छिन्नोऽस्य तन्तु- रविच्छिन्नं जीवनं भवति य एवँ वेद, यश्चैवँविद्वा नेव मेतं सावित्र्या द्वितीयं पादँ व्याचष्टे।। 35।।

1.36 धियो यो नः प्रचोदया दिति सावित्र्या स्तृतीयः पादो, दिवा साम समदधा,त्साम्नाऽऽदित्य- मादित्येन रश्मीन्- रश्मिभि र्वर्षँ- वर्षेणौषधिवनस्पती- नोषधिवनस्पतिभिः पशू,न्पशुभिः कर्म- कर्मणा तप- स्तपसा सत्यं- सत्येन ब्रह्म- ब्रह्मणा ब्राह्मणं- ब्राह्मणेन व्रतँ, व्रतेन वै ब्राह्मण स्संशितो भव- त्यशून्यो भव- त्यविच्छिन्नो भव,त्यविच्छिन्नोऽस्य तन्तु- रविच्छिन्नं जीवनं भवति य एवँ वेद, यश्चैवँ विद्वा नेव मेतं सावित्र्या स्तृतीयं पादँ व्याचष्टे।। 36।।

Sri Ganapathi Sachchidananda Avadhoota Datta Peetham • Mysore •

1.37 तेन ह वा एवँविदुषा ब्राह्मणेन ब्रह्माभिपन्न.ङ्गसितं परामृष्टं, ब्रह्मणाऽऽकाश मभिपन्न.ङ्गसितं परामृष्ट,माकाशेन वायु रभिपन्नो ग्रसितः परामृष्टो, वायुना ज्योति रभिपन्न.ङ्गसितं परामृष्ट,ञ्ज्योतिषाऽऽपोऽभिपन्ना ग्रसिताः परामृष्टा, अद्भि र्भूमि रभिपन्ना ग्रसिता परामृष्टा, भूम्याऽन्न मभिपन्न.ङ्गसितं परामृष्ट,मन्नेन प्राणोऽभिपन्नो ग्रसितः परामृष्टः, प्राणेन मनोऽभिपन्न.ङ्गसितं परामृष्टं, मनसा वागभिपन्ना ग्रसिता परामृष्टा, वाचा वेदा अभिपन्ना ग्रसिताः परामृष्टा, वेदै र्यज्ञोऽभिपन्नो ग्रसितः परामृष्ट,स्तानि ह वा एतानि द्वादश महाभूता-न्येवँविधिप्रतिष्ठितानि, तेषाँ यज्ञ एव परार्ध्यः।। 37।।

1.38 तं ह स्मैत मेवँविद्वांसो मन्यन्ते- विद्मैन मिति, याथातथ्य मविद्वांसो-ऽयं यज्ञो वेदेषु प्रतिष्ठितो, वेदा वाचि प्रतिष्ठिता, वाङ्मनसि प्रतिष्ठिता, मनः प्राणे प्रतिष्ठितं, प्राणोऽन्ने प्रतिष्ठितो,ऽन्नं भूमौ प्रतिष्ठितं, भूमि रप्सु प्रतिष्ठिता,ऽऽपो ज्योतिषि प्रतिष्ठिता, ज्योति र्वायौ प्रतिष्ठितँ, वायु राकाशे प्रतिष्ठित, आकाशं ब्रह्मणि प्रतिष्ठितं, ब्रह्म ब्राह्मणे ब्रह्मविदि प्रतिष्ठितं, यो ह वा एवँवित्स ब्रह्मवि,त्पुण्याञ्च कीर्तिँ लभते सुरभींश्च गन्धान्, सोऽपहतपाप्मा

ऽनन्तांश्रिय मश्नुते य एवँ वेद, यश्चैवँविद्वा नेव मेताँ वेदानां मातरं सावित्रीसम्पद मुपनिषद मुपाऽऽस्त इति ब्राह्मणम्।। 38।।

1.39 आपो॑ ग॒र्भं ज्ञ॒नय॑न्ती- रित्यपा ङ्गर्भः पुरुष,स्स यज्ञो,ऽद्भि र्यज्ञः प्रणीयमानः प्राङ्गायते, तस्मा दाचमनीयं पूर्वं माहारयति, स यदाचामति त्रिराचामति, द्विः परिशुम्भ- त्यायु रवरुह्य- पाप्मान न्निर्णुद,त्युपसाद्य यजुषोद्धृत्य मन्त्रा.न्प्रयुज्यावसाय, प्राची श्शाखा स्सन्धाय, निरङ्गुष्ठे पाणा-वमृतम.स्यमृतोपस्तरण म-स्यमृताय त्वोपस्तृणामीति- पाणावुदक मानीय- जीवास्स्थेति सूक्तेन त्रिराचामति, स यत्पूर्वं माचामति- सप्त प्राणां-स्तानेतेनास्मि न्नाप्याययति, या ह्येमा बाह्या श्शरीरा न्मात्रा- स्तद्यथैत दग्निँ वायु मादित्य ञ्चन्द्रमस मपः पशू- नन्यांश्च प्रजा स्तानेते.नास्मि न्नाप्यायय, त्यापोऽमृतं, स यद्द्वितीय माचामति- सप्ताऽपानां- स्तानेते.नास्मि न्नाप्याययति, या ह्येमा बाह्या श्शरीरा.न्मात्रा- स्तद्यथैत त्पौर्णमासी मष्टका ममावास्यां श्रद्धा न्दीक्षाँ यज्ञं दक्षिणा- स्तानेतेनास्मि न्नाप्यायय,त्यापोऽमृतं, स यत्तृतीय माचामति सप्त व्यानां-स्तानेते.नास्मि न्नाप्याययति, या ह्येमा बाह्या श्शरीरा न्मात्रा- स्तद्यथैत त्पृथिवी मन्तरिक्ष न्दिव न्नक्षत्राण्यृतू

नार्तवा.न्त्संवत्सरां-स्तानेतेनास्मि न्नाप्याययय,त्यापोऽमृतं, पुरुषो ब्रह्मा.थाऽऽप्रियनिगमो भवति, तस्माद्वै विद्वा न्पुरुष मिदं पुण्डरीकमिति, प्राण एष स पुरि शेते, सं पुरि शेत इति- पुरिशयं सन्तं प्राणं पुरुष इत्याचक्षते परोऽक्षेण, परोऽक्षप्रिया इव हि देवा भवन्ति प्रत्यक्षद्विष,स्स यत्पूर्व माचामति पुरस्ता द्धोमां- स्तेनास्मि न्नव रुन्धे, स यद्द्वितीय माचाम त्याज्यभागौ- तेनास्मि न्नव रुन्धे, स यत्तृतीय माचामति संस्थितहोमां- स्तेनास्मि न्नव रुन्धे, स यद्दिः परिशुम्भति तत्समि.त्संबर्हि,स्स यत्सर्वाणि खानि सर्व न्देह माप्याययति- यच्चान्यदातारं मन्त्रकार्य्यं यज्ञे स्कन्दति- सर्व न्तेनास्मि न्नव रुन्धे, स यदों पूर्वान्मन्त्रान् प्रयुङ्क्- आसर्वमेधा देते क्रतव- एत एवास्य सर्वेषु लोकेषु- सर्वेषु देवेषु- सर्वेषु वेदेषु- सर्वेषु भूतेषु- सर्वेषु सत्येषु- कामचारः, कामविमोचनं भव- त्यर्द्धे च न प्रमीयते य एवँ वेद, तदप्येत दृचोक्तम्।

卐 आपो भृग्वङ्गिरोरूप, मापो भृग्वङ्गिरोमयम्।

सर्व मापोमयं भूतं सर्वं भृग्वङ्गिरोमयम्।।

卐 अन्तरैते त्रयो वेदा भृगू नङ्गिरसोऽनुगाः।

卐 अपां पुष्पं मूर्तिं राकाशं पवित्र मुत्तम-मित्याचम्या.भ्युक्ष्या.ऽऽत्मान मनुमन्त्रयत इन्द्र जीवेति ब्राह्मणम्।

इति अथर्ववेदे गोपथब्राह्मणपूर्वभागे प्रथमः प्रपाठकः।।

## पूर्वार्धे द्वितीय प्रपाठकः

2.1 ओम्। ब्रह्मचारीष्णं.श्चरति रोदसी उभे- इत्याचार्यमाह, तस्मि न्देवा स्सम्मनसो भवन्तीति वायुमाह, स सद्य एति पूर्वस्मा दुत्तरं समुद्र मित्यादित्य माह, दीक्षितो दीर्घश्मश्रु रेष दीक्षित एष दीर्घश्मश्रु, रेष एवाऽऽचार्यस्थाने तिष्ठ- न्नाचार्य इति स्तूयते, वैद्युतस्थाने तिष्ठन्- वायुरिति स्तूयते, द्यौस्थाने तिष्ठ न्नादित्य इति स्तूयते, तदप्येतदृचोक्तं, ब्रह्मचारीष्ण न्निति ब्राह्मणम्।। 1।।

2.2. जायमानो ह वै ब्राह्मण, स्सप्तेन्द्रियाण्यभि जायन्ते- ब्रह्मवर्चसञ्च यशश्च स्वप्नञ्च क्रोधञ्च श्लाघाञ्च रूपञ्च पुण्यमेव गन्धं सप्तम,न्तानि ह वा अस्यैतानि ब्रह्मचर्य मुपेतो ऽप क्रामन्ति, मृगानस्य ब्रह्मवर्च्चसं गच्छ-त्याचार्य्यं यशो-ऽजगरं स्वप्नो- वराहं क्रोधो-ऽपश्श्ला गघा- कुमारीं रूप-मोषधिवनस्पती न्पुण्यो गन्ध,स्स यन्मृगाजिनानि वस्ते - तेन तद्ब्रह्मवर्च्चस मवरुन्धे, यदस्य मृगेषु भवति स ह स्नातो ब्रह्मवर्च्चसी भवति, स यदहरह राचार्य्याय कर्म

करोति- तेन तद्यशोऽवरुन्धे, यदस्याऽऽचार्ये भवति- स ह स्नातो यशस्वी भवति, स यत्सुषुप्सु र्निद्रा न्निनयति- तेन तं स्वप्न मवरुन्धे- योऽस्याजगरे भवति, तं ह स्नातं स्वपन्तमाहु- स्स्वपितु मैनं बोबुधथेति, स यत्क्रुद्धो वाचा न कञ्चन हिनस्ति पुरुषात्पुरुषात्- पापीयानिव मन्यमान- स्तेन तक्रोध मवरुन्धे योऽस्य वराहे भवति, तस्य ह स्नातस्य क्रोधा श्लाघीयसँविशन्ते,ऽथाद्धि श्श्लाघ्यमानो न स्नाया-त्तेन तां श्लाघा मव रुन्धे याऽस्याप्सु भवति, स ह स्नात श्श्लाघीयो ऽन्नेभ्य श्श्लाघ्यते,ऽथैत.द्ब्रह्मचारिणो रूपं यत्कुमार्य्यां,स्तान्नग्ना न्नोदीक्षेतेति वेति- वा मुखं विपरिधापये-त्तेन तद्रूप मवरुन्धे- यदस्य कुमार्य्यां भवति, तं ह स्नातं कुमारीमिव निरीक्षन्ते,ऽथैत द्ब्रह्मचारिणः पुण्यो गन्धो- य ओषधिवनस्पतीना- न्तासां पुण्यङ्गन्धं प्रच्छिद्य नोपजिघ्रे-त्तेन तं पुण्य.ङ्गन्ध मवरुन्धे- योऽस्यौषधिवनस्पतिषु भवति- स ह स्नातः पुण्यगन्धि र्भवति।। 2.2।।

2.3 स वा एष उपयं.श्चतुर्द्धोपैत्यग्निं पादेना-ऽऽचार्य्यं पादेन- ग्रामं पादेन- मृत्युं पादेन, स यदहरह स्समिध आहृत्य- सायं प्रातरग्निं परिचरे-त्तेन तं पाद मवरुन्धे- योऽस्याग्नौ भवति, स

यदहरह राचार्य्याय कर्म करोति- तेन तं पाद मव रुन्धे- योऽस्याऽऽचार्ये भवति, स यदहरह ग्रामं प्रविश्य भिक्षामेव परीप्सति न मैथुन- न्तेन तं पाद मवरुन्धे- योऽस्य ग्रामे भवति, स यत्क्रुद्धो वाचा न कञ्चन हिनस्ति पुरुषात्पुरुषा-त्पापीयानिव मन्यमान स्तेन तं पाद मवरुन्धे, योऽस्य मृत्यौ भवति।। 3।।

2.4 पञ्च ह वा एते ब्रह्मचारि.ण्यग्नयो धीयन्ते, द्वौ पृथग्घस्तयो-र्मुखे- हृदय- उपस्थ एव पञ्चम,स्स यद्दक्षिणेन पाणिना स्त्रिय न्न स्पृशति- तेनाहरह र्याजिनां लोक मवरुन्धे, यत्सव्येन- तेन प्रव्राजिनाँ, यन्मुखेन- तेनाग्निप्रस्कन्दिनाँ, यद्धृदयेन- तेन शूराणाँ, यदुपस्थेन- तेन गृहमेधिना,न्तैश्चे.त्स्त्रियं पराहर- त्यनग्निरिव शिष्यते, स यदहरह राचार्य्याय कुलेऽनुतिष्ठते- सोऽनुष्ठाय ब्रूयाद्-धर्म गुप्तो मा गोपायेति- धर्मो हैनं गुप्तो गोपायति, तस्य ह प्रजा श्वश्श्व.श्श्रेयसी श्रेयसी ह भवति, धाय्येव प्रतिधीयते, स्वर्गे लोके पितृ न्निदधाति, तान्तव.न्न वसीत, यस्तान्तवँ वस्ते- क्षत्रँ वर्धते न ब्रह्म, तस्मा त्तान्तव न्न वसीत, ब्रह्म वर्धतां मा क्षत्रमिति, नोपर्य्यासीत- यदुपर्य्यास्ते- प्राणमेव तदात्मनोऽधर ङ्कुरुते- यद्वातो वह,त्यध एवाऽऽसी,ताध श्शयी.ताधस्तिष्ठे.दधो व्रजे,देवं ह स्म वै

तत्पूर्वे ब्राह्मणा ब्रह्मचर्यं.श्चरन्ति, तं ह स्म तत्पुत्रं भ्रातरं वोपतापिन माहु- रुपनयेतैन मि.त्यासमिद्धारात्, स्वरेष्यन्तोऽन्न मद्या,दथाऽऽह जघन माहु, स्स्नापयेतैन मि.त्यासमिद्धारा,न्न ह्येतानि व्रतानि भवन्ति, तं चेच्छयान माचार्योऽभिवदे-त्स प्रतिसंहाय प्रति शृणुया-त्तश्चे च्छयान मुत्थाय- तश्चे दुत्थित मभिप्रक्रम्य- तश्चे दभिप्रक्रान्त मभि पलायमान- मेवं ह स्म वै तत्पूर्वे ब्राह्मणा ब्रह्मचर्य्यं चरन्ति, तेषां ह स्म वैषा पुण्या कीर्ति र्गच्छ,त्या ह वा अयं सोऽद्य गमिष्यतीति।। 2.4।।

2.5 जनमेजयो ह वै पारीक्षितो मृगयाश्चरिष्यन्, हंसाभ्या मशिक्ष न्नुपावतस्थ इति, ता.वूचतु र्जनमेजयं पारीक्षित-मभ्याजगाम, स होवाच- नमो वां भगवन्तौ, कौ नु भगवन्ताविति, तावूचतु र्दक्षिणाग्नि श्चाऽऽहवनीयश्चेति, स होवाच नमो वां भगवन्तौ, तदाकीयता मितीहोपाऽऽराम मि,त्यपि किल देवा न रमन्ते, न हि देवा न रमन्ते,ऽपि चौकोपाऽऽरामा.द्देवा आराम मुपसङ्क्रामन्तीति, स होवाच नमो वां भगवन्तौ, किं पुण्यमिति ब्रह्मचर्यमिति, किं लौक्यमिति ब्रह्मचर्यमेवेति, तत्को वेदेति-दन्ताबलो धौम्रो,ऽथ खलु दन्ताबलो धौम्रो यावति तावति काले

पारीक्षितं जनमेजय मभ्याजगाम, तस्मा उत्थाय स्वयमेव विष्टर न्निदधौ, तमुपसङ्गृह्य पप्रच्छा.धीहि भो, किं पुण्यमिति- ब्रह्मचर्यमिति, किं लौक्यमिति- ब्रह्मचर्य मेवेति, तस्मा एतत्प्रोवाचा-ऽष्टाचत्वारिंशद्वर्षं सर्ववेद ब्रह्मचर्य्यं,न्तच्चतुर्धा वेदेषु व्यूह्य- द्वादशवर्षं ब्रह्मचर्य्यं, द्वादशवर्षा-ण्यवरार्ध,मपि स्नायंश्चरे-द्यथाशक्त्यपर,न्तस्मा उ ह स ऋषभौ सहस्र न्ददा-वप्यपि कीर्तित,माचार्यो ब्रह्मचारीत्येक आहु,राकाश.मधिदैवत मथाध्यात्मं ब्राह्मणो व्रतवां-श्चरणवा न्ब्रह्मचारी।। 2.5।।

2.6 ब्रह्म ह वै प्रजा मृत्यवे संप्रयच्छ,द्ब्रह्मचारिणमेव न संप्रददौ, स होवाचाश्या मस्मिन्निति- किमिति? यां रात्रीं समिध मनाहृत्य वसे-त्ता मायुषोऽवरुन्धीयेति, तस्मा द्ब्रह्मचा.र्यहरह स्समिध आहृत्य- सायंप्रात रग्निं परिचरे,न्नोपर्युप सादये,दथ प्रतिष्ठापये,द्यदुपर्युपसादये- ज्जीमूतवर्षी तदहः पर्जन्यो भवति, ते देवा अब्रुव- न्ब्राह्मणो वा अयं ब्रह्मचर्य.ञ्चरिष्यति- ब्रूतास्मै भिक्षा इति गृहपति,र्ब्रूत बहुचारी गृहपत्न्या इति, किमस्या वृञ्जीताऽऽददत्या इ,तीष्टापूर्त- सुकृत- द्रविण मवरुन्ध्यादिति, तस्मा.द्ब्रह्मचारिणेऽहरह र्भिक्षा न्दद्या द्गृहिणी, मा मेऽय - मिष्टापूर्त-

सुकृत- द्रविण मवरुन्ध्यादिति, सप्तमी न्नातिनये,त्सप्तमी मतिनय.न्न ब्रह्मचारी भवति, समि द्धैक्षे सप्तरात्र मचरितवा- न्ब्रह्मचारी पुनरुपनेयो भवति।। 2.6।।

2.7 नोपरिशायी स्या,न्न गायनो, न नर्तनो, न सरणो, न निष्ठीवे,द्यदुपरिशायी भव.त्यभीक्ष्णं निवासा जायन्ते, यद्गायनो भव-त्यभीक्ष्णश आक्रन्दा द्धावन्ते, यन्नर्तनो भव-त्यभीक्ष्णशः प्रेता न्निर्हरन्ते, यत्सरणो भव-त्यभीक्ष्णशः प्रजा स्सँविशन्ते, यन्निष्ठीवति- मध्य एव तदात्मनो निष्ठीवति, स चेन्निष्ठीवे - द्दिवो नु माँ यदत्रापि मधोरहँ यदत्रापि रसस्य म- इत्यात्मान मनुमन्त्रयते।

卐 यदत्रापि मधो रह न्निरिष्टविष मस्मृतम्।

卐 अग्निश्च तत्सविता च पुनर्मे जठरे धत्ताम्।

卐 यदत्रापि रसस्य मे परा पपातास्मृतम्।

卐 तदिहोप ह्वयामहे तन्म आप्यायतां पुन-रिति।

न श्मशान मातिष्ठे,त्स चेदभितिष्ठे- दुदकं हस्ते कृत्वा, यदीदमृतु काम्ये-त्यभिमन्त्र्य जपन्त्सम्प्रोक्ष्य परिक्रामेत्, समयायोपरि व्रजेत्।

卐 यदीद मृतुकाम्य(अ)घं रिप्र मुपेयिम।

अन्ध श्श्लोर्ण इव हीयतां मा नोऽन्वागा दघँ यत- इति। अथ हैत द्देवानां परिषूतं- यद्ब्रह्मचारी, तदप्येतद्दचोक्तम्।

फ देवाना मेतर्त्परिषूत मनभ्यारूढ.श्चरति रोचमानम्। तस्मि न्त्सर्वे पशव स्तत्र यज्ञ स्तस्मि न्नन्नं सह देवताभि - रिति ब्राह्मणम्।। 2.7।।

2.8 प्राणापानौ जनयन्निति शङ्खस्य मूले- महर्षे र्वसिष्ठस्य पुत्र एतां वाचं ससृजे, शीतोष्णाविहोत्सौ प्रादुर्भवेयाता.मिति, तथा तच्छश्व दनुवर्तते,ऽथ खलु विपाणमध्ये वसिष्ठशिला नाम प्रथम आश्रमो, द्वितीयः कृष्णाशिला,स्तस्मिन्वसिष्ठ स्समतप,द्विश्वामित्रजमदग्नी जामदग्ने तपतो, गौतमभरद्वाजौ सिंहौ प्रभवे तपतो, गुङ्गु-र्गुङ्गुवासे तप,त्यृषिर् ऋषिद्रोणेऽभ्यतप,दगस्त्यो ऽगस्त्यतीर्थे तपति, दिव्यत्रिर्हि तपति, स्वयम्भूः कश्यपः कश्यप-तुङ्गेऽभ्यतपत,दुल-वृकर्क्ष-तरक्षु -श्वा- वराह- चिल्वटि- बभ्रुका स्सर्पदंष्ट्रन- स्संहनु कृण्वानाः- कश्यप तुङ्गदर्शना.त्सरणवाटा.त्सिद्धि र्भवति, ब्राह्म्यं वर्षसहस्र मृषिवने ब्रह्मचार्येकपादे.नातिष्ठद्,द्वितीयं वर्षसहस्रं मूर्ध.न्येवामृतस्य धारा माऽघारयद्,ब्राह्म्याण्यष्टाचत्वारिंशतं वर्षसहस्राणि सलिलस्य पृष्ठे

शिवोऽभ्यतप,-त्तस्मा.त्तप्ता त्तपसो भूय एवाभ्यतप,त्तदप्येता ऋचोऽभिवदन्ति, प्राणापानौ जनयन्निति ब्राह्मणम्।। 2.8।।

2.9 एकपाद्द्विपद इति, वायु रेकपा-त्तस्याऽऽकाशं पाद, श्चन्द्रमा द्विपा-त्तस्य पूर्वपक्षा.परपक्षौ पादा,-वादित्य स्त्रिपा-त्तस्येमे लोकाः पादा, अग्नि ष्षद्पाद- स्तस्य पृथिव्यन्तरिक्ष न्द्यौ राप ओषधिवनस्पतय इमानि भूतानि पादा,स्तेषां सर्वेषां वेदा गति रात्मा- प्रतिष्ठिता श्चतस्रो ब्रह्मण श्शाखा, अथो आहु ष्षडिति- मूर्ति राकाश श्चे,त्यृचा मूर्ति- र्याजुषी गति- स्साममय न्तेजो- भृग्वङ्गिरसा ?मायै.तद्ब्रह्मैव यज्ञ श्चतुष्पाद् द्विस्संस्थित इति, तस्य भृग्वङ्गिरस स्संस्थे, अथो आहु रेकसंस्थित इति, यद्धोतर्चां मण्डलैः करोति- पृथिवी न्तेनाऽऽप्यायय त्येतस्यां ह्यग्नि श्चरति, तदप्येतदृचोक्तम्- अग्निवासाः पृथिव्यसि तद्ज्ञूरिति, यदध्वर्यु र्यजुषा करोत्यन्तरिक्ष न्तेनाऽऽप्याययति- तस्मिन्वायु.र्न निविशते कतम च्चनाह इति, तदप्येतदृचोक्तम्। अन्तरिक्षे पथिभि र्ह्रियमाणो न निर्विशते कतमच्चनाहः। अपाँ योनिः प्रथमजा ऋतस्य क्वस्वि.ज्जातः कुत आबभूवेति। यदुद्गाता साम्ना करोति दिव न्तेनाऽऽप्याययति, तत्र ह्यादित्य श्शुक्र श्चरति, तदप्येत.दृचोक्तम्।

उच्चा पतन्त मरुणं सुपर्णमिति। यद्ब्रह्मर्चा- ङ्काण्डैः करो-त्यपस्तेना ऽऽप्याययति- चन्द्रमा ह्यप्सु चरति, तदप्येत दृचोक्तम्- चन्द्रमा अप्स्व1(अ)न्त रिति। तासा मोषधिवनस्पतयः काण्डानि, ततो मूल- काण्ड- पर्ण- पुष्प- फल- प्ररोह- रस- गन्धै र्यज्ञो वर्तते,ऽद्भिः कर्माणि प्रवर्तन्ते-ऽद्भि स्सोमो विषूयते, तद्यद्ब्रह्माण.ङ्कर्मणि कर्मण्यामन्त्रय-त्यप स्तेना.नुजाना,-त्येषो ह्यस्य भाग,स्तद्यथा भोक्ष्यमाणोऽप एव प्रथम माचामये- दप उपरिष्टा-देवँ यज्ञोऽद्भिरेव प्रवर्ततेऽप्सु संस्थाप्यते, तस्मा.द्ब्रह्मा पुरस्ता द्धोमसंस्थितहोमै र्यज्ञो वर्तते,ऽन्तरा हि पुरस्ता द्धोमसंस्थितहोमै र्यज्ञं परिगृह्णा- त्यन्तरा हि भृग्वङ्गिरसो वेदा नादुह्य भृग्वङ्गिरस स्सोमपानं मन्यन्ते, सोमाऽऽत्मको ह्ययं वेद,स्तदप्येत दृचोक्तम्। सोमं मन्यते पपिवानिति। तद्यथेमां पृथिवी मुदीर्णा ञ्ज्योतिषा धूमायमानाँ वर्षं शमय- त्येवं ब्रह्मा भृग्वङ्गिरोभि र्व्याहृतिभि र्यज्ञस्य विरिष्टं शमय,त्यग्नि रादित्या यम इत्येतेऽङ्गिरस- एत इदं सर्वं समाप्नुवन्ति, वायु राप श्चन्द्रमा इत्येते भृगव, एत इदं सर्वं समाप्याययन्त्येकमेव संस्थं भवतीति ब्राह्मणम्।। 2.9।।

2.10 विचारी ह वै काबन्धिः कबन्धस्याऽऽथर्वणस्य पुत्रो मेधावी मीमांसकोऽनूचान आस, स ह स्वेनातिमानेन मानुषँ वित्त न्नेयाय, तं मातोवाच- त एवैत.दन्न मवोचं-स्त इम एषु कुरु.पञ्चाले.ष्वङ्गमगधेषु- काशि कोसलेषु- शाल्व-मत्स्येषु, शवसोशीनरे.षूदीच्ये.ष्वन्न मदन्ती,त्यथ वय न्तवैवातिमानेनाऽनाद्यास्स्मो, वत्स वाहन मन्विच्छेति, स मान्धातु र्यौवनाश्वस्य सार्वभौमस्य राज्ञ स्सोमं प्रसूत माजगाम, स सदोऽनुप्रविश्यर्त्विजश्च यजमानञ्चाऽऽमन्त्रयामास, तद्याः प्राच्यो नद्यो वहन्ति, याश्च दक्षिणाच्यो- याश्च प्रतीच्यो- याश्च उदीच्य-स्ता स्सर्वाः पृथङ्नामधेयी रित्याचक्षते, तासां समुद्र मभिपद्यमानाना.ञ्छिद्यते नामधेयं, समुद्र इत्याचक्षत,-एवमिमे सर्वे वेदा निर्मिता- स्सकल्पा स्सरहस्या स्सब्राह्मणा स्सोपनिषत्का स्सेतिहासा स्सान्वाख्याना स्सपुराणा स्सस्वरा स्ससंस्कारा स्सनिरुक्ता स्सानुशासना स्सानुमार्जना स्सवाकोवाक्या- स्तेषाँ यज्ञ मभिपद्यमानाना ञ्छिद्यते नामधेयँ, यज्ञ इत्येवाऽऽचक्षते।। 2.10।।

2.11 भूमेर्ह वा एतद्विच्छिन्न न्देवयजनं य.दप्राक्प्रवणँ- य.दनुदक्प्रवणँ- यत्कृत्रिमँ- यत्सम विषम,मिदं ह त्वेव देवयजनँ-

यत्समं समूल मविदग्धं प्रतिष्ठितं प्रा.गुदक्प्रवणं समं समास्तीर्णमिव भवति, यत्र ब्राह्मणस्य ब्राह्मणताँ विद्याद्- ब्रह्मा ब्रह्मत्व.ङ्करोतीति, वोचे छन्द् स्तन्न विन्दामो येनोत्तर मेमहीति, तान् ह पप्रच्छ- किँ विद्वान् होता हौत्र.ङ्करोति, किँ विद्वा नध्वर्यु राध्वर्यव.ङ्करोति, किँ विद्वा नुद्गातौद्गात्र.ङ्करोति, किँ विद्वान्ब्रह्मा ब्रह्मत्व.ङ्करोतीति-वोचे छन्द् स्तन्न विन्दामो येनोत्तर मेमहीति, ते ब्रूमो - वागेव होता हौत्र.ङ्करोति- वाचो हि स्तोमाश्च वषट्काराश्चाभि संपद्यन्ते- ते ब्रूमो वागेव होता- वाग्ब्रह्म- वाग्देव इति, प्राणापानाभ्या मेवाध्वर्यु राध्वर्यव.ङ्करोति- प्राणप्रणीतानि ह भूतानि- प्राणप्रणीताः प्रणीतृस्ते ब्रूमः प्राणापानावे.वाध्वर्य्युः- प्राणापानौ ब्रह्म- प्राणापानौ देव इति, चक्षुषैवोद्गातौद्गात्र.ङ्करोति, चक्षुषा हीमानि भूतानि पश्य.न्त्यथो चक्षु रेवोद्गाता- चक्षु र्ब्रह्म- चक्षु र्देव इति, मनसैव ब्रह्मा ब्रह्मत्व ङ्करोति, मनसा हि तिर्यञ्च दिश ऊर्ध्वञ्च, यच्च किञ्च मनसैव करोति- तद्ब्रह्म, ते ब्रूमो- मन एव ब्रह्मा- मनो ब्रह्म- मनो देव इति।। 2.11।।

2.12 तद्यथा ह वा इदँ यजमानञ्च याजयितारश्च दिवं ब्रूयुः पृथिवीति, पृथिवीँ वा द्यौरिति ब्रूयु,स्तदन्यो नानुजाना- त्येता,मेव.न्नानुजानाति यदेतद्ब्रूया,दथ नु कथमिति, होतेत्येव होतारं

ब्रूया- द्वागिति वाचं, ब्रह्मेति ब्रह्म, देव इति देव,मध्वर्यु रित्येवाध्वर्य्युं ब्रूया,त्प्राणापानाविति प्राणापानौ- ब्रह्मेति ब्रह्म- देव इति देव-मुद्गाते.त्येवोद्गातारं ब्रूया,च्चक्षुरिति चक्षु- र्ब्रह्मेति ब्रह्म- देव इति देवं-ब्रह्मेत्येव ब्रह्माणं ब्रूया,न्मन इति मनो- ब्रह्मेति ब्रह्म- देव इति देवम्।। 2.12।।

2.13 नाना प्रवचनानि ह वा एतानि भूतानि भवन्ति, ये चैवाऽसोमपँ याजयन्ति- ये च सुरापँ- ये च ब्राह्मणँ विच्छिन्नं सोमयाजिन,न्तं प्रात स्समित्पाणय उपोदेयु- रुपाऽऽयामो भवन्तमिति, किमर्थमिति, यानेव नो भवां-स्तान् ह्यꣳ प्रश्ना नपृच्छ,त्तानेव नो भवा न्व्याचक्षीयेति- तथेति, तेभ्य एता न्प्रश्ना न्व्याचचष्टे, तद्येन ह वा इदँ विद्यमान ञ्चाविद्यमान ञ्चाभिनि दधाति- तद्ब्रह्म, तद्यो वेद स ब्राह्मणो-ऽधीयानो ऽधीतीत्याऽऽचक्षत इति ब्राह्मणम्।। 2.13।।

2.14 अथातो देवयजना,न्यात्मा देवयजनं- श्रद्धा देवयजन-मृत्विजो देवयजनं- भौम न्देवयजन- न्तद्वा एतदात्मा देवयजनँ-यदुपव्यायच्छमानो वाऽनुपव्यायच्छमानो वा शरीर मधिवस,त्येष यज्ञ- एष यजत- एतँ यजन्त- एतद्देवयजन,मथैतच्छ्रद्धा देवयजनँ-

यदैव कदाचि दादध्या- च्छ्रद्धा त्वेवैन न्नातीयात्-तद्देवयजन, -मथैत दृत्विजो देवयजनँ- यत्र क्वचि.द्व्राह्मणो विद्यावा न्मन्त्रेण करोति तद्देवयजन,मथैत द्धौम न्देवयजनँ- यत्राऽऽप स्तिष्ठन्ति- यत्र स्यन्दन्ति- प्र तद्वह.न्त्युद्वहन्ति तद्देवयजनँ, यत्समं समूल मविदग्धं प्रतिष्ठितं प्रागुद.क्प्रवणं समं समास्तीर्णमिव भवति- यस्य श्वभ्र ऊर्मि वृंक्षः पर्वतो नदी पन्था वा पुरस्ता.त्स्या,न्न देवयजनमात्रं पुरस्ता.त्पर्यवशिष्ये- न्नोत्तरतोऽग्नेः पर्युपसीदेर न्निति ब्राह्मणम्।। 2.14।।

2.15 अदितिर्वै प्रजाकामौदन मपच,त्तत उच्छिष्ट माश्नात्, सा गर्भ मधत्त, तत आदित्या अजायन्त, य एष ओदनः पच्यत आरम्भण मैवैतत्क्रियत आक्रमण मेव, प्रादेशमात्री स्समिधो भव- न्त्येतावान् ह्यात्मा प्रजापतिना सम्मितोऽग्नेर्वै या यज्ञिया तनू रश्वत्थे- तया समगच्छ.तैषा स्वधृत्या तनू र्यद्धृतं, यद्धृतेन समिधोऽनक्ति- ताभ्या मेवैनं तत्तनूभ्यां समर्धयति, यन्निर्मार्गस्याऽऽदधा- त्यवकृत्या वै वीर्यं.क्रियते, यन्निर्मार्गस्याऽऽदधा.त्यवकृत्या एव, सँवत्सरो वै प्रजनन- मग्निः प्रजनन, मेत त्प्रजननँ, यत्सँवत्सर ऋचाऽग्नौ समिध मादधाति- प्रजनना देवैन

न्तत्प्रजनयिता प्रजनय,त्यभक्तर्तुर्वै पुरुषो, न हि तद्वेद- यदर्तु मभिजायते, यन्नक्षत्र न्तदाप्नोति, य एष ओदनः पच्यते- योनि रेवैषा क्रियते, यत्समिध आधीयन्ते- रेत स्तद्ध्रियते, सँवत्सरो वै रेतो हितं प्र जायते, यस्सँवत्सरे पर्यैतेऽग्नि माधत्ते- प्रजापति रेवैन माधत्ते, द्वादशसु रात्रीषु पुरा सँवत्सरस्याऽऽधेया,त्ता हि सँवत्सरस्य प्रतिमा, अथो तिसृ.ष्वथो द्वयो- रथो पूर्वेद्यु राधेया,त्ते वा अग्नि मादधानेना,ऽऽदित्या वा इत उत्तमा अमुँ लोक आय,न्पथिरक्षय.स्त इयक्षमाणं प्रति नुदन्त,- उच्छेषणभाजा वा आदित्या- यदुच्छिष्टँ, यदुच्छिष्टेन समिधोऽनक्ति- तेभ्य एव प्रोवाच, तेभ्य एव प्रोच्य स्वर्गँ ल्लोकँ यन्ति।। 2.15।।

2.16 प्रजापति रथर्वा देव स्स तप स्तप्त्वैत.श्चातुष्प्राश्यं ब्रह्मौदनं निरमिमीत, चतुर्लोक.श्चतुर्देव.श्चतुर्वेद.श्चतुर्हौत्रमिति, चत्वारो वा इमे लोकाः- पृथिव्यन्तरिक्ष न्द्यौराप इति, चत्वारो वा इमे देवा- अग्नि र्वायु रादित्य श्चन्द्रमा,श्चत्वारो वा इमे वेदा- ऋग्वेदो यजुर्वेद स्सामवेदो ब्रह्मवेद इति, चतस्रो वा इमा होत्रा- हौत्र माध्वर्यव मौद्गात्रं ब्रह्मत्वमिति, तदप्येतदृचोक्तम्। चत्वारि॒ शृङ्गा॒ त्रयो॑ अस्य॒ पादा॒ द्वे शी॒र्षे स॒प्त हस्ता॑सो अस्य। त्रिधा॑ ब॒द्धो वृ॑ष॒भो रो॑रवीति म॒हो

देवो मर्त्या॰ आविवेशे-ति। चत्वारि शृङ्गेति वेदा वा एत उक्ता,स्त्रयो अस्य पादा इति सवनान्येव, द्वे शीर्षे इति ब्रह्मौदन-प्रवर्ग्या.वेव, सप्त हस्तासो अस्येति छन्दांस्येव, त्रिधा बद्ध इति मन्त्रः कल्पो ब्राह्मणँ, वृषभो रोरवीत्येष ह वै वृषभ- एष तद्रोरवीति- यद्यज्ञेषु शस्त्राणि शंस.न्त्यृग्भि र्यजुर्भि स्सामभि र्ब्रह्मभिरिति, महो देवो मर्त्या॰ आविवेशो-त्येष ह वै महा न्देवो यद्यज्ञ- एष मर्त्या॰ आविवेश, यो विद्या.त्सप्त प्रवत इति प्राणा.नाह, सप्त विद्या त्परावत इत्यपाना नाह, शिरो यज्ञस्य यो विद्या.दित्येतद्वै यज्ञस्य शिरो यन्मन्त्रवा.न्ब्रह्मौदनो, यो ह वा एत ममन्त्रवन्तं ब्रह्मौदन मुपेया-दपशिरसा ह वा अस्य यज्ञ मुपेतो भवति, तस्मा न्मन्त्रवन्तमेव ब्रह्मौदन मुपेया न्नामन्त्रवन्तमिति ब्राह्मणम्।। 2.16।।

2.17 किमुपयज्ञ आत्रेयो भवती,त्यादित्यं हि तमो जग्राह, तदत्रि रपनुनोद तदत्रि रन्वपश्य,त्तदप्येत दृचोक्तम्। स्तुताद्य मत्रि र्दिवं मुन्निनाय तन्त्वा पश्यन्ति परियान्त माजिम्। दिवि त्वाऽत्रि रधारय त्सूर्य्यामासाय कर्तव- इति। तं होवाच वरँ वृणीष्वेति, स होवाच दक्षिणीया मे प्रजा स्यादिति, तस्मा दात्रेयाय प्रथमा दक्षिणा यज्ञे दीयन्त इति ब्राह्मणम्।। 2.17।।

2.18 प्रजापति र्वेदा नुवाचा.ग्नी नादधीयेति, तान्वा.गभ्युवाचाश्वो वै सम्भाराणा मिति, तङ्घोरा.त्क्रूरा.त्सलिला,त्सरस उदानिन्यु,- स्तान्वा.गभ्युवाचाश्व श्शम्येतेति- तथेति, तमृग्वेद एत्योवाचाह मश्वं शमयेयमिति- तस्मा अविसृष्टाय महद्भयं ससृजे- स एतां प्राची न्दिशं भेजे- स होवाचाऽशान्तो न्वय मश्व इति, तँ यजुर्वेद एत्योवाचाह मश्वं शमयेयमिति- तस्मा अविसृष्टाय महद्भयं ससृजे- स एतां प्रतीची न्दिशं भेजे- स होवाचाशान्तो न्वय मश्व इति, तं सामवेद एत्योवाचाह मश्वं शमयेयमिति, केन नु त्वं शमयिष्यसीति, रथन्तर न्नाम मे सामाघोर.ञ्चाक्रूरञ्च तेनाश्व मभिष्टूयते- तस्मा अप्यविसृष्टाय तदेव महद्भयं ससृजे- स एता मुदीची न्दिशं भेजे, स होवाचाशान्तो न्वय मश्व इति, तान्वा.गभ्युवाच- शँयु माथर्वण.ङ्गच्छतेति, ते शँयु माथर्वण मासीनं प्राऽऽप्योचु- र्नमस्ते अस्तु भगव न्नश्वं शम्येतेति- तथेति, स खलु कबन्धस्याऽथर्वणस्य पुत्र मामन्त्रयामास- विचा 3 रिन्निति, भगो 3 इति हास्मै प्रतिश्रुतं, प्रतिशुश्रावाश्वं शम्येतेति- तथेति, स खलु शान्त्युदक ञ्चकाराऽऽथर्वणीभि श्चाऽऽङ्गिरसीभि श्चातनै र्मातृनामभि र्वास्तोष्पत्यैरिति शमयति, तस्य ह

स्नातस्याश्वस्याऽभ्युक्षितस्य सर्वेभ्यो रोम.शमरेभ्योऽङ्गारा अशीर्यन्त, सोऽश्व स्तुष्टो नमस्कार.ञ्चकार, नम श्शँयु माथर्वणाय- यो मा यज्ञ मचीक्लृपदिति, भविष्यन्ति ह वा अतोऽन्ये ब्राह्मणा लघुसम्भारतमा.स्त आदित्यस्य पद आधास्य-न्त्यनडुहो वत्सस्याजस्य श्रवणस्य ब्रह्मचारिणो वा,- एतद्वा आदित्यस्य पदँ यद्भूमि,स्तयैव पद आहितं भविष्यतीति, सोऽग्नौ प्रणीयमानेऽश्वेऽन्वारब्धं ब्रह्मा यजमानँ वाचयति- यदक्रन्दः प्रथम.ञ्जायमान इति पञ्च, तं ब्राह्मणा उपवहन्ति, तद्ब्रह्मोपाऽऽकुरुत,- एष ह वै विद्वा.न्त्सर्ववि द्ब्रह्मा यद्भृग्वङ्गिरोवि.दिति ब्राह्मणम्।। 2.18।।

2.19 देवाश्च ह वा असुराश्चास्पर्धन्त, ते देवा इन्द्र मब्रुव- न्निम न्न स्तावद्यज्ञं गोपाय, यावदसुरै स्सँयतामहा इति, स वै न.स्तेन रूपेण गोपाय, येन नो रूपेण भूयिष्ठ.ञ्छादयसि येन शक्ष्यसि गोप्तुमिति, स ऋग्वेदो भूत्वा पुरस्ता त्परीत्योपातिष्ठ,त्तन्देवा अब्रुव न्नन्य.त्तद्रूप.ङ्कुरुष्व- नैतेन नो रूपेण भूयिष्ठ.ञ्छादयसि- नैतेन शक्ष्यसि गोप्तुमिति, स यजुर्वेदो भूत्वा पश्चा.त्परीत्योपातिष्ठ,त्तन्देवा अब्रुव- न्नन्य.त्तद्रूप.ङ्कुरुष्व- नैतेन नो रूपेण भूयिष्ठ.ञ्छादयसि-

नैतेन शक्ष्यसि गोप्तुमिति, स सामवेदो भूत्वोत्तरत॰ परीत्योपातिष्ठ,त्तन्देवा अब्रुव.न्नन्य.देव तद्रूप.ङ्कुरुष्व- नैतेन नो रूपेण भूयिष्ठ.ञ्छादयसि- नैतेन शक्ष्यसि गोप्तुमिति, स इन्द्र उष्णीषी ब्रह्मवेदो भूत्वा दक्षिणत॰ परीत्योपातिष्ठ,त्तन्देवा अब्रुव-न्नेत.त्तद्रूप.ङ्कुरुष्वैतेन नो रूपेण भूयिष्ठ.ञ्छादय-स्येतेन शक्ष्यसि गोप्तुमिति, तद्यदिन्द्र उष्णीषी ब्रह्मवेदो भूत्वा दक्षिणत॰ परीत्योपातिष्ठ-त्तद्ब्रह्माऽभव,त्तद्ब्रह्मणो ब्रह्मत्व,न्तद्वा एत दथर्वणो रूपँ- यदुष्णीषी ब्रह्मा, तन्दक्षिणतो विश्वे देवा उपाऽऽसीरं.स्तँ यद्दक्षिणतो विश्वे देवा उपाऽऽसीरं-स्तत्सदस्योऽभव,-त्तत्सदस्यस्य सदस्यत्वं, बलेर्ह वा एतद्बल मुप जायते, यत्सदस्य आमयतो वै व्रजस्य बहुलतरं व्रजँ विन्दन्ति, घोरा वा एषा दिग्दक्षिणा- शान्ता इतरा,स्तद्यानि स्तुतानि ब्रह्माऽनुमन्त्रयते, मनसैव तानि सदस्यो जन.दित्येताँ व्याहृति.ञ्जप.त्यात्मान.ञ्जनयति, न जित्याऽऽत्मान मपित्वे दधाति, तन्देवा अब्रुव न्वरँ वृणीष्वेति, वृणा '3' इति, स वर मवृणीतास्यामेव मां होत्राया मिन्द्रभूतं पुनन्त स्स्तुवन्त श्शंसन्त स्तिष्ठेयु रिति, तन्तस्या मेव होत्राया मिन्द्रभूतं पुनन्त स्स्तुवन्त श्शंसन्तोऽतिष्ठं- स्तँ यत्तस्यामेव होत्राया मिन्द्रभूतं पुनन्त

स्स्तुवन्त श्शंसन्तोऽतिष्ठँ- स्तद्ब्राह्मणाच्छंस्यभव,-त्तद्ब्राह्मणाच्छंसिनो ब्राह्मणाच्छंसित्वं, सैषैन्द्री होत्रा यद्ब्राह्मणाच्छंसीया, द्वितीयँ वरँ वृणीष्वेति- वृणा '3' इति, स वर मवृणीतास्यामेव मां होत्रायां वायुभूतं पुनन्त स्स्तुवन्त श्शंसन्त स्तिष्ठेयुरिति, तन्तस्यामेव होत्रायाँ वायुभूतं पुनन्त स्स्तुवन्त श्शसन्तोऽतिष्ठं,स्तँ यत्तस्यामेव होत्रायां वायुभूतं पुनन्त स्स्तुवन्त श्शंसन्तोऽतिष्ठं-स्तत्पोताऽभव,त्तत्पोतुः पोतृत्वं, सैषा वायव्या होत्रा यत्पोत्रीया, तृतीयँ वरँ वृणीष्वेति- वृणा '3' इति, स वर मवृणीतास्यामेव मां होत्राया मग्निभूत मिन्धानाः पुनन्त स्स्तुवन्त श्शंसन्त स्तिष्ठेयुरिति, तन्तस्यामेव होत्राया मग्निभूत मिन्धानाः पुनन्त स्स्तुवन्त श्शंसन्तोऽतिष्ठं- स्तँ यत्तस्यामेव होत्राया मग्निभूत मिन्धानाः पुनन्त स्स्तुवन्त श्शंसन्तोऽस्तिष्ठं-स्तदाग्नीध्रोऽभवत्, तदाग्नीध्रस्याऽऽग्नीध्रत्वं, सैषाऽऽग्नेयी होत्रा यदाग्नीध्रीयेति ब्राह्मणम्।। 2.19।।

2.20 ब्राह्मणो ह वा इद.मग्निँ वैश्वानरं बभार, सोऽयमग्नि वैंश्वानरो ब्राह्मणेन भ्रियमाण इमा न्लोकान् जनयते,ऽथाय मीक्षतेऽग्नि र्जातवेदा ब्राह्मणद्वितीयो ह वा अय मिद मग्नि वैंश्वानरो

ज्वलति, हन्ताहँ यन्मयि तेज इन्द्रियँ वीर्य न्तद्दर्शया.म्युत वै मा बिभ्रियादिति, स आत्मान माप्याय्यैतं पयोऽधो,त्तमिमं ब्राह्मण न्दर्शयित्वा ऽऽत्मन्यजुहो,त्स द्वितीय मात्मान माप्याय्यैत.ङ्घृत मधो,त्तमिमं ब्राह्मण न्दर्शयित्वा ऽऽत्मन्यजुहो,त्स तृतीय मात्मान माप्या.य्यैत.दिदँ विश्वँ विकृत मन्नाद्य मधो,त्तमिमं ब्राह्मणं दर्शयित्वा ऽऽत्मन्यजुहो,त्स चतुर्थ मात्मान माप्याय्यैतेन ब्राह्मणस्य जायाँ विराज मपश्य,त्तामस्मै प्रायच्छ,त्स आत्माऽपित्वमभव,त्तत इम मग्निँ वैश्वानरं परास्यु,-र्ब्राह्मणोऽग्निं जातवेदस मधत्त, सोऽय मब्रवी,दग्ने जातवेदो अभिनिधेहि मेहीति, तस्य द्वैतं नामाध.त्ताघोर.ञ्चाक्रूरञ्च, सोऽश्वोऽभव,त्तस्मादश्वो वहेत, रथेन पृष्ठेन सादिनं, स देवा.नाऽगच्छ,त्स देवेभ्योऽन्वतिष्ठ,त्तस्माद्देवा अबिभयु,स्तं ब्रह्मणे प्रायच्छ,त्तमेतयर्चाऽशमयत्।। 2.20।।
(वहेन, रथन्न भवति?)

2.21अग्नि न्त्वाहु वैश्वानरं सदना न्प्रदहन्वगाः। स नो देवत्राऽधिब्रूहि मा रिषामा वय न्तव - इति, तमेताभिः पञ्चभि र्ऋग्भि रुपाऽऽकुरुते- यदक्रन्दः प्रथम ञ्जायमान इति, सोऽशाम्य.त्तस्मादश्वः पशूनां जिघत्सुतमो भवति, वैश्वानरो ह्येष

तस्मा दग्निः पद मश्वं ब्रह्मणे ददाति, ब्रह्मणे हि प्रत्त,न्तस्य रस मपीडय,त्स रसोऽभव-द्रसो ह वा एष, तँ वा एतं रसं सन्तं रथ इत्याचक्षते परोऽक्षेण, परोऽक्षप्रिया इव हि देवा भवन्ति प्रत्यक्षद्विष,स्स देवानाऽगच्छ,त्स देवेभ्योऽन्वातिष्ठ,त्तस्मा द्देवा अबिभयु,स्तं ब्रह्मणे प्रायच्छ,न्तमेतयर्चा ऽऽज्याऽऽहुत्या ऽभ्यजुहो,- दिन्द्रस्यौजो मरुता मनीकमिति, रथ मभिहुत्वा- तमेतयर्चाऽतिष्ठद्- वनस्पते वीड्वङ्गो हि भूया- इति, तस्मादाग्न्याधेयिकं रथं ब्रह्मणे ददाति, ब्रह्मणे हि प्रत्तं, तस्य तक्षाण.स्तनूज्येष्ठा न्दक्षिणां निरमिमत, तां पश्चस्वपश्य दृचि यजुषि साम्नि शान्तेऽथ घोरे, तासा न्द्वे ब्रह्मणे प्रायच्छ-द्वाचञ्च ज्योतिश्च, वाग्वै धेनु- र्ज्योति र्हिरण्य,न्तस्मा दाग्न्याधेयिका.ञ्चातुष्प्राश्या न्धेनुं ब्रह्मणे ददाति, ब्रह्मणे हि प्रत्ता, पशुषु शाम्यमानेषु चक्षु र्हापयन्ति, चक्षुरेव तदात्मनि धत्ते, यद्वै चक्षु स्तद्धिरण्य,न्तस्मा दाग्न्याधेयिकं हिरण्यं ब्रह्मणे ददाति, ब्रह्मणे हि प्रत्तं, तस्याऽऽत्म न्नधत्त, तेन प्राज्वलय- द्यन्नाऽधत्त तदाग्लाऽभवत, तदाग्ला भूत्वा सा समुद्रं प्राविश,त्सा समुद्र मदह,त्तस्मा.त्समुद्रो दुर्गिरपि वैश्वानरेण हि दग्ध,स्सा पृथिवी मुदै,त्सा पृथिवीँ व्यदह,त्सा देवा नाऽगच्छ,त्सा देवा नहिड,त्ते देवा

ब्रह्माण मुपाधाव,न्थ्स नैवाँगाय-न्नानृत्य,त्सैषा ग्लैषा कारुविदा नाम, तँ वा एत माग्लाहतं सन्त माग्लागृध इत्याचक्षते परोऽक्षेण, परोऽक्षप्रिया इव हि देवा भवन्ति प्रत्यक्षद्विषो, य एष ब्राह्मणो गायनो वा नर्तनो वा भवति- तमाग्लागृध इत्याचक्षते, तस्माद्ब्राह्मणो नैव गायेन्न नृत्ये,त्तन्माऽऽग्लागृध स्स्या,त्तस्माद्ब्राह्म्यं पूर्वँ हवि- रपरं प्राजापत्यं, प्राजापत्या.द्ब्राह्मण मेवोत्तममिति ब्राह्मणम्।। 2.21।।

2.22 अथर्वाणश्च ह वा अङ्गिरसश्च भृगुचक्षुषी, तद्ब्रह्माभि व्यपश्यं -स्तदजानन्, वयँ वा इदं सर्वँ यद्भृग्वङ्गिरस इति, ते देवा ब्राह्म्यं हवि र्यत्सान्तपनेऽग्ना.वजुहवु, -रेतद्वै ब्राह्म्यं हवि र्यत्सान्तपनेऽग्नौ हूयत,- एष ह वै सान्तपनोऽग्नि र्यद्ब्राह्मण,स्तस्योर्जयोर्जा न्देवा अभजन्त, सुमनस एव स्वधां पितर,श्श्रद्धया स्वर्गँ लोकं ब्राह्मणा स्तेन सुन्व,न्त्यृषयोऽन्तत,स्स्त्रियः केवल आत्म.न्यवारुन्धत, वाह्या उभयेन सुन्वन्ति, यद्वै यज्ञे ब्राह्म्यं हवि र्निरुप्येताऽनृजवः प्रजापत्यहविषो मनुष्या जायेर,न्नसौ यान्लोकान्श्शृण्विति पिता ह्येष आहवनीयस्य गार्हपत्यस्य दक्षिणाग्ने र्योऽग्निहोत्र.ञ्जुहोतीति, देवा

प्रिये धामनि मदन्ति, तेषामेषोऽग्नि स्सान्तपन.श्श्रेष्ठो भव,त्येतस्य वाचि तृप्ताया मग्नि स्तृप्यति, प्राणे तृप्ते वायु स्तृप्यति, चक्षुषि तृप्त आदित्य स्तृप्यति, मनसि तृप्ते चन्द्रमा स्तृप्यति, श्रोत्रे तृप्ते दिश श्चान्तर्देशाश्च तृप्यन्ति, स्नेहेषु तृप्तेष्वाप स्तृप्यन्ति, लोमसु तृप्तेष्वोषधि-वनस्पतय स्तृप्यन्ति, शरीरे तृप्ते पृथिवी तृप्य,त्येव मेषोऽग्नि स्सान्तपन श्श्रेष्ठ स्तृप्त स्सर्वां स्तृप्तां-स्तर्पयतीति ब्राह्मणम्।। 2.22।।

2.23 सान्तपना इदं हवि-रित्येष ह वै सान्तपनोऽग्नि र्यद्ब्राह्मणो, यस्य गर्भाऽऽधान पुंसवन सीमन्तोन्नयन जातकर्म नामकरण निष्क्रमणान्नप्राशन गोदान चूडाकरणोपनयन प्लावना.ग्निहोत्र व्रतचर्य्याऽऽदीनि कृतानि भवन्ति- स सान्तपनो,ऽथ योऽय मनग्निक स्स कुम्भे लोष्ट,स्तद्यथा कुम्भे लोष्टः प्रक्षिप्तो नैव शौचार्थाय कल्पते- नैव शस्यं निर्वर्तय-त्येवमेवायं ब्राह्मणोऽनग्निक,स्तस्य ब्राह्मणस्यानग्निकस्य नैव दैव न्दद्या- न्न पित्र्य- न्न चास्य स्वाध्यायाऽऽशिषो, न यज्ञ आशिष स्स्वर्गङ्गमा भवन्ति, तदप्येतदृचोक्तम्। अ॒ग्नि न्दू॒तँ वृ॑णीमहे॒ होता॑रँ वि॒श्ववे॑दसम्। अ॒स्य य॒ज्ञस्य॑ सु॒क्रतु॑म् - इति ब्राह्मणम्।। 2.23।।

अथ ह प्रजापति स्सोमेन यक्ष्यमाणो वेदा नुवाच, कँ वो होतारँ वृणीया,-ङ्कमध्वर्यु,-ङ्कमुद्गातार,ङ्कं ब्रह्माणमिति, त ऊचु- र्ऋग्विदमेव होतारँ वृणीष्व, यजुर्विद मध्वर्य्युं, सामविद मुद्गातार मथर्वाङ्गिरोविदं ब्रह्माण,न्तथा हास्य यज्ञ श्चतुर्षु लोकेषु चतुर्षु देवेषु चतुर्षु वेदेषु चतसृषु होत्रासु चतुष्पा.द्यज्ञः प्रतितिष्ठति, प्रति तिष्ठति प्रजया पशुभि र्य एवँ वेद, तस्मा दृग्विदमेव होतारँ वृणीष्व, स हि हौत्रँ वेदाग्निर्वै होता, पृथिवी वा ऋचा मायतन- मग्नि र्देवता- गायत्र.ञ्छन्दो- भूरिति शुक्र,न्तस्मा त्तमेव होतारँ वृणीष्वे-त्येतस्य लोकस्य जितय- एतस्य लोकस्य विजितय- एतस्य लोकस्य सञ्जितय- एतस्य लोकस्यावरुद्ध्य- एतस्य लोकस्य विवृद्ध्य- एतस्य लोकस्य समृद्ध्य- एतस्य लोकस्योदात्तय- एतस्य लोकस्य व्याप्तय- एतस्य लोकस्य पर्य्याप्तय- एतस्य लोकस्य समाप्तये,ऽथ चे.न्नैवँविदं होतारँ वृणुते, पुरस्ता देवैषाँ यज्ञो रिच्यते, यजुर्विद मेवाध्वर्य्युँ वृणीष्व- स ह्याध्वर्यवँ वेद, वायुर्वा अध्वर्यु- रन्तरिक्षँ वै यजुषा.मायतनँ- वायु र्देवता- त्रैष्टुभ.ञ्छन्दो- भुव इति शुक्र- न्तस्मा त्तमेवाध्वर्य्युँ वृणीष्वे-त्येतस्य लोकस्य जितय- एतस्य लोकस्य विजितय- एतस्य लोकस्य सञ्जितय- एतस्य लोकस्यावरुद्ध्य-

एतस्य लोकस्य विवृद्ध्य- एतस्य लोकस्य समृद्ध्य- एतस्य लोकस्योदात्तय- एतस्य लोकस्य व्याप्तय- एतस्य लोकस्य पर्य्याप्तय- एतस्य लोकस्य समाप्तये-ऽथ चे.न्नैवँविद मध्वर्य्युँ वृणुते- पश्चादेवैषाँ यज्ञो रिच्यते, सामविद मेवोद्गातारँ वृणीष्व- स ह्यौद्गात्रँ वेदा-ऽऽदित्यो वा उद्गाता- द्यौर्वै साम्ना मायतन- मादित्यो देवता- जागत.ञ्छन्द- स्स्वरिति शुक्र- न्तस्मा त्तमेवोद्गातारँ वृणीष्वे.त्येतस्य लोकस्य जितय- एतस्य लोकस्य विजितय- एतस्य लोकस्य सञ्जितय- एतस्य लोकस्यावरुद्ध्य- एतस्य लोकस्य विवृद्ध्य- एतस्य लोकस्य समृद्ध्य- एतस्य लोकस्योदात्तय- एतस्य लोकस्य व्याप्तय- एतस्य लोकस्य पर्य्याप्तय- एतस्य लोकस्य समाप्तये,ऽथ चे.न्नैवँविद मुद्गातारँ वृणुत- उत्तरत एवैषाँ यज्ञो रिच्यते,ऽथर्वाङ्गिरो.विदमेव ब्रह्माणँ वृणीष्व, स हि ब्रह्मत्वँ वेद- चन्द्रमा वै ब्रह्मा- ऽऽपो वै भृग्वङ्गिरसा मायतन-ञ्चन्द्रमा देवता वैद्युत- श्चोष्णि.क्काकुभे छन्दसी -ओमित्यथर्वणां शुक्र- ञ्जन.दित्यङ्गिरसा,- न्तस्मात्तमेव ब्रह्माणँ वृणीष्वे- त्येतस्य लोकस्य जितय-एतस्य लोकस्य विजितय- एतस्य लोकस्य सञ्जितय- एतस्य लोकस्यावरुद्ध्य- एतस्य लोकस्य विवृद्ध्य- एतस्य लोकस्य

समृद्धय- एतस्य लोकस्योदात्तय- एतस्य लोकस्य व्याप्तय- एतस्य लोकस्य पर्य्याप्तय- एतस्य लोकस्य समाप्तये,ऽथ चे.न्नैवँविदं ब्रह्माणँ वृणुते, दक्षिणत एवैषाँ यज्ञो रिच्यते- दक्षिणत एवैषाँ यज्ञो रिच्यते।। 24।। इति अथर्ववेदे गोपथब्राह्मणपूर्वभागे द्वितीयः प्रपाठकः

पूर्वार्धे तृतीयः प्रपाठकः

3.1 दक्षिणाप्रवणा भूमि,र्दक्षिणत आपो वहन्ति, तस्माद्यज्ञा स्तद्भूमे रुन्नततर मिव भवति- यत्र भृग्वङ्गिरसो विष्ठा,स्तद्यथा आप इमा न्लोका नभिवह.न्त्येवमेव भृग्वङ्गिरस स्सर्वा न्देवा नभिवह.न्त्येव.मेवैषा व्याहृति स्सर्वान् वेदा नभिवह,त्यो 3 मिति हर्चा,मो 3 मिति यजुषा,मो 3 मिति साम्ना,मो 3 मिति सर्वस्याहाभिवाद,स्तं ह स्मैतदुत्तरँ यज्ञे विद्वांसः कुर्वन्ति, देवा ब्रह्माण आगच्छताऽऽगच्छते-त्येते वै देवा ब्रह्माणो यद्भृग्वङ्गिरस- स्तानेवैत द्वृणानां-स्तान्वृणाना ह्वयन्तो मन्यन्ते, नान्यो भृग्वङ्गिरोवि.द्वृतो यज्ञ मागच्छन्, यज्ञस्य तेजसा तेज आप्नो त्यूर्जयोर्जाँ यशसा यशो, नान्यो भृग्वङ्गिरोवि.दवृतो यज्ञ मागच्छे- न्नेद्यज्ञं परिमुष्णीयादिति, तद्यथापूर्वँ वत्सोऽधीत्य गा न्धये- देवं

ब्रह्मा भृग्वङ्गिरोवि- दवृतो यज्ञ मागच्छे- न्नेद्यज्ञं परिमुष्णीयादिति, तद्यथा गौर्वाऽश्वो वाऽश्वतरो वैकपा.द्विपा.त्त्रिपादिति स्यात्, किमभिवहे. त्किमभ्यश्नुयादिति, तस्मा दृग्विद मेव होतारं वृणीष्व, यजुर्विद मध्वर्य्युं, सामविद मुद्गातार,मथर्वाङ्गिरोविदं ब्रह्माण,न्तथा हास्य यज्ञ श्चतुर्षु लोकेषु चतुर्षु देवेषु चतुर्षु वेदेषु चतसृषु होत्रासु चतुष्पा.द्यज्ञः प्रतितिष्ठति, प्रति तिष्ठति प्रजया पशुभि र्य एवँ वेद, यश्चैवमृत्विजा मार्त्विज्यँ वेद, यश्च यज्ञे यजनीयँ वेदेति ब्राह्मणम्।। 3.1।।

3.2 प्रजापति र्यज्ञ मतनुत, स ऋचैव हौत्र मकरो- द्यजुषाऽऽध्वर्यवं- साम्नौद्गात्र-मथर्वाङ्गिरोभि र्ब्रह्मत्व,न्तँ वा एतं महावाद्य.ङ्कुरुते, यदृचैव हौत्र मकरो- द्यजुषाऽऽध्वर्यवं- साम्नौद्गात्र-मथर्वाङ्गिरोभि र्ब्रह्मत्वं, स वा एष त्रिभि र्वेदै यज्ञस्यान्यतरः पक्ष स्संस्क्रियते, मनसैव ब्रह्मा यज्ञस्यान्यतरं पक्षं संस्करो- त्ययमु वै यः पवते, स यज्ञ स्तस्य मनश्च वाक्क वर्तनि,र्मनसा चैव हि वाचा च यज्ञो वर्तते,ऽद एव मन- इय मेव वाक्, स यद्वद न्नास्ति विद्या-दर्द्धं मेऽस्य यज्ञस्यान्त रगादिति, तद्यथैकपा.त्पुरुषो य.न्नेकचक्रो वा रथो वर्तमानो भ्रेष न्न्ये.त्येवमेवास्य यज्ञो भ्रेष.न्न्येति, यज्ञस्य भ्रेष

मनु यजमानो भ्रेष.न्न्येति, यजमानस्य भ्रेष मन्वृत्विजो भ्रेष.न्नियन्ति, ऋत्विजां भ्रेष मनु दक्षिणा भ्रेष.न्नियन्ति, दक्षिणानां भ्रेष मनु यजमानः पुत्रपशुभि र्भ्रेष.न्न्येति, पुत्रपशूनां भ्रेष मनु यजमान स्स्वर्गेण लोकेन भ्रेष.न्न्येति, स्वर्गस्य लोकस्य भ्रेष मनु तस्यार्धस्य योगक्षेमो भ्रेष.न्न्येति, यस्मिन्नर्द्धे यजन्त इति ब्राह्मणम्।। 3.2।।

3.3 तदु ह स्माऽऽह श्वेतकेतु रारुणेयो ब्रह्माण न्दृष्ट्वा भाषमाण-मर्द्धं मेऽस्य यज्ञस्यान्त रगादिति, तस्माद्ब्रह्मा स्तुते बहिष्पवमाने वाचोयम्य? मुपांश्वन्तर्य्यामाभ्या,मथ ये पवमान उदूचु-स्तेष्वथ यानि च स्तोत्राणि च शस्त्रा.ण्यावषट्कारा,त्तेषु स य.दृक्तो भ्रेष.न्नियच्छे-दों भू र्जनदिति गार्हपत्ये जुहुयाद्, यदि यजुष्ट- ओं भुवो जन दिति दक्षिणाग्नौ जुहुयाद्, यदि सामत- ओं स्व-र्जन-दित्याहवनीये जुहुयाद्, यद्यनाज्ञाता ब्रह्मत- ओं भूर्भुव.स्स्व-र्जन-दोमित्याहवनीय एव जुहुयात्, तद्वाको वाक्यस्यर्च्चाँ यजुषां साम्ना मथर्वाङ्गिरसा,मथापि वेदानां रसेन यज्ञस्य विरिष्टं सन्धीयते, तद्यथा लवणेनेत्युक्त,न्तद्यथोभयपा.त्पुरुषो य.न्नुभयचक्रो वा रथो वर्तमानो ऽभ्रेषं.न्येत्येव.मेवास्य यज्ञोऽभ्रेष.न्न्येति, यज्ञस्याभ्रेषमनु

यजमानोऽभ्रेष.न्न्येति, यजमानस्याभ्रेष.मन्वृत्विजोऽभ्रेष न्नियन्ति, ऋत्विजा मभ्रेष मनु दक्षिणा अभ्रेष.न्नियन्ति, दक्षिणाना मभ्रेष मनु यजमानः पुत्रपशुभि रभ्रेष.न्न्येति, पुत्रपशूना मभ्रेष मनु यजमान स्स्वर्गेण लोकेनाभ्रेष.न्न्येति, स्वर्गस्य लोकस्याभ्रेष मनु तस्यार्धस्य योगक्षेमोऽभ्रेष.न्न्येति, यस्मि न्नर्द्धे यजन्त इति ब्राह्मणम्।। 3.3।।

3.4 तद्यदौदुम्बर्य्यां.न्म आसिष्ट, हिङ्कार्षी.न्मे प्रास्तावी न्म उदगासी.न्मे सुब्रह्मण्या माह्वासी दित्युद्गात्रे दक्षिणा नीयन्ते, ग्रहान्मेऽग्रहीत् प्राचारीन्मे ऽशुश्रुवन्मे समनस्कार्षी दयाक्षी (न्मेऽशांसी) न्मेऽवषट्कार्षी न्म इत्यध्वर्यवे, होतृषदन आसिष्टा.ऽयाक्षीन्मे ऽशांसीन्मे वषट्कार्षीन्म इति होत्रे, देवयजनं मेऽचीक्लृपद्- ब्रह्माऽऽसादं मेऽसीसृपद्- ब्रह्मजपान्मेऽजपीत्- पुरस्ता द्धोमसंस्थितहोमा न्मेऽहौषी -दयाक्षीन्मे ऽशांसीन्मे वषट्कार्षीन्म इति ब्रह्मणे, भूयिष्ठेन मा ब्रह्मणाऽऽकार्षी- दित्येतद्धै भूयिष्ठं ब्रह्म- यद्भृग्वङ्गिरसो- येऽङ्गिरसो- येऽङ्गिरस स्स रसो, येऽथर्वाणो येऽथर्वाण स्तद्भेषजं, यद्भेषज न्तदमृतँ, यदमृत न्तद्ब्रह्म, स वा एष पूर्वेषा मृत्विजा मर्धभागस्यार्ध मितरेषा मर्द्धं ब्रह्मण इति ब्राह्मणम्।। 3.4।। (हिङ्कृणोन्मे)

3.5 देवाश्च ह वा असुराश्च सङ्ग्रामं समयतन्त, तत्रैता स्तिस्रो होत्रका जिह्मं प्रतिपेदिरे, तासा मिन्द्र उक्थानि सामानि लुलोप, तानि होत्रे प्रायच्छ- दाज्यं ह वै होतु र्बभूव- प्रउगं पोतु, वैश्वदेवं ह वै होतु र्बभूव- निष्केवल्यं नेष्टु, र्मरुत्वतीयं ह वै होतु र्बभूवा-ऽग्निमारुत माग्नीध्रस्य, तस्मादेत दभ्यस्ततर मिव शस्यते- यदाग्निमारुतँ, यस्मादेते संशंसुका इव भवन्ति यद्धोता पोता नेष्टाऽग्नीध्रो, मुमोहे वसीत, तद्ब्रह्मेयसामि वाऽस, तासा मर्द्धं प्रति लुलोप, प्रथमार्हणञ्च प्रथमपदञ्चैत द्दक्षिणाञ्चैत त्परिशिषे.देदिति ब्राह्मणम्।। 3.5।।

3.6 उद्दालको ह वा आरुणि रुदीच्या.न्वृतो धावयाञ्चकार, तस्य ह निष्क उपाऽहितो बभू,वोपवादा द्बिभ्यतो- यो मा ब्राह्मणोऽनूचान उपवदिष्यति- तस्मा एतं प्रदास्यामीति, तद्धोदीच्यान् ब्राह्मणा न्भयं विवेदो-द्दालको ह वा अय मायाति- कौरुपाञ्चालो ब्रह्मा ब्रह्मपुत्र,स्स ऊर्ध्वँ वृतो न पर्यादधीत, केनेमँ वीरेण प्रति सँयतामहा इति, तँ यत एव प्रपन्न न्दध्रे, तत एव.मनु प्रतिपेदिरे, ते ह स्वैदायनं शौनक मूचु- स्स्वैदायन- त्वँ वै नो ब्रह्मिष्ठोऽसीति, त्वयेमँ वीरेण प्रति सँयतामहा इति, तँ यत एव

प्रपन्न न्दध्रे, तत एव.मनु प्रति पेदिरे, तं ह स्वैदायना ‘3‘ इत्यामन्त्रयामास, स ह गोतमस्य पुत्रेतीति हास्मा असूयाप्रतिश्रुतं प्रतिशुश्राव, स वै गोतमस्य पुत्र ऊर्द्धं वृतोऽधावीत्।। 3.6।।

3.7 यस्तद्दर्शपूर्णामासयो रूपँ विद्या-त्कस्मादिमाः प्रजा शिरस्तः प्रथमं लोमशा जायन्ते- कस्मा दासा मपरमिव श्मश्रू.ण्युपकक्षा.ण्यन्यानि लोमानि जायन्ते, यस्तद्दर्शपूर्णमासयो रूपँ विद्या त्कस्मा दिमाः प्रजा शिरस्तः प्रथमं पलिता भवन्ति- कस्मा दन्तत स्सर्वा एव पलिता भवन्ति, यस्तद्दर्शपूर्णमासयो रूपँ विद्या त्कस्मा दिमाः प्रजा अदन्तिका जायन्ते- कस्मा दासा मपरमिव जायन्ते, यस्तद्दर्शपूर्णमासयो रूपँ विद्या त्कस्मा दासां सप्तवर्षाष्टवर्षाणां प्रभिद्यन्ते- कस्मादासां पुनरेव जायन्ते- कस्मा दन्तत स्सर्व एव प्रभिद्यन्ते, यस्तद्दर्शपूर्णमासयो रूपँ विद्या त्कस्मा दधरे दन्ताः पूर्वे जायन्ते- ऽपर उत्तरे, यस्तद्दर्शपूर्णमासयो रूपँ विद्या त्कस्मा दधरे दन्ता अणीयांसो ह्रसीयांसः प्रथीयांसो- वर्षीयांस उत्तरे, यस्तद्दर्शपूर्णमासयो रूपँ विद्या त्कस्मादिमौ दंष्ट्रौ दीर्घतरौ- कस्मा.त्समे इव जम्भे, यस्तद्दर्शपूर्णमासयो रूपँ विद्या-त्कस्मादिमे श्रोत्रेऽन्तत स्समे इव दीर्णे, यस्तद्दर्शपूर्णमासयो रूपँ

विद्या- त्कस्मात्पुमांस श्श्मश्रुवन्तोऽश्मश्रुव स्स्त्रियो, यस्तद्दर्शपूर्णमासयो रूपँ विद्या- त्कस्मादासां सन्ततमिव शरीरं भवति- कस्मादासा मस्थीनि दृढतराणीव भवन्ति, यस्तद्दर्शपूर्णमासयो रूपँ विद्या- त्कस्मादासां प्रथमे वयसि रेत स्सिक्त.न्न सम्भवति- कस्मादासां मध्यमे वयसि रेत स्सिक्तं सम्भवति- कस्मा दासा मुत्तमे वयसि रेत स्सिक्तन्न सम्भवति, यस्तद्दर्शपूर्णमासयो रूपँ विद्या- त्कस्मादिदं शिश्न मुच्चश एति नीचीपद्यते, कस्मा त्सकृदपानम्।। 3.7।।

3.8 अथ य॰ पुरस्ता दष्टा.वाज्यभागान् विद्या,न्मध्यत॰ पञ्च हविर्भागा,ष्वद्वाजापत्या उपरिष्टा दष्टा.वाज्यभागान् विद्या.दथ यो गायत्रीं हरिणी.ञ्ज्योतिष्पक्षां सर्वै र्यज्ञै र्यजमानं स्वर्गँ लोक मभिवहन्तीँ विद्या,दथ य॰ पङ्क्तिं पञ्चपदां सप्तदशाक्षरां सर्वै र्यज्ञै र्यजमानं स्वर्गँ लोक मभिवहन्तीँ विद्यात्,तस्मै ह निष्कं प्रयच्छ.न्नुवाचानूचानो ह वै स्वैदायन- ससुवर्णँ वै सुवर्णविदे ददामीति, तदुपयम्य निश्चक्राम- तत्रापव्रज- यत्रेतरो बभूव, तं ह पप्रच्छ- किमेष गोतमस्य पुत्र इ-त्येष ब्रह्मा- ब्रह्मपुत्र इति होवाच, यदेनङ्क्ष्वि दुपवदेतोत मीमांसेत ह वा मूर्द्धा वा अस्य विपतेत्, प्राणा

वैन.ञ्ह्युरिति, ते मिथ एव चिक्रन्देयु, र्विप्रापव्रज- यत्रेतरो बभूव, ते प्रात स्समित्पाणय उपोदेयु- रुपाऽऽयामो भवन्तमिति- किमर्थमिति, यानेव नो भवां-स्तां ह्यप्रश्ना नपृच्छ- त्तानेव नो भवा न्व्याचक्षीतेति- तथेति, तेभ्य एता न्प्रश्ना न्व्याचष्टे।। 3.8।।

3.9 यत्पुरस्ता द्वेदेः प्रथमं बर्हिस्स्तृणाति- तस्मादिमाः प्रजा श्शिरस्तः प्रथमँ लोमशा जायन्ते, यदपरमिव प्रस्तर मनुस्तृणाति- तस्मादासा मपरमिव श्मश्रूण्युपकक्षा.ण्यन्यानि लोमानि जायन्ते, यत्प्राग्बर्हिषः प्रस्तर मनुप्रहरति तस्मादिमाः प्रजा श्शिरस्तः प्रथमं पलिता भवन्ति, यदन्तत स्सर्वमेवानु प्रहरति- तस्मादन्तत स्सर्वा एव पलिता भवन्ति, यत्प्रयाजा अपुरोऽनुवाक्यावन्तो भवन्ति- तस्मादिमाः प्रजा अदन्तिका जायन्ते, यद्धवींषि पुरोऽनुवाक्यावन्ति भवन्ति- तस्मादासा मपरमिव जायन्ते, यदनुयाजा अपुरोऽनुवाक्यावन्तो भवन्ति- तस्मादासां सप्तवर्षाष्टवर्षाणां प्रभिद्यन्ते, यत्पत्नीसँयाजाः पुरोऽनुवाक्यावन्तो भवन्ति- तस्मादासां पुनरेव जायन्ते, यत्समिष्टयजु रपुरोऽनुवाक्याव द्भवति- तस्मादन्तत स्सर्व एव प्रभिद्यन्ते, यद्गायत्र्याऽनूच्य त्रिष्टुभा यजति- तस्मा.दधरे दन्ताः पूर्वे जायन्ते ऽपर उत्तरे, यदृचाऽनूच्य

यजुषा यजति- तस्माद्धरे दन्ता अणीयांसो ह्रसीयांसः प्रथीयांसो वर्षीयांस उत्तरे, यदाघारौ दीर्घतरौ प्राञ्चा.वाघारयति- तस्मादिमौ दंष्ट्रौ दीर्घतरौ, यत्सँयाज्ये सञ्छन्दसी - तस्मात्समे इव जम्भे, यश्चतुर्थे प्रयाजे समानयति- तस्मादिमे श्रोत्रे अन्तत स्समे इव दीर्णे, यज्जप.ञ्जपित्वाऽभि हिङ्कृणोति- तस्मात्पुमांस श्श्मश्रुवन्तोऽश्मश्रुव स्स्त्रियो, यत्सामिधेनी स्सन्तन्व न्नाह- तस्मादासां सन्ततमिव शरीरं भवति, यत्सामिधेन्यः काष्ठहविषो भवन्ति- तस्मा दासा मस्थीनि दृढतराणीव भवन्ति, यत्प्रयाजा आज्यहविषो भवन्ति- तस्मादासां प्रथमे वयसि रेत स्सिक्त.न्न सम्भवति, यन्मध्ये हविषा न्दध्ना च पुरोडाशेन च प्रचरन्ति- तस्मा दासां मध्यमे वयसि रेत स्सिक्तं सम्भवति, यदनुयाजा आज्यहविषो भवन्ति- तस्मादासा मुत्तमे वयसि रेत स्सिक्त.न्न सम्भवति, यदुत्तमेऽनुयाजे सकृदपानिति- तस्मादिदं शिश्न मुच्चश एति- नीचीपद्यते, यन्नापानेत्- सकृच्छूनं स्या,द्यन्मुहु रपानेत्- सकृत्यन्नं स्यात्, तस्मा.त्सकृदपानिति- नेत्सकृच्छूनं स्यात्सकृच्छूनँ वेति।। 3.9।।

3.10 अथ ये पुरस्ता दष्टा.वाज्यभागाः- पञ्च प्रयाजा- द्वावाघारौ- द्वा.वाज्यभागा- वाग्नेया- आज्यभागानां प्रथम स्सौम्यो

द्वितीयो हविर्भागानां, हविर्ह्येव सौम्य,माग्नेयः पुरोडाशोऽग्नीषोमीय उपांशुयाजोऽग्नीषोमीयः पुरोडाशोऽग्नि स्स्विष्टकृदि-त्येते मध्यतः पञ्च हविर्भागा, अथ ये षड्प्राजपत्या इडा च प्राशित्रञ्च यच्चाऽऽग्नीध्रीयाऽवद्यति- ब्रह्मभागो यजमानभागोऽन्वाहार्य एव षष्ठो,ऽथ य उपरिष्टा दष्टा.वाज्यभागा- स्त्रयोऽनुयाजा- श्चत्वारः पत्नीसँयाजा- स्समिष्टयजु रष्टम,मथ या गायत्री हरिणी ज्योतिष्पक्षा- सर्वैं र्यज्ञै र्यजमानं स्वर्गँ लोक मभि वहति- वेदिरेव सा, तस्य ये पुरस्ता दष्टा.वाज्यभागा- स्स दक्षिणः पक्षो,ऽथ य उपरिष्टा दष्टा.वाज्यभागा- स्स उत्तरः पक्षो, हवींष्यात्मा, गार्हपत्यो जघन- माहवनीय श्शिर- स्सौवर्ण.राजतौ पक्षौ, तद्य.दादित्यं पुरस्ता त्पर्यन्त.न्न पश्यन्ति तस्मा.दज्योतिष्क उत्तरो भव,त्यथ या पङ्क्तिः पञ्चपदा सप्तदशाक्षरा सर्वैं र्यज्ञै र्यजमानं स्वर्गँ लोक मभिवहति- याज्यैव सा, तस्या ओम् आश्रावयेति चतुरक्षर,मस्तु श्रौषडिति चतुरक्षरँ, यजेति द्व्यक्षरँ, ये यजामह इति पञ्चाक्षर,न्द्व्यक्षरो वषट्कार, स्सैषा पङ्क्तिः पञ्चपदा सप्तदशाक्षरा- सर्वैं र्यज्ञै र्यजमानं स्वर्गँ लोक मभि वहति, तद्यत्रास्यैश्वर्य्यं स्याद्, यत्र वैन मभिवहेयु-

रेवँविद् मेव तत्र ब्रह्माणँ वृणीया- न्नानेवँविद्.मिति ब्राह्मणम्।।
10।।

3.11 अथ ह प्राचीनयोग्य आजगा.माग्निहोत्रं भवन्तं पृच्छे.द्गोतम इति, पृच्छ प्राचीनयोग्येति,ङ्किन्देवत्य.न्ते गवीडाया,ङ्किन्देवत्य मुपहृताया,ङ्किन्देवत्य मुपसृष्टाया,ङ्किन्देवत्यँ वत्स मुन्नीयमान,ङ्किन्देवत्यँ वत्स मुन्नीत,ङ्किन्देवत्य न्दुह्यमान,ङ्किन्देवत्य न्दुग्ध,ङ्किन्देवत्यं प्रक्रम्यमाण,ङ्किन्देवत्यं ह्रियमाण,ङ्किन्देवत्य मधिश्रीयमाण,ङ्किन्देवत्य मधिश्रित,ङ्किन्देवत्य मभ्यवज्वाल्यमान,ङ्किन्देवत्य मभ्यवज्वालित, -ङ्किन्देवत्यं समुद्वान्त,ङ्किन्देवत्यं विष्यन्न,ङ्किन्देवत्य मद्भिः प्रत्यानीत,ङ्किन्देवत्य मुद्वास्यमान,ङ्किन्देवत्य मुद्वासित,ङ्किन्देवत्य मुन्नीयमान,ङ्किन्देवत्य मुन्नीत,ङ्किन्देवत्यं प्रक्रम्यमाण,ङ्किन्देवत्यं ह्रियमाण,ङ्किन्देवत्य मुपसाद्यमान,ङ्किन्देवत्य मुपसादित,ङ्किन्देवत्या समित्,किन्देवत्यां प्रथमा माहुति महौषीः, किन्देवत्य.ङ्गार्हपत्य मवेक्षिष्ठाः, किन्देवत्योत्तराऽऽहुतिः, किन्देवत्यं हुत्वा स्रुचन्निरुदञ्च मुन्नैषीः, किन्देवत्यं बर्हिषि स्रुच न्निधायोन्मृज्योत्तरतः पाणी निर्मार्क्षीः, किन्देवत्य न्द्वितीय मुन्मृज्य पित्र्युपवीत.ङ्कृत्वा दक्षिणतः पितृभ्य

स्स्वधा मकार्षीः, किन्देवत्यं प्रथमं प्राऽऽशीः, किन्देवत्य न्द्धितीय,ङ्किन्देवत्य मन्तत स्सर्व मेव प्राऽऽशीः, किन्देवत्य मप्रक्षालितयोदकं स्त्रुचा न्यनैषीः, किन्देवत्यं प्रक्षालितया, किन्देवत्य मपरेणाऽऽहवनीय मुदकं स्त्रुचा न्यनैषीः, किन्देवत्यं स्त्रुवं स्त्रुचञ्च प्रत्यताप्सीः, किन्देवत्यं रात्रौ स्त्रुग्दण्ड मवमार्क्षीः, किन्देवत्यं प्रात रुन्मार्क्षी- रित्येतच्चे.द्वेत्थ- गोतम हुतन्ते, यद्यु न वेत्थाहुतन्त इति ब्राह्मणम्।। 3.11।।

3.12 स होवाच, रौद्रं मे गवीडायां, मानव्य मुपहूतायाँ, वायव्य मुपसृष्टायाँ, वैराजँ वत्स मुन्नीयमान,ञ्जागत मुन्नीत,माश्विन न्दुह्यमानं, सौम्य न्दुग्धं, बार्हस्पत्यं प्रक्रम्यमाण,न्द्यावापृथिवीयं ह्रियमाण,माग्नेय मधिश्रीयमाणँ, वैश्वानरीय मधिश्रितँ, वैष्णव मभ्यवज्वाल्यमानं, मारुत मभ्यवज्वालितं, पौष्णं समुद्वान्तँ, वारुणँ विष्यन्नं, सारस्वत मद्भिः प्रत्यानीत,न्त्वाष्ट्र मुद्वास्यमान,न्धात्र मुद्वासितँ, वैश्वदेव मुन्नीयमानं, सावित्र मुन्नीतं, बार्हस्पत्यं प्रक्रम्यमाण,न्द्यावापृथिवीयं ह्रियमाण,मैन्द्र मुपसाद्यमानं, बलायोपसन्न,माग्नेयी समिद्, यां प्रथमा माहुति महौषं- मामेव तत्स्वर्गे लोकेऽधाँ, यद्गार्हपत्य मवेक्षिष- मस्य लोकस्य सन्तत्यै,

प्राजापत्योत्तराऽऽहुति- स्तस्मा त्पूर्णतरा मनसैव सा, यद्धुत्वा स्त्रुच न्त्रिरुदञ्च.मुदनैषं- रुद्रां.स्तेनाप्रैषँ, यद्बर्हिर्षि स्त्रुच न्निधायोन्मृज्योत्तरतः पाणी निर्मार्क्ष- मोषधिवनस्पतीं.स्तेनाप्रैषँ, यद्द्वितीय मुन्मृज्य पित्र्युपवीत.ङ्कृत्वा दक्षिणतः पितृभ्य स्स्वधा मकार्षं- पितृं.स्तेनाप्रैषं, यत्प्रथमं प्राऽऽशिषं प्राणां.स्तेनाप्रैषं, यद्द्वितीयं- गर्भां.स्तेन- तस्मा दनश्नन्तो गर्भा जीवन्ति, यदन्तत स्सर्व मेव प्राऽऽशिषँ विश्वा न्देवां.स्तेनाप्रैषं, य.दप्रक्षालितयोदकं स्त्रुचा न्यनैषं- सर्पेतरजनां.स्तेनाप्रैषँ, यत्प्रक्षालितया- सर्पपुण्यजनां.स्तेन, यदपरेणा ऽऽहवनीय मुदकं स्त्रुचा न्यनैष- ङ्गन्धर्वाप्सरस स्तेनाप्रैषँ, यत्स्त्रुवं स्त्रुचञ्च प्रत्यताप्सं- सप्तऋषीं.स्तेनाप्रैषँ, यद्रात्रौ स्त्रुग्दण्ड मवमार्क्षं- ये रात्रौ सँविशन्ति दक्षिणां- स्तानुदनैषँ, यत्प्रात रुन्मार्क्षं- ये प्रातः प्रव्रजन्ति दक्षिणां- स्तानुदनैष-मिति ब्राह्मणम्।। 3.12।।

3.13 एवमेवैतद्- भो यथा भवा.नाह पृच्छामि त्वेव भवन्तमिति, पृच्छ प्राचीनयोग्येति, यस्य साय मग्नय उपसमाहिता स्स्यु- स्सर्वे ज्वलयेयुः, प्रक्षालितानि यज्ञपात्रा.ण्युपसन्नानि स्यु,रथ चेद्दक्षिणाग्नि रुद्वायात्, किँ वा ततो भय मागच्छेदिति, क्षिप्र मस्य पत्नी प्रैति-

योऽविद्वा न्जुहोति, विद्यया त्वेवाह मभि जुहोमीति, का ते विद्या का प्रायश्चित्ति रिति- गार्हपत्या दधि दक्षिणाग्निं प्रणीय- प्राचोऽङ्गारा नुद्धृत्य- प्राणापानाभ्यां स्वाहेति जुहुया,दथ प्रात र्यथास्थान मग्नी नुपसमाधाय यथापुर.ञ्जुहुयात्- सा मे विद्या सा प्रायश्चित्तिरि,त्यथ चेदाहवनीय उद्वायात्- किँ वा ततो भय मागच्छेदिति- क्षिप्र मस्य पुत्रः प्रैति योऽविद्वा न्जुहोति, विद्यया त्वेवाह मभि जुहोमीति, का ते विद्या का प्रायश्चित्तिरिति- गार्हपत्या दध्याहवनीयं प्रणीय- प्रतीचोऽङ्गारा नुद्धृत्य समानव्यानाभ्यां स्वाहेति जुहुया,दथ प्रात र्यथास्थान मग्नी नुपसमाधाय यथापुर.ञ्जुहुयात्, सा मे विद्या सा प्रायश्चित्तिरि,त्यथ चेद्गार्हपत्य उद्वायात्- किँ वा ततो भय मागच्छेदिति, क्षिप्र.ङ्गृहपतिः प्रैति- योऽविद्वा न्जुहोति, विद्यया त्वेवाह मभि जुहोमीति- का ते विद्या का प्रायश्चित्ति रिति, सभस्मक माहवनीय न्दक्षिणेन दक्षिणाग्निं परिहृत्य- गार्हपत्यस्याऽऽयतने प्रतिष्ठाप्य- तत आहवनीयं प्रणी,योदीचोऽङ्गारा नुद्धृत्योदानरूपाभ्यां स्वाहेति जुहुया,दथ प्रात र्यथास्थान मग्नी नुपसमाधाय यथापुर.ञ्जुहुयात्, सा मे विद्या सा प्रायश्चित्तिरि,त्यथ चेत्सर्वेऽग्नय उद्वायेयुः- किँ वा ततो भय मागच्छेदिति, क्षिप्र.ङ्गृहपति

स्सर्वज्यानि.ञ्जीयते- यो ऽविद्वा न्जुहोति, विद्यया त्वेवाह मभि जुहोमीति- का ते विद्या का प्रायश्चित्तिरि,त्यानडुहेन शकृत्पिण्डेना.ग्न्यायतनानि परिलिप्य- होम्य मुपसाद्याग्नि न्निर्मथ्य, प्राणापानाभ्यां स्वाहा समानव्यानाभ्यां स्वाहोदानरूपाभ्यां स्वाहेति जुहुया,दथ प्रात र्यथास्थान मग्नी नुपसमाधाय यथापुर.ञ्जुहुयात,सा मे विद्या सा प्रायश्चित्ति रि,त्यथ चेन्नाग्नि.ञ्जनयितुं शक्नुयु- र्न कुतश्चन वातो वायात्, किँ वा ततो भय मागच्छेदिति- मोघ मस्येष्टञ्च हुतञ्च भवति- यो ऽविद्वान्जुहोति, विद्यया त्वेवाह मभि जुहोमीति, का ते विद्या का प्रायश्चित्ति-रित्यानडुहेनैव शकृत्पिण्डेना.ग्न्यायतनानि परिलिप्य, होम्य मुपसाद्य- वात॒ आवा॑तु भेष॒जमिति॑ सूक्तेनाऽऽत्मन्येव जुहुया,दथ प्रातरग्नि न्निर्मथ्य यथास्थान मग्नी नुपसमाधाय, यथापुर.ञ्जुहुयात्, सा मे विद्या सा प्रायश्चित्तिरिति ब्राह्मणम्।। 3.13।।

3.14 एवमेवैतद्, भो भगवन् यथा भवा नाहोपाऽऽयामित्येव- भवन्त मि,त्येव.ञ्चे.न्नावक्ष्यो मूर्धा ते व्यपतिष्यदिति, हन्त तु ते तद्वक्ष्यामि- यथा ते न व्यपतिष्यदिति, यो ह वा एवँ विद्वा नश्नाति च पिबति च वात्केन तृप्यति, वाचि तृप्ताया मग्नि स्तृप्य- त्यग्नौ तृप्ते

पृथिवी तृप्यति, पृथिव्या न्तृप्तायाँ यानि पृथिव्यां भूता.न्यन्वायत्तानि तानि तृप्यन्ति, यो ह वा एवँ विद्वा नश्नाति च पिबति च प्राणस्तेन तृप्यति, प्राणे तृप्ते वायु स्तृप्यति, वायौ तृप्तेऽन्तरिक्ष न्तृप्य-त्यन्तरिक्षे तृप्ते यान्यन्तरिक्षे भूता.न्यन्वायत्तानि तानि तृप्यन्ति, यो ह वा एवँ विद्वा नश्नाति च पिबति च चक्षुस्तेन तृप्यति, चक्षुषि तृप्त आदित्य स्तृप्य.त्यादित्ये तृप्ते द्यौस्तृप्यति, दिवि तृप्तायाँ यानि दिवि भूता.न्यन्वायत्तानि तानि तृप्यन्ति, यो ह वा एवँ विद्वा नश्नाति च पिबति च मनस्तेन तृप्यति, मनसि तृप्ते चन्द्रमा स्तृप्यति चन्द्रमसि तृप्त आप स्तृप्य-न्त्यप्सु तृप्तासु यान्यप्सु भूता.न्यन्वायत्तानि तानि तृप्यन्ति, यो ह वा एवँ विद्वा नश्नाति च पिबति च श्रोत्र न्तेन तृप्यति, श्रोत्रे तृप्ते दिश श्चान्तर्देशाश्च तृप्यन्ति, दिक्षु चान्तर्देशेषु च तृप्तेषु च- यानि दिक्षु चान्तर्देशेषु च भूता.न्यन्वायत्तानि तानि तृप्यन्ति, यो ह वा एवँ विद्वा नश्नाति च पिबति च- तस्याय.मेव दक्षिणः पाणि र्जुहू- स्सव्य उपभृत्,कण्ठो ध्रुवा-ऽन्नं हविः- प्राणा ज्योतींषि - सदेष्टं सदा हुतं सदाऽशितं, पायित मग्निहोत्रं भवति य एवँ वेद, यश्चैवँ विद्वा नग्निहोत्र.ञ्जुहोतीति ब्राह्मणम्।। 3.14।।

3.15 प्रियमेधा ह वै भरद्वाजा यज्ञविदो मन्यमाना-स्ते ह स्म न कञ्चन वेदविद मुपयन्ति, ते सर्व मविदु स्ते सहैवाविदु,स्तेऽग्निहोत्रमेव न समवादयन्त, तेषा मेक स्सकृ दग्निहोत्र मजुहो-द्वि रेक- स्त्रिरेक,स्तेषाँ य.स्सकृ दग्निहोत्र मजुहो,त्तमितरा-वपृच्छता,ङ्कस्मै त्व.ञ्जुहोषी,त्येकधा वा इदं सर्वं प्रजापतिः, प्रजापतय एवाहं साय.ञ्जुहोमीति- प्रजापतये प्रातरिति, तेषाँ यो द्विरजुहो त्तमितरा-वपृच्छता,ङ्काभ्या न्त्व ञ्जुहोषी,त्यग्नये प्रजापतय इति सायं, सूर्य्याय प्रजापतय इति प्रात,स्तेषाँ यस्त्रि.रजुहो त्तमितरा-वपृच्छता-.ङ्केभ्यस्त्व.ञ्जुहोषी.त्यग्नये प्रजापतये ऽनुमतय इति सायं, सूर्य्याय प्रजापतयेऽग्नये स्विष्टकृत इति प्रात,स्तेषाँ यो द्विरजुहो-त्स आर्ध्नो-त्स भूयिष्ठोऽभवत्, प्रजया चेतरौ श्रिया चेतरा.वत्याक्राम,त्तस्य ह प्रजा मितरयोः प्रजासु? -या तत्त्व मुपेयाता-न्तस्मा द्विर्होतव्यँ, यजुषा चैव मनसा च यामेव स ऋद्धि माध्नोति, तामृध्नोति य एवँ वेद, यश्चैवँ विद्वा नग्निहोत्र.ञ्जुहोतीति ब्राह्मणम्।। 3.15।।

3.16 स्वाहा वै कुत स्सम्भूता, केन प्रकृता, किँ वाऽस्या गोत्र,ङ्कत्यक्षरा, कतिपदा, कतिवर्णा, किम्पूर्वावसाना, क्वचित्स्थिता,

किमधिष्ठाना, ब्रूहि- स्वाहाया यद्दैवतं रूपञ्च, स्वाहा वै सत्यसम्भूता, ब्रह्मणः प्रकृता, लामगायन.सगोत्रा, द्वे अक्षरे, एकं पदं, त्रयश्च वर्णा - श्शुक्लः पद्म स्सुवर्ण इति, सर्वच्छन्दसाँ वेदेषु समासभूतैकोच्छ्वासा, वर्णान्ते चत्वारो वेदा,श्शरीरे षडङ्गा,न्योषधिवनस्पतयो लोमानि, चक्षुषी सूर्य्याचन्द्रमसौ, सा स्वाहा, सा स्वधा, सैषा यज्ञेषु वषट्कारभूता प्रयुज्यते, तस्या अग्नि र्दैवतं ब्राह्मणो रूपमिति ब्राह्मणम्।। 3.16।।

3.17 अथापि कारवो ह नाम ऋषयोऽल्पस्वा आसं-स्त इम मेकगु मग्निष्टोम न्ददृशु,स्तमाऽहरं- स्तेनायजन्त, ते स्व.र्ययु, स्स य इच्छेत्- स्वर्य्यामीति- स एतेनैकगुना ऽग्निष्टोमेन यजेतेति ब्राह्मणम्।। 3.17।।

3.18 अथात स्सवनीयस्य पशो र्विभागँ व्याख्यास्याम, उद्धृत्यावदानानि, हनू सजिह्वे प्रस्तोतुः, कण्ठ स्सकाकुदः प्रतिहर्त्तु, श्श्येनं पक्ष उद्गातु,र्दक्षिणं पार्श्वं सांस मध्वर्यो,स्सव्य मुपगातृणां, सव्योंऽसः प्रतिप्रस्थातु,र्दक्षिणा श्रोणि रथ्या स्त्री ब्रह्मणो,ऽवरसक्थं ब्राह्मणाच्छंसिन, ऊरुः पोतु, स्सव्या श्रोणि र्होतु,रवरसक्थं मैत्रावरुण,स्योरु रच्छावाकस्य, दक्षिणा दो र्नेष्टु,स्सव्या सदस्यस्य,

सदश्चानूकश्च गृहपते र्जाघनी पत्न्या,स्तां सा ब्राह्मणेन प्रतिग्राहयति, वनिष्ठु.र्हृदयँ- वृक्कौ चाङ्गुल्यानि दक्षिणो बाहु राग्नीध्रस्य, सव्य आत्रेयस्य, दक्षिणौ पादौ गृहपते र्व्रतप्रदस्य, सव्यौ पादौ गृहपत्न्या व्रतप्रदाया,स्सहैवैनयो रोष्ठ,स्तं गृहपति रेवानुशास्ति, मणिकाश्च स्कन्धा स्तिस्त्रश्च कीकसा ग्रावस्तुत,स्तिस्त्रश्चैव कीकसा अर्ध.श्चापान श्चोन्नेतु,रत ऊर्द्ध.श्चमसाध्वर्यूणा-क्लोमा शमयितु,श्शिर स्सुब्रह्मण्यस्य, यश्च सुत्या माह्वयते तस्य चर्म, तथा खलु षट्त्रिंशत् संपद्यन्ते, षट्त्रिंश.दवदाना गौ,ष्षट्त्रिंश.दक्षरा बृहती, बार्हतो वै स्वर्गो लोको, बृहत्या वै देवा स्स्वर्गे लोके यजन्ते, बृहत्या स्वर्गे लोके प्रति तिष्ठन्ति, प्रति तिष्ठन्ति प्रजया पशुभि र्य एवँ विभजन्ते,ऽथ यदतोऽन्यथाशीलिको वा पापकृतो वा हुतादो वाऽन्यजना वाऽपि मथ्नीर- न्नेव मेवैषां पशु र्विमथितो भव,त्यस्वर्ग्यो देवता, यो ह वा इमं श्रुतर्षिः पशो र्विभागँ विदाञ्चकार, तामिह गिरिजाय बाभ्रव्यायान्यो मनुष्येभ्यः प्रोवाच, तत इय मर्वाङ्मनुष्ये.ष्वासीदिति ब्राह्मणम्।। 3.18।।

3.19 अथातो दीक्षाः, कस्य स्विद्धेतो र्दीक्षित इत्याचक्षते, श्रेष्ठा न्धियं क्षियतीति, तँ वा एत न्धीक्षितं सन्त न्दीक्षित इत्या चक्षते

परोऽक्षेण, परोऽक्षप्रिया इव हि देवा भवन्ति प्रत्यक्षद्विषः, कस्यस्वि द्धेतो दीक्षितोऽप्रत्युत्थायिको भव त्यनभिवादुकः प्रत्युत्थेयोऽभिवाद्यो, ये प्रत्युत्थेयाभिवाद्या.स्त एन माविष्टा भव,न्त्यथर्वाङ्गिरस स्तस्य, किमाथर्वणमिति, यदात्म.न्येव जुह्वति न परस्मि न्नेवं हाऽऽथर्वणाना मोदनसमानाना.मात्मन्येव जुह्वति न परस्मि,न्नथास्य किमाङ्गिरस.मिति, यदात्मन श्चापरेषाञ्च नामानि न गृह्णा.त्येवं ह तस्मि न्नासादात्मन.श्चैव परेषाञ्च नामानि न गृह्यन्ते, विचक्षणवतीँ वाचं भाषन्ते, चनसितवतीँ विचक्षयन्ति, ब्राह्मणञ्च न सँयन्ति प्राजापत्यं, सैषा व्रतधु,गथर्वाङ्गिरस स्तां ह्यन्वायत्ता,स्स कस्यस्वि द्धेतो दीक्षितो नाश्यन्नो भवति, नास्य नाम गृह्ण.न्त्यन्नस्थो नामस्थो भवतीत्याहु,स्तस्य येऽन्न.मदन्ति तेऽस्य पाप्मान मद,न्त्यथास्य ये नाम गृह्णन्ति- तेऽस्य नाम्नः पाप्मान मपाघ्नते,ऽथापि वेदाना.ङ्गर्भभूतो भवतीत्याहु,स्तस्याऽजातस्याऽविज्ञातस्याऽक्रीतसोमस्याऽभोजनीयं भवतीत्याहु,स्स दीक्षाणां प्रात र्जायते, सोम ङ्क्रीणन्ति, तस्य जातस्य विज्ञातस्य क्रीतसोमस्य भोजनीयं भवतीत्याहुः, कस्यस्वि.द्धेतो स्संसवाः परिजिहीर्षिता भवन्ति, यतरो वीर्यवत्तमो भवति, स परस्य यज्ञं परिमुष्णाति,

कस्यस्वि.द्धेतो दैवेन ध्यायेत्- संस्थितेनाधीयेतेति- संसवस्यैव हेतोरिति विद्योतमाने स्तनय.त्यथो वर्षति, वायव्य मभिषुण्वन्ति, वै देवा स्सोमञ्च भक्षयन्ति, तदभिषुण्वन्ति, ब्राह्मणा श्शुश्रुवांसोऽनूचाना- स्तेषां सर्वरसभक्षाः पितृपितामहा भवन्ति, सदैवेन ध्यायेत्, संस्थितेनाधीयेतेति ब्राह्मणम् ।। 3.19।।

3.20 समावृत्त आचार्य्या निषेदु,स्तान् ह यज्ञो दीक्षिष्यमाणानां ब्राह्मणरूप.ङ्कृत्वोपोदेया,येत्थञ्चे.द्वोपसमवत्सु- र्हन्त वोऽहं मध्ये दीक्षा इति, त ऊचु- र्नैव त्वा विद्मो- न जानीमः, को ही.दविज्ञायमानेन सह दीक्षिष्यतीति, यन्विद न्दीक्षिष्यध्वे- भूयो न दीक्षिष्यध्वे,ऽथवा उ एक न्दीक्षयिष्यथ- सँ वै तर्हि मोहिष्यथ, मोहिष्यति वो यज्ञ,स्सर्वे ते दीक्षयिष्य,तेत्यथवा उ एक न्दीक्षयिष्यथ, ते वा अहीनर्त्विजो गृहपतयो भविष्यथ, ते तूष्णी न्ध्यायन्त आसाञ्चक्रिरे, स होवाच किन्नु तूष्णी.माध्वे- भूयो वः पृच्छामः- पृच्छतेति- यन्विद न्दीक्षिष्यध्व उपयेम- एतस्मि.न्त्सँवत्सरे मिथुन.ञ्चरिष्यथ नोपेष्यथेति- धिगिति होचुः, कथ न्नु दीक्षिता उपेष्यामो- नोपेष्यामहा इति, ते वै ब्राह्मणाना मभिमन्तारो भविष्यथ, रेतो ह वो- य एतस्मिन्त्सँवत्सरे ब्राह्मणा

स्तद्भविष्यं-स्ते बोधिमता भविष्यथे,त्यथ वा उपेष्यामो-नोपेष्यामहा इति, ते वै दीक्षिता अवकीर्णिनो भविष्यथ, न ह वै देवयानः पन्थाः प्रादुर्भविष्यति, तिरो वो देवयानः पन्था भविष्यतीति, ते वयं भगवन्त मेवोपधावाम- यथा स्वस्ति सँवत्सरस्योदृचं समश्नवामहा इति ब्राह्मणम्।। 3.20।।

3.21 स होवाच, द्वादश ह वै वसूनि दीक्षिता दुत्क्रामन्ति, न ह वै दीक्षितोऽग्निहोत्र.ञ्जुहुया,न्न पौर्णमासेन यज्ञेन यजेत नाऽऽमावास्येना,ऽस्मि न्वसीत, न पितृयज्ञेन यजेत, न तत्र गच्छे-द्यत्र मनसा जिगमिषे,न्नेष्ट्या यजेत, न वाचा यथाकथाचि.दभिभाषेत, न मिथुन.ञ्चरे,न्नान्यस्य यथाकाम मुपयुञ्जीत, न पशुबन्धेन यज्ञेन यजेत, न तत्र गच्छे- द्यत्र चक्षुषा परापश्येत्,कृष्णाजिनँ वसीत, कुरीर न्धारये,न्मुष्टी कुर्य्या,-दङ्गुष्ठ प्रभृतय स्तिस्र उच्छ्रये,न्मृगश्रृङ्ग.ङ्गृह्णीया त्तेन कषेता.थ यस्य दीक्षितस्य वाग्वाऽऽयता स्या-न्मुष्टी वा विसृष्टौ, स एतानि जपेत्।। 3.21।।

3.22 अग्निहोत्रञ्च मा पौर्णमासश्च यज्ञः पुरस्ता त्प्रत्यञ्च मुभौ कामप्रौ भूत्वा क्षित्या सहाऽऽविशताम्। वसतिश्च माऽऽमावास्यश्च

यज्ञ꠰ पश्चात्प्राञ्चं मुभाविर्ति समानं, मनश्च मा पितृयज्ञश्चं यज्ञो दक्षिणत उदञ्च मुभाविर्ति समानँ, वाक्र मेष्टिश्चोत्तरतो दक्षिणाञ्च मुभाविर्ति समानं, रेतश्च माऽन्न.ञ्चेत ऊर्द्ध.मुभाविर्ति समान,ञ्चक्षुश्च मा पशुबन्धश्चं यज्ञोऽमुतोर्वाञ्चं मुभौ कामप्रौ भूत्वा क्षित्या सहाऽऽविंशता,मिति खलु ह वै दीक्षितो य आत्मनि वसूनि धत्ते- न चैवास्य काचनाऽऽर्ति र्भवति, न च यज्ञविष्कन्ध मुपया,त्यपहन्ति पुनर्मृत्यु- मपात्येति पुनराजाति,ङ्कामचारोऽस्य सर्वेषु लोकेषु भाति य एवँ वेद, यश्चैवँ विद्वा न्दीक्षा मुपैतीति ब्राह्मणम्।। 3.22।।

3.23 अथ यस्य दीक्षितस्यर्त्तुमती जाया स्यात्, प्रतिस्नावा प्रतिस्नावा, सा रूपवत्साया गो꠰ पयसि स्थालीपाकं श्रपयित्वा ऽभिघार्योद्वास्योद्धृत्याऽभि हिङ्कृत्य गर्भवेदन पुंसवनै स्सम्पातवन्त ङ्कृत्वा, तं परैव प्राश्नीया- द्रेतो वा अन्नँ वृषा हिङ्कार, एवं हीश्वराय दीक्षिताय दीक्षिती जाया पुत्रँ लभेते.त्येतेनैव प्रक्रमेण यजेतेति ब्राह्मणम्।। 3.23।। इत्यथर्ववेदे गोपथब्राह्मणे पूर्वभागे तृतीय꠰ प्रपाठक स्समाप्तः

पूर्वार्धे चतुर्थः प्रपाठकः

4.1 ओम्। अयँ वै यज्ञो- योऽयं पवते, तमेत ईप्सन्ति ये सँवत्सराय दीक्षन्ते, तेषा.ङ्गृहपतिः प्रथमो दीक्षते,ऽयँ वै लोको गृहपति-रस्मिन् वा इदं सर्वं लोके प्रतिष्ठित,ङ्गृहपता उ एव सर्वे सत्रिणः प्रतिष्ठिताः, प्रतिष्ठाया एवैन.न्तत्प्रतिष्ठित्यै दीक्षन्ते।। 4.1।।

4.2. अथ ब्रह्माण न्दीक्षयति, चन्द्रमा वै ब्रह्माऽधिदैवतं, मनोऽध्यात्मं, मनसैव तदोषधी स्सन्दधाति, तद्या ओषधी वेंद- स एव ब्रह्मौषधी स्तदनेन लोकेन सन्दधाति, तस्मादेता.वन्तरेणान्यो न दीक्षेत, स यदेतावन्तरेणा.न्यो दीक्षे.तेम न्तँ लोक मोषधिभि र्व्यापादये- दुच्छोषुका ह स्यु स्तस्मा देता.वन्तरेणान्यो न दीक्षेत।। 4.2।।

4.3. अथोद्गातार न्दीक्षय- त्यादित्यो वा उद्गाताऽधिदैव,ञ्चक्षु रध्यात्मं, पर्जन्य आदित्यः, पर्जन्यादधि वृष्टि र्जायते, वृष्टिरेव तदोषधी स्सन्दधाति, तस्मा देता.वन्तरेणान्यो न दीक्षेत, स यदेता.वन्तरेणान्यो दीक्षेतेम न्तँ लोकँ वर्षेण व्यापादये- दवर्षुका ह स्यु स्तस्मा देता.वन्तरेणान्यो न दीक्षेत।। 4.3।।

4.4 अथ होतार न्दीक्षय- त्यग्निर्वै होताऽधिदैवँ, वागध्यात्म मन्नँ वृष्टि,र्वाचश्चैव तदग्नि.श्चान्नेन सन्दधाति, तस्मा देता.वन्तरेणान्यो न दीक्षेत, स यदेता.वन्तरेणान्यो दीक्षेतेम न्तँ लोक मन्नेन व्यापादये-दशनायुका ह स्यु- स्तस्मा देता.वन्तरेणान्यो न दीक्षेत।। 4.4।।

4.5 अथाध्वर्य्युं प्रतिप्रस्थाता दीक्षयति, वायुर्वा अध्वर्यु रधिदैवं प्राणोऽध्यात्म मन्नँ वृष्टि र्वायुश्चैव तत्प्राणश्चान्नेन सन्दधाति, तस्मा देता.वन्तरेणान्यो न दीक्षेत, स यदेता.वन्तरेणान्यो दीक्षेतेम न्तँ लोकं प्राणेन व्यापादये,त्प्रमायुका ह स्यु स्तस्मा देता.वन्तरेणान्यो न दीक्षेत।। 4.5।।

4.6 अथ ब्रह्मणे ब्राह्मणाच्छंसिन न्दीक्षय,त्यथोद्गात्रे प्रस्तोतार न्दीक्षय,त्यथ होत्रे मैत्रावरुण न्दीक्षय,त्यथाध्वर्यवे प्रतिप्रस्थातार न्नेष्टा दीक्षयति, स हैन मन्वितरेषाँ वै नवाना.ङ्क्लृप्ति रन्यतरे कल्पन्ते, नव वै प्राणाः- प्राणै र्यज्ञ स्तायते,ऽथ ब्रह्मणे पोतार न्दीक्षय,त्यथोद्गात्रे प्रतिहर्तार न्दीक्षय,त्यथ होत्रेऽच्छावाक न्दीक्षय,त्यथाध्वर्यवे नेष्टार मुन्नेता दीक्षयति, स हैन मन्वथ ब्रह्मण आग्नीध्र न्दीक्षय,त्यथोद्गात्रे सुब्रह्मण्य न्दीक्षय,त्यथ होत्रे ग्रावस्तुत न्दीक्षयय,त्यथ त.मन्यस्नातको वा ब्रह्मचारी वा दीक्षयति, न पूतः

पावये.दित्याहु- स्सैषाऽनुपूर्व न्दीक्षा, तद्य एव.न्दीक्षन्ते- दीक्षिष्यामाणा एव ते सत्रिणां प्रायश्चित्त.न्न विन्दन्ते, सत्रिणां प्रायश्चित्त मनु तस्यार्धस्य योगक्षेमः कल्पते, यस्मिन्नर्द्धे दीक्षन्त इति ब्राह्मणम्।। 4.6।।

4.7 श्रद्धाया वै देवा दीक्षणीया न्निरमिमता.ऽदितेः प्रायणीयां, सोमात्क्रयँ, विष्णो रातिथ्य,मादित्या त्प्रवर्ग्यं, स्वधाया उपसदो,ऽग्नीषोमाभ्या मौपवसथ्य महः, प्रातर्यावभ्यो देवेभ्यः प्रातरनुवाकँ, वसुभ्यः प्रातस्सवनं, रुद्रेभ्यो माध्यन्दिनं सवन, मादित्येभ्य स्तृतीयसवनँ, वरुणा दवभृथ,मदिते रुदयनीयां, मित्रावरुणाभ्या मनूबन्ध्या,न्त्वष्टु स्त्वाष्ट्र,न्देवीभ्यो देविकाभ्यो देवताहवींषि, कामा द्दशातिरात्रं, स्वर्गाल्लोका दुदवसानीया,न्तद्वा एत दग्निष्टोमस्य जन्म, स य एवमेत दग्निष्टोमस्य जन्म वेदा.ग्निष्टोमेन साऽऽत्मा सलोको भूत्वा, देवानप्येतीति ब्राह्मणम्।। 4.7।।

4.8 अथ यद्दीक्षणीयया यजन्ते, श्रद्धामेव तद्देवी न्देवताँ यजन्ते- श्रद्धा देवी देवता भवति- श्रद्धाया देव्या स्सायुज्यं सलोकताँ यन्ति- य एतदुपय,न्त्यथ यत्प्रायणीयया यजन्तेऽदितिमेव तद्देवी न्देवताँ

यजन्ते-ऽदिति र्दैवी देवता भव-त्यदित्या देव्या स्सायुज्यं सलोकताँ यन्ति, य एत दुपय,न्त्यथ यत्क्रय मुपयन्ति- सोममेव तद्देव न्देवताँ यजन्ते- सोमो देवो देवता भवति- सोमस्य देवस्य सायुज्यं सलोकताँ यन्ति- य एत दुपय,न्त्यथ यदातिथ्यया यजन्ते- विष्णुमेव तद्देव न्देवताँ यजन्ते- विष्णु र्दैवो देवता भवति- विष्णो र्दैवस्य सायुज्यं सलोकताँ यन्ति- य एत दुपय,न्त्यथ यत्प्रवर्ग्य मुपय-न्त्यादित्य मेव तद्देव न्देवताँ यजन्त- आदित्यो देवो देवता भव-त्यादित्यस्य देवस्य सायुज्यं सलोकताँ यन्ति- य एत दुपय,न्त्यथ यदुपसद मुपयन्ति- स्वधा मेव तद्देवी न्देवताँ यजन्ते- स्वधा देवी देवता भवति- स्वधाया देव्या स्सायुज्यं सलोकताँ यन्ति- य एतदुपय,न्त्यथ यदौपवसथ्य मह रुपय-न्त्यग्नीषोमावेव तद्देवौ देवते यजतो-ऽग्नीषोमौ देवौ देवते भवतो-ऽग्नीषोमयो र्दैवयो स्सायुज्यं सलोकताँ यन्ति- य एतदुपय,न्त्यथ यत्प्रातरनुवाक मुपयन्ति-प्रातर्याव्ण एव तद्देवा न्देवताँ यजन्ते- प्रातर्य्यावाणो देवा देवता भवन्ति- प्रातर्याव्णा न्देवानां सायुज्यं सलोकताँ यन्ति- य एतदुपय,न्त्यथ यत्प्रातस्सवन मुपयन्ति- वसूनेव तद्देवा न्देवताँ यजन्ते- वसवो देवा देवता भवन्ति- वसूना न्देवानां सायुज्यं

सलोकताँ यन्ति- य एतदुपय,न्त्यथ यन्माध्यन्दिनं सवन मुपयन्ति- रुद्रानेव तद्देवा न्देवताँ यजन्ते- रुद्रा देवा देवता भवन्ति- रुद्राणा न्देवानां सायुज्यं सलोकताँ यन्ति- य एतदुपय,न्त्यथ यत्तृतीयसवन मुपय-न्त्यादित्यानेव तद्देवा न्देवताँ यजन्त, आदित्या देवा देवता भव-न्त्यादित्याना न्देवानां सायुज्यं सलोकताँ यन्ति- य एतदुपय,न्त्यथ यदवभृथ मुपयन्ति- वरुणमेव तद्देव न्देवताँ यजन्ते- वरुणो देवो देवता भवति- वरुणस्य देवस्य सायुज्यं सलोकताँ यन्ति- य एतदुपय,न्त्यथ यदुदयनीयया यजन्ते-ऽदितिमेव तद्देवी न्देवताँ यजन्ते-ऽदिति र्दैवी देवता भव-त्यदित्या देव्या स्सायुज्यं सलोकताँ यन्ति- य एतदुपय,न्त्यथ यदनूबन्ध्यया यजन्ते- मित्रावरुणावेव तद्देवौ देवते यजतो- मित्रावरुणौ देवौ देवते भवतो- मित्रावरुणयो र्दैवयो स्सायुज्यं सलोकताँ यन्ति- य एतदुपय,न्त्यथ यत्त्वाष्ट्रेण पशुना यजन्ते- त्वष्टारमेव तद्देव न्देवताँ यजन्ते- त्वष्टा देवो देवता भवति- त्वष्टु र्दैवस्य सायुज्यं सलोकताँ यन्ति- य एतदुपय,न्त्यथ यद्देविकाहविर्भि श्चरन्ति- या एता उपसत्सु भव-न्त्यग्नि स्सोमो विष्णु रिति देव्यो देविका देवता भवन्ति- देवीना न्देविकाना न्देवतानां सायुज्यं सलोकताँ यन्ति- य एतदुपय,न्त्यथ

यद्दशातिरात्र मुपयन्ति- काममेव तद्देव न्देवताँ यजन्ते- कामो देवो देवता भवति- कामस्य देवस्य सायुज्यं सलोकताँ यन्ति- य एतदुपय,न्त्यथ य.दुदव.सानीयया यजन्ते- स्वर्गमेव तँ लोक न्देव न्देवताँ यजन्ते- स्वर्गों लोको देवो देवता भवति- स्वर्गस्य लोकस्य देवस्य सायुज्यं सलोकताँ यन्ति- य एतदुपयन्ति, तद्वा एतदग्निष्टोमस्य जन्म, स य एव मेत दग्निष्टोमस्य जन्म वेदाऽऽस्त्वैव तदग्निष्टोमं- स्वर्गे लोके प्रति तिष्ठति, प्रतितिष्ठति प्रजया पशुभि र्य एवँ वेदा,ऽग्निष्टोमेन साऽऽत्मा सलोको भूत्वा देवानप्येतीति ब्राह्मणम्।। 4.8।।

4.9 अहोरात्राभ्याँ वै देवाः प्रायणीय मतिरात्र न्निरमिम- तार्धमासेभ्य श्चतुर्विंश महो- ब्रह्मणोऽभिप्लव- ङ्क्षत्रा.त्पृष्ठ्य- मग्ने रभिजित- मद्भ्य स्स्वरसाम्न- स्सूर्य्या द्विषुवन्त- मुक्ता आवृत्ता स्स्वरसामान- इन्द्रा द्विश्वजित- मुक्तौ पृष्ठ्याभिप्लवौ मित्रावरुणाभ्या,ङ्गवायुषी विश्वेभ्यो देवेभ्यो दशरात्र- न्दिग्भ्यो दशरात्रिकं पृष्ठ्यं षडह- मेभ्यो लोकेभ्य श्छन्दोम न्त्र्यहं- सँवत्सरा.द्दशम महः- प्रजापते र्महाव्रतं- स्वर्गा ल्लोका दुदयनीय मतिरात्र- न्तद्वा एतत्सँवत्सरस्य जन्म, स य एव मेत त्सँवत्सरस्य

जन्म वेद- सँवत्सरेण साऽत्मा सलोको भूत्वा देवा नप्येतीति ब्राह्मणम्।। 4.9।।

4.10 अथ यत्प्रायणीय मतिरात्र मुपय.न्त्यहोरात्रावेव तद्देवौ देवते यजतो-ऽहोरात्रौ देवौ देवते भवतो-ऽहोरात्रयो र्दैवयो स्सायुज्यं सलोकताँ यन्ति य एतदुपय,न्त्यथ यच्चतुर्विंश मह रुपय-न्त्यर्धमासानेव तद्देवा न्देवताँ यजन्ते-ऽर्धमासा देवा देवता भव-न्त्यर्धमासाना न्देवानां सायुज्यं सलोकताँ यन्ति- य एतदुपय,न्त्यथ यदभिप्लव मुपयन्ति- ब्रह्माणमेव तद्देव न्देवताँ यजन्ते- ब्रह्मा देवो देवता भवति- ब्रह्मणो देवस्य सायुज्यं सलोकताँ यन्ति- य एत दुपय,न्त्यथ यत्पृष्ठ्य मुपयन्ति क्षत्रमेव तद्देव न्देवताँ यजन्ते- क्षत्र न्देवो देवता भवति- क्षत्रस्य देवस्य सायुज्यं सलोकताँ यन्ति- य एतदुपय,न्त्यथ यदभिजित मुपय- न्त्यग्निमेव तद्देव न्देवताँ यजन्ते-ऽग्निर्दैवो देवता भव-त्यग्ने र्दैवस्य सायुज्यं सलोकताँ यन्ति- य एतदुपय,न्त्यथ यत्स्वरसाम्न उपय-न्त्यप एव तद्देवी र्दैवता यजन्त- आपो देव्यो देवता भव-न्त्यपा न्देवीनां सायुज्यं सलोकताँ यन्ति- य एत दुपय,न्त्यथ यद्विषुवन्त मुपयन्ति- सूर्यमेव तद्देव न्देवताँ यजन्ते- सूर्यो देवो देवता भवति- सूर्यस्य देवस्य सायुज्यं सलोकताँ

यन्ति- य एतदुपय,न्त्युक्ता आवृत्ता स्स्वरसमानो,ऽथ यद्विश्वजित मुपय-न्तीन्द्रमेव तद्देव न्देवताँ यजन्त- इन्द्रो देवो देवता भव-तीन्द्रस्य देवस्य सायुज्यं सलोकताँ यन्ति- य एत दुपय,न्त्युक्तौ पृष्ठ्याभिप्लवा,वथ यद्गवायुषी उपयन्ति- मित्रावरुणावेव तद्देवौ देवते यजतो- मित्रावरुणौ देवौ देवते भवतो- मित्रावरुणयो र्दैवयो स्सायुज्यं सलोकताँ यन्ति- य एतदुपय,न्त्यथ यद्दशरात्र मुपयन्ति- विश्वानेव तद्देवा न्देवताँ यजन्ते- विश्वे देवा देवता भवन्ति- विश्वेषा न्देवानां सायुज्यं सलोकताँ यन्ति- य एत दुपय,न्त्यथ यद्दाशरात्रिकं पृष्ठ्यं षडह मुपयन्ति- दिश एव तद्देवी र्दैवता यजन्ते- दिशो देव्यो देवता भवन्ति- दिशा न्देवीनां सायुज्यं सलोकताँ यन्ति- य एतदुप य,न्त्यथ यच्छन्दोम.त्र्यह मुपय-न्तीमानेव तल्लोका न्देवा न्देवताँ यजन्त- इमे लोका देवा देवता भव-न्त्येषाँ लोकाना न्देवानां सायुज्यं सलोकताँ यन्ति- य एतदुपय,न्त्यथ यद्दशम मह रुपयन्ति- सँवत्सरमेव तद्देव न्देवताँ यजन्ते- सँवत्सरो देवो देवता भवति- सँवत्सरस्य देवस्य सायुज्यं सलोकताँ यन्ति- य एतदुपय,न्त्यथ यन्महाव्रत मुपयन्ति- प्रजापतिमेव तद्देव न्देवताँ यजन्ते- प्रजापति र्दैवो देवता भवति- प्रजापते र्दैवस्य सायुज्यं सलोकताँ यन्ति- य

एतदुपय,न्त्यथ यदुदयनीय मतिरात्र मुपयन्ति- स्वर्गमेव तल्लोक न्देव न्देवताँ यजन्ते- स्वर्गो लोको देवो देवता भवति- स्वर्गस्य लोकस्य देवस्य सायुज्यं सलोकताँ यन्ति- य एतदुपयन्ति, तद्वा एतत्सँवत्सरस्य जन्म, स य एव मेत त्सँवत्सरस्य जन्म वेदा,ऽऽस्वैव तत्सँवत्सरं स्वर्गे लोके प्रतितिष्ठति, प्रति तिष्ठति प्रजया पशुभि र्य एवँ वेद, सँवत्सरेण साऽऽत्मा सलोको भूत्वा देवानप्येतीति ब्राह्मणम्।। 4.10।।

4.11 स वा एष सँवत्सरोऽधिदैव.ञ्चाध्यात्मञ्च प्रतिष्ठित,स्स य एव मेतत्सँवत्सर मधिदैव.ञ्चाध्यात्मञ्च प्रतिष्ठितँ वेद प्रति तिष्ठति, प्रति तिष्ठति प्रजया पशुभि र्य एवँ वेद, स वा एष सँवत्सरः।। 4.11।।

4.12 स वा एष सँवत्सरो- बृहती मभिसम्पन्नो- द्वावक्षरा.वह्नां षडहौ द्वौ पृष्ठ्याभिप्लवौ गवायुषी दशरात्र-स्तथा खलु षट्त्रिंश.त्सं पद्यन्ते- षट्त्रिंश.दवदाना गौ- ष्षट्त्रिंशदक्षरा बृहती, बार्हतो वै स्वर्गो लोको- बृहत्या वै देवा स्स्वर्गे लोके यजन्ते, बृहत्या स्वर्गे लोके प्रति तिष्ठति, प्रति तिष्ठति प्रजया पशुभिर्य एवँ वेद, स वा एष सँवत्सरः।। 4.12।।

4.13 स वा एष सँवत्सर स्त्रिमहाव्रत- श्चतुर्विंशेन महाव्रतँ- विषुवति महाव्रतं, महाव्रत एव महाव्रत,न्तं ह स्मैत मेवँविद्वांसꣳ पूर्वे त्रिमहाव्रत मुपयन्ति, ते तेजस्विन आस.न्त्सत्यवादिन स्संशितव्रता, य एन मद्य तथाऽपेयु- र्यथाऽऽमपात्र मुदक आसिक्ते निर्मृज्ये-देवँ यजमाना निर्मृज्येर,न्नुपर्युपयन्ति- यथा हास्य सत्येन तपसा व्रतेन चाभिजित मवरुद्धं भवति, य एवँ वेद- स वा एष सँवत्सरः।। 4.13।।

4.14 अथ चतुर्विंशमह रुपेत्यानुपेत्य विषुवन्तं महाव्रत मुपेयात्- कथ मनाकूत्यै भवतीति, यमेवामुं पुरस्ता द्विषुवतोऽतिरात्र मुपयन्ति तेनेति ब्रूया, दभिप्लवा त्पृष्ठ्यो निर्मितꣳ, पृष्ठ्या दभिजि,दभिजित स्स्वरसामान,स्स्वरसामभ्यो विषुवान्, विषुवत स्स्वरसामान, स्स्वरसामभ्यो विश्वजिद्,विश्वजितꣳ पृष्ठ्याभिप्लवौ, पृष्ठ्याभिप्लवाभ्या.ङ्गवायुषी, गवायुर्भ्या न्दशरात्रो, दशरात्रा न्महाव्रतं, महाव्रता दुदयनीयोऽतिरात्र- स्स्वर्गाय लोकायान्नाद्याय प्रतिष्ठित्यै- य एवँ वेद, स वा एष सँवत्सरः।। 4.14।।

4.15 अथ यच्चतुर्विंशमह रुपेत्यानुपेत्य विषुवन्तं महाव्रत मुपेया,त्कथ.मनाकूत्यै भवतीति, यमेवामुं पुरस्ता.द्विषुवतोऽतिरात्र

मुपयन्ति तेनेति ब्रूया,दभिप्लवा.त्पृष्ठ्यो निर्मितः- पृष्ठ्या दभिजि,दभिजित स्स्वरसामान,स्स्वरसामभ्यो विषुवान्, विषुवत स्स्वरसामान, स्स्वरसामभ्यो विश्वजिद्,विश्वजितः पृष्ठ्याभिप्लवौ, पृष्ठ्याभिप्लवाभ्या.ङ्गवायुषी, गवायुर्भ्यां दशरात्रो,ऽथ ह देवेभ्यो महाव्रत न्न तस्थे, कथ मूर्द्धं स्स्तोमै र्विषुवन्त मुपागाताँ- वृत्तै र्मामिति, ते देवा इह सामिवाऽऽसु,रुप तँ यज्ञक्रतु.ञ्ज्ञानीमो- य ऊर्द्धस्तोमो येनैतदह रवाऽऽप्नुयामेति, तत एत न्द्वादशरात्र मूर्द्धस्तोम न्ददृशु- स्तमाऽहरं-स्तेनायजन्त- तत एभ्योऽतिष्ठं-स्तिष्ठति हास्मै महाव्रतं, महाव्रतं प्रति तिष्ठति, प्रति तिष्ठति प्रजया पशुभि र्य एवँ वेद, स वा एष सँवत्सरः।। 15।।

4.16 अथ यच्चतुर्विंश.मह रुपेत्यानुपेत्य विषुवन्तं महाव्रत मुपेया,त्कथ.मनाकूत्यै भवतीति, यमेवामुं पुरस्ता द्विषुवतोऽतिरात्र मुपयन्ति- तेनेति ब्रूया,त्तदाहुः- कति सँवत्सरस्य पराञ्च्यहानि भवन्ति- कत्यर्वाञ्चि, तद्यानि सकृत्सकृ.दुपयन्ति तानि परा,ञ्च्यथ यानि पुनः पुन रुपयन्ति- तान्यर्वाञ्ची- त्येवैना.न्युपाऽऽसीर,न्ष्थडहयो र्ह्यावृत्ति मन्वावर्तन्ते- य एवँ वेद, स वा एष सँवत्सरः।। 4.16।।

4.17 अथ यच्चतुर्विंशमह रुपेत्यानुपेत्य विषुवन्तं महाव्रत मुपेया,त्कथ.मनाकूत्यै भवतीति, यमेवामुं पुरस्ता द्विषुवतोऽतिरात्र मुपयन्ति- तेनेति ब्रूया,दभिप्लवं पुरस्ता द्विषुवतः पूर्वासूपयन्ति, पृष्ठ्य.मुपरिष्टा.त्पिता वा अभिप्लवः- पुत्रः पृष्ठ्य,स्तस्मा त्पूर्वे वयसि पुत्राः पितर मुपजीवन्ति, पृष्ठ्यं पश्चा द्विषुवतः पूर्व मुपय.न्त्यभिप्लव मुपरिष्टा,त्पिता वा अभिप्लवः पुत्रः पृष्ठ्य,स्तस्मा दुत्तमे वयसि पुत्रा न्पितोपजीवति- य एवँ वेद, तदप्येतदृचोक्तम्। श॒तमिन्नु श॒रदो॒ अन्ति॑ दे॒वा यत्रा॑ न श्च॒क्रा ज॒रसं॑ न्त॒नूना॑म्। पु॒त्रासो॒ यत्र॑ पि॒तरो॒ भव॑न्ति॒ मा नो॑ म॒ध्या रीरिषता॑ऽयु॒ र्गन्तो॑-रित्युप ह वा एनं पूर्वे वयसि पुत्राः पितर मुपजीव-न्त्युपोत्तमे वयसि पुत्रा.न्पितोप जीवति, य एवँ वेद- स वा एष सँवत्सरः।। 4.17।।

4.18 अथ हैष महासुपर्ण,स्तस्य यान्पुरस्ता.द्विषुवत ष्षण्मासा नुपयन्ति, स दक्षिणः पक्षो-ऽथ यानावृत्ता नुपरिष्टा. त्षडुपयन्ति- स उत्तरः पक्ष, आत्मा वै सँवत्सरस्य विषुवा- नङ्गानि पक्षौ, यत्र वा आत्मा- तत्पक्षौ, यत्र वै पक्षौ- तदात्मा, न वा आत्मा पक्षा.वतिरिच्यते, नो पक्षा- वात्मान मतिरिच्येते- इत्येवमु हैव

तदपरेषां स्विदितमह्नां परेषा मित्यपरेषाञ्चैव परेषाञ्चेति ब्रूया,त्स वा एष सँवत्सरः।। 18।।

4.19 तदाहु र्यद्द्वादश मासा स्सँवत्सरो,ऽथ हैत.दह रवाऽऽप्नुयामेति, यद्वै विषुवत मपरेषां स्विदितमह्नां परेषा मित्यपरेषाञ्चैव- परेषाञ्चेति ब्रूया,दात्मा वै सँवत्सरस्य विषुवा-नङ्गानि मासौ, यत्र वा आत्मा- तदङ्गानि, यत्राङ्गानि- तदात्मा, न वा आत्माऽङ्गा.न्यति रिच्यते- नोऽङ्गा.न्यात्मान मतिरिच्यन्त- इत्येवमु हैव तदपरेषां स्विदितमह्नां परेषा मित्यपरेषाञ्चैव- परेषाञ्चेति ब्रूयात, स वा एष सँवत्सरः।। 4.19।।

4.20 तदाहु॰- कथ मुभयतो ज्योतिषोऽभिप्लवा अन्यतरो ज्योतिष्पृष्ठ्य- इ,त्युभयतोज्योतिषो वा इमे लोका, अग्निनेत- आदित्येनामुत- इत्येष ह वा एतेषा ञ्ज्योति-र्य एनं प्रमुदीव तपति, देवचक्रे ह वा एते पृष्ठ्यप्रतिष्ठिते पाप्मानँ बृंहती परिप्लवेते, तद्य एवँ विदुषा न्दीक्षितानां पापक.ङ्कीर्तये-देत एवास्य तद्देवचक्रे शिर.श्छन्दतो दशरात्र मुद्धि॰ पृष्ठ्याभिप्लवौ चक्रे, दशरात्र.मुद्धि॰ पृष्ठ्याभिप्लवौ चक्रे, तन्त्र.ङ्कुर्वीतेति ह स्माऽऽह वा स्यु,स्तयो स्स्तोत्राणि च शस्त्राणि च सञ्चारये,द्यस्सञ्चारये त्तस्मादिमे पुरुषे

प्राणा नाना सन्त एकोदया च्छरीर मधिवसति, यन्न सञ्चारये.त्प्रमायुको ह यजमान स्स्या,देष ह वै प्रमायुको- योऽन्धो वा बधिरो वा, नवाग्निष्टोमा मासि सं पद्यन्ते- नव वै प्राणाः- प्राणै र्यज्ञ स्तायत, -एकविंशति रुक्थ्या- एक उक्थ्य ष्षोड,श्यन्नँ वा उक्थ्यँ वीर्य्यं, षोडश्यैव तया रूढ्वा, स्वर्गँ लोक मध्यारोहन्ति।। 4.20।।

4.21 अथातोऽह्ना मध्यारोहः, प्रायणीये.नातिरात्रे.णोदयनीय मतिरात्र मध्यारोहन्ति, चतुर्विंशेन महाव्रत- मभिप्लवेन पर.मभिप्लवं- पृष्ठ्येन परं पृष्ठ्य मभिजिताऽभिजितं- स्वरसामभिः परा.न्स्वठरसाम्नो,ऽथ हैत दह रवाऽऽप्नुयामेति, यद्वैषुवत मपरेषां स्विदितमह्नां परेषा मित्यपरेषाञ्च, परेषाञ्चेति ब्रूया,त्स वा एष सँवत्सरः।। 4.21।।

4.22 अथातोऽह्ना न्निवाहः, प्रायणीयो ऽतिरात्र श्चतुर्विंशायाह्ने निवहति, चतुर्विंशमह रभिप्लवाया,ऽभिप्लवः पृष्ठ्याय, पृष्ठ्योऽभिजिते,ऽभिजि.त्स्वरसामभ्य, स्स्वरसामानो विषुवते, विषुवा.न्त्स्वरसामभ्य,स्स्वरसामानो विश्वजिते, विश्वजि. त्पृष्ठ्याभिप्लवाभ्यां, पृष्ठ्याभिप्लवौ गवायुर्भ्यां,ङ्गवायुषी दशरात्राय,

दशरात्रो महाव्रताय, महाव्रत मुदयनीया.यातिरात्रा,-योदयनीयोऽतिरात्र स्स्वर्गाय लोकायान्नाद्याय प्रतिष्ठित्यै, य एवँ वेद- स वा एष सँवत्सरः।। 4.22।।

4.23 आदित्याश्च ह वा अङ्गिरसश्च स्वर्गे लोकेऽस्पर्धन्त, वयं पूर्वे स्व.रेष्यामो -वयं पूर्व इति, त आदित्या लघुभि स्सामभि श्चतुर्भि स्तोमै र्द्वाभ्यां पृष्ठ्याभ्यां स्वर्गँ लोक मभ्यप्लवन्त, यदभ्यप्लवन्त-तस्मा.दभिप्लवो,ऽन्वञ्च एवाङ्गिरसो गुरुभि स्सामभि स्सर्वै स्स्तोमै स्सर्वैः पृष्ठ्यै स्स्वर्गँ लोक.मस्पृशन्त, यदस्पृशन्त तस्मात्स्पृश्य,स्तँ वा एतं स्पृश्यं सन्तं पृष्ठ्य इत्या चक्षते परोऽक्षेण, परोऽक्षप्रिया इव हि देवा भवन्ति प्रत्यक्षद्विषो,ऽभिप्लवा.त्पृष्ठ्यो निर्मितः, पृष्ठ्या दभिजि,दभिजित स्स्वरसामान,स्स्वरसामभ्यो विषुवान्, विषुवत स्स्वरसामान, स्स्वरसामभ्यो विश्वजि,द्विश्वजितः पृष्ठ्याभिप्लवौ, पृष्ठ्याभिप्लवाभ्या. ङ्गवायुषी, गवायुर्भ्या न्दशरात्र,स्तानि ह वा एतानि यज्ञाऽऽरण्यानि यज्ञकृत्तन्त्राणि, तेषां शतं शतं रथाना.न्त्यन्तर,न्तद्यथाऽरण्या.न्यारूढा अशनापिपासे- ते पाप्मान.न्तृंहती परिप्लवेते- एवं हैवैते प्रप्लवन्ते येऽविद्वांस उपय,न्त्यथ ये विद्वांस मुपयन्ति, तद्यथा प्रवाहा त्प्रवाहं-

स्थलात्स्थलं- समा.त्समं- सुखा.त्सुख- मभया दभय मुपसङ्क्रामन्ती-त्येवं हैवैते सँवत्सरस्योदृचं समश्नवामहा इति ब्राह्मणम्।। 23।।

4.24 प्रेदिर्ह वै कौशाम्बेयः कौसुरबिन्दु रुद्दालक मारुणो ब्रह्मचर्य मुवास, तमाचार्य्यः पप्रच्छ- कुमार कति ते पिता सँवत्सरस्याहा.न्यमन्यतेति, कति त्वेवेति- दशेति होवाच, दश वा इति होवाच- दशाक्षरा विरा.ड्वैराजो यज्ञः, कति त्वेवेति नवेति होवाच, नव वा इति होवाच- नव वै प्राणाः- प्राणै र्यज्ञ स्तायते, कति त्वेवेत्यष्टेति होवाचाष्टौ वा इति होवाचा.ष्टाऽक्षरा गायत्री गायत्रो यज्ञः, कति त्वेवेति सप्तेति होवाच, सप्त वा इति होवाच- सप्त च्छन्दांसि च्छन्दोभि र्यज्ञ स्तायते, कति त्वेवेति षडिति होवाच, षड्वा इति होवाच- षड्वा ऋतव ऋतूना माप्त्यै, कति त्वेवेति पञ्चेति होवाच- पञ्च वा इति होवाच- पञ्चपदा पङ्क्तिः पाङ्क्तो यज्ञः, कति त्वेवेति चत्वारीति होवाच, चत्वारि वा इति होवाच- चत्वारो वै वेदा- वेदै र्यज्ञ स्तायते, कति त्वेवेति त्रीणीति होवाच, त्रीणि वा इति होवाच- त्रिषवणो वै यज्ञ स्सवनै र्यज्ञ स्तायते, कति त्वेवेति द्वे इति होवाच, द्वे वा इति होवाच- द्विपाद्वै पुरुषो द्विप्रतिष्ठः पुरुषः- पुरुषो

वै यज्ञः, कति त्वेवेत्येकमिति होवाचैकँ वा इति होवाचाऽहरह रित्येक.मेव सर्वं सँवत्सरम्।। 4.24।। इति गोपथब्राह्मणे पूर्वभागे चतुर्थः प्रपाठकः समाप्तः

पूर्वार्धे पञ्चमः प्रपाठकः

5.01 ओम्। अभिप्लव ष्षडह,ष्षडहानि भवन्ति, ज्योति गौँरायु गौँरायु.ज्यौँति रभिप्लवः पञ्चाहः, पञ्च ह्येवाहानि भवन्ति, यद्ध्येव प्रथम मह- स्तदुत्तम मह,रभिप्लव.श्चतुरह,श्चत्वारो हि स्तोमा भवन्ति, त्रिवृ.त्पञ्चदश स्सप्तदश, एकविंश एवाभिप्लव स्त्र्यह- स्त्र्यहाऽऽवृत्ति ज्यौँति गौँरायु गौँरायु.ज्यौँति,रभिप्लवो द्व्यहो, द्वे ह्येव सामनी भवतो, बृहद्रथन्तर ए,वाभिप्लव एकाह- एकाहस्य स्तोमै स्तायते, चतुर्णा मुक्थ्याना न्द्वादशस्तोत्राण्यतिरिच्यन्ते, स सप्तमोऽग्निष्टोम- स्तथा खलु सप्ताग्निष्टोमा मासि सम्पद्यन्त इति ब्राह्मणम्।। 5.1।।

5.2 अथातो गाधप्रतिष्ठा, समुद्रँ वा एते प्रतरन्ति- ये सँवत्सराय दीक्षन्ते, तेषा न्तीर्थमेव प्रायणीयोऽतिरात्र,स्तीर्थेन हि प्रतरन्ति- तद्यथा समुद्र.न्तीर्थेन प्रतरेयु- स्तादृ.क्तद्गाधप्रतिष्ठा, चतुर्विंश मह र्यथोपकक्षदघ्नँ वा कण्ठदघ्नँ वा यतो विश्रम्य

प्रस्नायेयु.स्तादृक्तत्,प्रस्नेयोऽभिप्लवः प्रस्नेयः पृष्ठ्यो गाधप्रतिष्ठा ऽभिजि.द्यथोपकक्षदघ्नँ वा कण्ठदघ्नँ वा- यतो विश्रम्य प्रस्नायेयु.स्तादृक्त.न्नीविदघ्न एव प्रथम स्स्वरसामा- जानुदघ्नो द्वितीयो- गुल्फदघ्न स्तृतीयो- दीपप्रतिष्ठा विषुवान्, यथोपकक्षदघ्नँ वा कण्ठदघ्नँ वा यतो विश्रम्य प्रस्नायेयु स्तादृक्त,द्गुल्फदघ्न एव प्रथमोऽर्वाक्स्वरसामा- जानुदघ्नो द्वितीयो- नीविदघ्न स्तृतीयो गाधप्रतिष्ठा विश्वजि,द्यथोपकक्षदघ्नँ वा कण्ठदघ्नँ वा यतो विश्रम्य प्रस्नायेयु स्तादृक्तत्,प्रस्नेयः पृष्ठ्यः प्रस्नेयोऽभिप्लवः प्रस्नेयो गवायुषी- प्रस्नेयो दशरात्रो- गाधप्रतिष्ठा महाव्रतँ, यथोपकक्षदघ्नँ वा कण्ठदघ्नँ वा यतो विश्रम्य प्रस्नायेयु स्तादृक्त,त्तेषा न्तीर्थ मेवोदयनीयोऽतिरात्र,स्तीर्थेन ह्युद्यन्ति- तद्यथा समुद्र.न्तीर्थेनोदेयु स्तादृक्त,दथ ह स्माऽऽह श्वेतकेतु रारुणेय.स्सँवत्सरस्यान्वह.न्दीक्षा इति, तस्य ह पिता मुख मुदीक्ष्योवाच- वेत्थ सुत त्व.मायुष्मा.न्सँमुवत्सरस्य गाधप्रतिष्ठे इति, वेदे.त्येतद्ध स्मैत.द्विद्वा नाहेति ब्राह्मणम्।। 5.2।। (प्रस्नायेयुः- प्रश्नायेयुः इत्यत्र विचारः)

5.3 पुरुषो वाव सँवत्सरस्य, पादावेव प्रायणीयोऽतिरात्रः, पादाभ्यां हि प्रयन्ति, तयो र्यच्छुक्ल.न्तदह्नो रूपँ, यत्कृष्ण-

न्तद्रात्रे,र्नखानि नक्षत्राणां रूपँ, लोमान्योषधि-वनस्पतीना,मूरू चतुर्विंश.मह,रुरोऽभिप्लव॰ पृष्ठ्यं- पृष्ठ्य श्शिर एव त्रिवृ,त्त्रिवृतं ह्येव शिरो भवति, त्वगस्थि मज्जा मस्तिष्क.ङ्ग्रीवा॰ पञ्चदश,श्चतुर्दश ह्येवैतस्या.ङ्करूराणि भवन्ति- वीर्य्यं पञ्चदश,न्तस्मा दिय माभि रण्वीभि स्सतीभि र्गुरुं भारं हरति, तस्माद्ग्रीवा॰ पञ्चदश, उर स्सप्तदशोऽष्टा.वन्ये, जत्रवोऽष्टा.वन्य उर स्सप्तदश,न्तस्मा.दुर.स्सप्तदश उदर मेकविंशो, विंशति.र्ह्येवैतस्यान्तर उदरे कुन्तापानि भव.न्त्युदर मेकविंश,न्तस्मा दुदर मेकविंश॰ पार्श्वे त्रिणव.त्रयोदशान्या॰ पर्शव.स्त्रयोदशान्या॰- पार्श्वे त्रिणवे, तस्मात्पार्श्वे त्रिणवोऽनूक,न्त्रयस्त्रिंशो द्वात्रिंश.द्ध्येवैतस्य पृष्टी कुण्डी उलानि भव.न्त्यनूक न्त्रयस्त्रिंश,न्तस्मा.दनूक न्त्रयस्त्रिंश,स्तस्यायमेव दक्षिणो बाहु रभिजि,त्तस्येमे दक्षिणे त्रय॰ प्राणा स्स्वरसामान, आत्मा विषुवां-स्तस्येमे सव्ये त्रय॰ प्राणा अर्वाक्स्वरसामान,स्तस्यायं सव्यो बाहु र्विश्वजि,दुक्तौ पृष्ठ्याभिप्लवौ, या.ववाञ्चौ प्राणौ- ते गवायुषी, अङ्गानि दशरात्रो- मुखं

महाव्रत,न्तस्य हस्ता.वेवोदयनीयोऽतिरात्रो, हस्ताभ्यां ह्युद्यन्ति य एवँ वेद, स वा एष सँवत्सरः।। 5.3।।

5.4 पुरुषो वाव सँवत्सर,स्तस्य प्राण एव प्रायणीयोऽतिरात्रꣳ, प्राणेन हि प्रयन्ति- वागारम्भणीय.मह,र्यद्य.दारभते वागारभते- वाचैव तदारभते, तस्यायमेव दक्षिणꣳ पाणि रभिप्लव,स्तस्येदं प्रातस्सवन- मिदं माध्यन्दिनं सवन- मिद न्तृतीयसवन-ङ्गायत्र्या आयतने, तस्मा दिय मस्यै ह्रसिष्ठा, तस्येदं प्रातस्सवन- मिदं माध्यन्दिनं सवन- मिद न्तृतीयसवन न्त्रिष्टुभ आयतने- तस्मा दिय.मस्यै वरिष्ठा, तस्येदं प्रातस्सवन -मिदं माध्यन्दिनं सवन- मिद न्तृतीयसवन.ञ्जगत्या आयतने- तस्मा दिय मनयो र्वरिष्ठा, तस्येदं प्रातस्सवन- मिदं माध्यन्दिनं सवन- मिद.न्तृतीयसवनं- पङ्क्त्या आयतने- पृथुरिव वै पङ्क्ति स्तस्मा दिय.मासां प्रतिष्ठा, तस्येदं प्रातस्सवन- मिदं माध्यन्दिनं सवन -मिद.न्तृतीयसवनँ विराज आयतने-ऽन्नँ वै श्री र्विरा.डन्नाद्यस्य श्रियोऽवरुद्ध्यै- तस्मा दिय.मासाँ वरिष्ठा, तस्येदं प्रातस्सवन- मिदं माध्यन्दिनं सवन- मिद न्तृतीयसवन मतिच्छन्दसा मायतने-ऽतिच्छन्दो वै छन्दसा मायतन-न्तस्मादिदं प्रतिष्ठं फलक,न्तस्येदं प्रातस्सवन- मिदं

माध्यन्दिनं सवन- मिद.न्तृतीयसवनं, सैत स्सैतोऽभिप्लव स्सैत आत्मा पृष्ठ्यꣳ, प्लवतीवाभिप्लव.स्तिष्ठतीव पृष्ठ्यꣳ, प्लवत इव ह्येव मङ्गै स्तिष्ठतीवाऽऽत्मना, तस्यायमेव दक्षिणꣳ कर्णोऽभिजि,त्तस्य यद्दक्षिण मक्ष्ण श्शुक्लं, स प्रथम स्स्वरसामा, यत्कृष्णं स द्वितीयो, यन्मण्डलं स तृतीयो, नासिके विषुवान्, मण्डलमेव प्रथमोऽर्वाक्स्वरसामा, यत्कृष्णं स द्वितीयो, यच्छुक्लं स तृतीय,स्तस्यायं सव्यꣳ कर्णो विश्वजि,दुक्तौ पृष्ठ्याभिप्लवौ, या.ववाञ्चौ प्राणौ- ते गवायुषी, अङ्गानि दशरात्रो मुखं महाव्रत,न्तस्योदान एवोदयनीयोऽतिरात्र, उदानेन ह्युद्यन्ति- य एवँ वेद, स वा एष सँवत्सरः।। 5.4।।

5.5 पुरुषो वाव सँवत्सरः, पुरुष इत्येकं सँवत्सर- मित्येक इत्यत्र तत्सम,न्द्वे अहोरात्रे सँवत्सरस्य- द्वाविमौ पुरुषे प्राणा इत्यत्र तत्सम,न्त्रयो वा ऋतव स्सँवत्सरस्य- त्रय इमे पुरुषे प्राणा इत्यत्र तत्समं, षड्वा ऋतव स्सँवत्सरस्य- षडिमे पुरुषे प्राणा- इत्यत्र तत्समं, सप्त वा ऋतव स्सँवत्सरस्य- सप्तेमे पुरुषे प्राणा इत्यत्र तत्सम,न्द्वादश मासा स्सँवत्सरस्य- द्वादशेमे पुरुषे प्राणा इत्यत्र तत्सम,न्त्रयोदश मासा स्सँवत्सरस्य- त्रयोदशेमे पुरुषे प्राणा इत्यत्र

तत्सम,ञ्चतुर्विंशति रर्धमासा स्सँवत्सरस्य- चतुर्विंशोऽयं पुरुषो विंशत्युङ्गुलि श्चतुरङ्ग इत्यत्र तत्समं, षड्विंशति रर्धमासा स्सँवत्सरस्य- षड्विंशोऽयं पुरुषः- प्रतिष्ठे षड्विंशे इत्यत्र तत्सम,न्त्रीणि च ह वै शतानि षष्टिश्च सँवत्सरस्या ऽहोरात्राणी.त्येतावन्त एव पुरुषस्य प्राणा इत्यत्र तत्समं, सप्त च ह वै शतानि विंशतिश्च सँवत्सरस्याहानि च रात्रय श्चेत्येतावन्त एव पुरुषस्यास्थीनि च मज्जान.श्चेत्यत्र तत्सम,ञ्चतुर्दश च ह वै शतानि चत्वारिंशच्च सँवत्सरस्यार्धाहा.श्चार्धरात्रय श्चेत्येतावन्त एव पुरुषस्य स्थूरामांसानीत्यत्र तत्सम,मष्टाविंशतिश्च ह वै शता.न्यशीतिश्च सँवत्सरस्य पादाहाश्च पादरात्रय श्चे-त्येतावन्त एव पुरुषस्य स्नावा बन्ध्या इत्यत्र तत्सम,न्दश च ह वै सहस्राण्यष्टौ च शतानि सँवत्सरस्य मुहूर्त्ता- इत्येतावन्त एव पुरुषस्य पेशशमरा इत्यत्र तत्समँ, यावन्तो मुहूर्त्ताः पञ्चदशकृत्व.स्तावन्तः प्राणा- यावन्तः प्राणाः पञ्चदशकृत्व स्तावन्तोऽपाना, यावन्तोऽपानाः पञ्चदशकृत्व.स्तावन्तो व्याना, यावन्तो व्यानाः पञ्चदशकृत्व.स्तावन्त स्समाना, यावन्त स्समानाः पञ्चदशकृत्व स्तावन्त उदाना, यावन्त उदानाः पञ्चदशकृत्व स्ताव.न्त्येतादीनि,

यावन्त्येतादीनि तावन्त्येतर्हीणि, यावन्त्येतर्हीणि तावन्ति स्वेदायनानि, यावन्ति स्वेदायनानि तावन्ति क्षिप्रायणानि, यावन्ति क्षिप्रायणानि तावन्तो रोमकूपा, यावन्तो रोमकूपाः पञ्चदशकृत्व स्तावत्यो वर्षतो धारा,स्तदेत.त्क्रोशशतिकं परिमाणम्। तदप्येत दृचोक्तम्।

卐 श्रमा.दुन्यत्र परि वर्तमान श्चरत्वासीनो यदि वा स्वपन्नपि।
अहोरात्राभ्यां पुरुषः~ क्षणेन कतिकृत्वः प्राणिति चापानिति च।।

卐 शतं शतानि परिवत्सराणा मष्टौ शतानि मुहूर्त्तान् यान् वदन्ति।
अहोरात्राभ्यां पुरुष स्समेन कतिकृत्वः प्राणिति चापानिति चे.ति ब्राह्मणम्।। 5.5।।

5.6 सँवत्सरस्य समता वेदितव्येति ह स्माऽह वा स्यु,रेकमेव पुरस्ता.द्विषुवतोऽतिरात्र मुपयन्त्येक मुपरिष्टा,त्त्रिपञ्चाशतमेव पुरस्ता द्विषुवतोऽग्निष्टोमा नुपयन्ति त्रिपञ्चाशत मुपरिष्टा,द्विंशति.शतमेव पुरस्ता द्विषुवत उक्थ्या.न्युपयन्ति विंशति शत मुपरिष्टात्,षडेव पुरस्ता द्विषुवत ष्षोडशिन उपयन्ति षडुपरिष्टा,त्त्रिंशदेव पुरस्ता द्विषुवत ष्षडहा नुपयन्ति त्रिंशदुपरिष्टा,त्सैषा सँवत्सरस्य समता, स य एव मेतां सँवत्सरस्य

समताँ वेद, सँवत्सरेण साऽत्मा सलोको भूत्वा, देवा.नप्येतीति ब्राह्मणम्।। 5.6।।

5.7 अथातो यज्ञक्रमा, अग्न्याधेय मग्न्याधेया.त्पूर्णाऽऽहुतिः, पूर्णाऽऽहुते रग्निहोत्र,मग्निहोत्रा द्दर्शपूर्णमासौ, दर्शपूर्णमासाभ्या माग्रयण,माग्रयणा च्चातुर्मास्यानि, चातुर्मास्येभ्यः पशुबन्धः, पशुबन्धा दग्निष्टोमो,ऽग्निष्टोमा द्राजसूयो, राजसूया द्वाजपेयो, वाजपेया दश्वमेधो,ऽश्वमेधा त्पुरुषमेधः, पुरुषमेधा त्सर्वमेध,स्सर्वमेधा द्दक्षिणावन्तो, दक्षिणावद्भ्यो ऽदक्षिणा, अदक्षिणा स्सहस्रदक्षिणे प्रत्यतिष्ठं,स्ते वा एते यज्ञक्रमा,स्स य एव मेतान् यज्ञक्रमान् वेद- यज्ञेन साऽत्मा सलोको भूत्वा देवा नप्येतीति ब्राह्मणम्।। 5.7।।

5.8 प्रजापति रकामयताऽऽनन्त्य मश्नुवीयेति, सोऽग्नी नाधाय पूर्णाऽऽहुत्याऽयजत, सोऽन्त मेवापश्य,त्सोऽग्निहोत्रेणेष्ट्वाऽन्त मेवापश्य,त्स दर्शपूर्णमासाभ्या मिष्ट्वाऽन्त मेवापश्य,त्स आग्रयणेनेष्ट्वाऽन्त मेवापश्य,त्स चातुर्मास्यै रिष्ट्वाऽन्त मेवापश्य,त्स पशुबन्धेनेष्ट्वाऽन्त मेवापश्य,त्सोऽग्निष्टोमेनेष्ट्वाऽन्त मेवापश्य,त्स राजसूयेनेष्ट्वा राजेति नामाधत्त- सोऽन्त मेवापश्य,त्स वाजपेयेनेष्ट्वा

सम्राडिति नामाधत्त सोऽन्त मेवापश्य,त्सोऽश्वमेधेनेष्ट्वा स्वराडिति नामाधत्त- सोऽन्त मेवापश्य,त्स पुरुषमेधेनेष्ट्वा विराडिति नामाधत्त- सोऽन्त मेवापश्य,त्स सर्वमेधेनेष्ट्वा सर्वराडिति नामाधत्त- सोऽन्त मेवापश्य,त्सोऽहीनै र्दक्षिणावद्भि रिष्ट्वाऽन्त मेवापश्य,त्सोऽहीनै रदक्षिणावद्भि रिष्ट्वाऽन्त मेवापश्य,त्स सत्रेणोभयतोऽतिरात्रेणान्ततो ऽयजत, वाचं ह वै होत्रे प्रायच्छ,त्प्राण मध्वर्यवे- चक्षु रुद्गात्रे- मनो ब्रह्मणेऽङ्गानि होत्रकेभ्य- आत्मानं सदस्येभ्य, एव मानन्त्य मात्मान न्दत्वाऽऽनन्त्य माश्नुत, तद्या दक्षिणा अन्य.त्ताभि रात्मान न्निष्क्रीणीय, तस्मादेतेन ज्योतिष्टोमेना-ग्निष्टोमेनाऽऽत्मनिष्क्रयणेन सहस्रदक्षिणेन पृष्ठशमनीयेन त्वरेत, यो ह्यनिष्ट्वा पृष्ठशमनीयेन प्रै,त्याऽऽत्मानं सो ऽनिष्क्रीणीय प्रैतीति ब्राह्मणम्।। 5.8।।

5.9 यद्वै सँवत्सराय सँवत्सरसदो दीक्षन्ते- कथ मेषा मग्निहोत्र मनन्तरितं भवति- व्रतेनेति ब्रूया,त्कथमेषा न्दर्शोऽनन्तरितो भवति- दध्ना च पुरोडाशेन चेति ब्रूया,त्कथमेषां पौर्णमास मनन्तरितं भव- त्याज्येन च पुरोडाशेन चेति ब्रूया,त्कथ मेषा माग्रयण मनन्तरितं भवति- सौम्येन चरुणेति ब्रूया,त्कथ मेषा

श्चातुर्मास्या.न्यनन्तरितानि भवन्ति- पयसेति ब्रूया,त्कथमेषां पशुबन्धोऽनन्तरितो भवति- पशुना च पुरोडाशेन चेति ब्रूया,त्कथमेषां सौम्योऽध्वरोऽनन्तरितो भवति- ग्रहैरिति ब्रूया,त्कथमेषां गृहमेधोऽनन्तरितो भवति- धाना.करम्भै रिति ब्रूया,त्कथ मेषां पितृयज्ञो ऽनन्तरितो भव.त्यौपासनैरिति ब्रूया,त्कथ मेषां मिथुन मनन्तरितं भवति- हिङ्कारेणेति ब्रूया,त्सैषा सँवत्सरे यज्ञक्रतूना मपीति,स्स य एव मेतां सँवत्सरे यज्ञक्रतूना मपीतिँ वेद, यज्ञेन साऽऽत्मा सलोको भूत्वा देवानप्येतीति ब्राह्मणम्।। 5.9।।

5.10 देवा ह वै सहस्त्रसँवत्सराय दिदीक्षिरे, तेषां पञ्च शतानि सँवत्सराणां पर्युपेतान्यास,न्नथेदं सर्वं शुश्रुवु- र्ये स्तोमा यानि पृष्ठानि यानि शस्त्राणि, ते देवा इह सामिवाऽऽसु,रुप तँ यज्ञक्रतु.ञ्जानीमो- य.स्सहस्त्र सँवत्सरस्य प्रतिमा- को हि तस्मै मनुष्यो- य स्सहस्त्रसँवत्सरेण यजेतेति, तदयातयाममध्ये यज्ञस्यापश्यं- स्तेनाऽयातयाम्ना या वेदे व्यष्टि रासी-त्तां पञ्च.स्वपश्य दृचि यजुषि साम्नि शान्तेऽथ घोरे, ता वा एताः पञ्च व्याहृतयो भवन्ति- ओम् आश्रावया.स्तुश्रौष.ड्यज. ये यजामहे. वौषडिति, ते देवा इह सामिवाऽऽसु,रुप तँ यज्ञक्रतु.ञ्जानीमो- य.स्सहस्त्रसँवत्सरस्य

प्रतिमा- को हि तस्मै मनुष्यो य.स्सहस्रसँवत्सरेण यजेतेति- तत एत न्तापश्चितं सहस्रसँवत्सरस्याऽऽङ्गस्य मपश्यं-स्ते ह्येव स्तोमा भवन्ति- तानि पृष्ठानि तानि शस्त्राणि, स खलु द्वादश मासा न्दीक्षाभि रेति, द्वादश मासा नुपसद्भि र्द्वादश मासा.न्सु् त्याभि,रथ यद्द्वादश मासा न्दीक्षाभि रेति, द्वादश मासा नुपसद्भि,स्तेनैता.वग्न्यर्का.वाप्नो,त्यथ यद्द्वादश मासा.न्त्सुत्याभि - स्तेनेदं महदुक्थ्य मवाऽऽप्नोति, ते देवा इह सामिवाऽऽसु,रुप तँ यज्ञक्रतु.ञ्ज्ञानीमो- य.स्सहस्रसँवत्सरस्य प्रतिमा- को हि तस्मै मनुष्यो य.स्सहस्रसँवत्सरेण यजेतेति, तत एतं पृष्ठ्यं षडह न्द्वादशाहस्याऽऽङ्गस्य मपश्यं-स्ते ह्येव स्तोमा भवन्ति- तानि पृष्ठानि तानि शस्त्राणि, ते देवा इह सामिवाऽऽसु,रुप तँ यज्ञक्रतु.ञ्ज्ञानीमो- य.स्सहस्रसँवत्सरस्य प्रतिमा- को हि तस्मै मनुष्यो य.स्सहस्रसँवत्सरेण यजेतेति- तत एतं सँवत्सर न्तापश्चितस्याऽऽङ्गस्य मपश्यं-स्ते ह्येव स्तोमा भवन्ति- तानि पृष्ठानि तानि शस्त्राणि, ते देवा इह सामिवाऽऽसु,रुप तँ यज्ञक्रतु.ञ्ज्ञानीमो- य.स्सहस्र सँवत्सरस्य प्रतिमा- को हि तस्मै मनुष्यो य.स्सहस्रसँवत्सरेण यजेतेति- तत एत न्द्वादशाहं

सँवत्सरस्याऽऽञ्जस्य मपश्यं-स्ते ह्येव स्तोमा भवन्ति तानि पृष्ठानि तानि शस्त्राणि, स खलु द्वादशाह न्दीक्षाभि रेति- द्वादशाह मुपसद्भि र्द्वादशाहं सुत्याभि,रथ यद्द्वादशाह न्दीक्षाभि रेति द्वादशाह मुपसद्भि-स्तेनैता.वग्न्यर्का.वाप्यो,त्यथ यद्द्वादशाहं सुत्याभि- स्तेनेदं महदुक्थ मवाऽऽप्नोति, ते देवा इह सामिवाऽऽसु,रुप तँ यज्ञक्रतु.ञ्जानीमो य.स्सहस्रसँवत्सरस्य प्रतिमा- को हि तस्मै मनुष्यो य.स्सहस्रसँवत्सरेण यजेतेति- तत एतं पृष्ठ्यं षडह न्द्वादशाहस्याऽऽञ्जस्य मपश्यं-स्तेह्येव स्तोमा भवन्ति- तानि पृष्ठानि तानि शस्त्राणि, ते देवा इह सामिवाऽऽसु,रुप तँ यज्ञक्रतु.ञ्जानीमो-य.स्सहस्रसँवत्सरस्य प्रतिमा- को हि तस्मै मनुष्यो य.स्सहस्रसँवत्सरेण यजेतेति- तत एतँ विश्वजितं पृष्ठ्यषडहस्याऽऽञ्जस्य मपश्यं-स्त ह्येव स्तोमा भवन्ति तानि पृष्ठानि तानि शस्त्राणि, ते देवा इह सामिवाऽऽसु,रुप तँ यज्ञक्रतु.ञ्जानीमो य.स्सहस्रसँवत्सरस्य प्रतिमा- को हि तस्मै मनुष्यो य.स्सहस्रसँवत्सरेण यजेतेति- स वा एष विश्वजि.द्य.स्सहस्रसँवत्सरस्य प्रति.मैष ह प्रजानां प्रजापति र्यद्विश्वजि.दिति ब्राह्मणम्।। 5.10।।

5.11 पुरुषं ह वै नारायणं प्रजापति रुवाच- यजस्व यजस्वेति, स होवाच- यजस्व यजस्वेत्येवं हाऽऽत्थ मा, त्रिरयक्षते.मे वसवः प्रातस्सवनेनाऽऽगू- रुद्रा माध्यन्दिनसवनेनाऽऽदित्या स्तृतीयसवनेन, यज्ञवास्तुन्येव पर्यशिषो, यज्ञवास्तु.मित्येव.माशिषोऽहँ वा एतद्वेद, यत्ते वसवः प्रातस्सवनेनाऽऽगू रुद्रा माध्यन्दिनसवनेनाऽऽदित्या स्तृतीयसवनेन, यज्ञवास्तुन्येव पर्यशिषो- यज्ञवास्तु.मित्येव माशिषो विद्वांसो नूनन्त्वा याजयेयु,रेते ह वा अविद्वांसो यत्रानृग्वि.द्धोता भव- त्ययजुर्वि.दध्वर्यु-रसामवि.दुद्गाता-ऽभृग्वङ्गिरोवि.द्ब्रह्मा, यजस्वैव, हन्त तु ते तद्वक्ष्यामि- यथा सूत्रे मणिरिव सूत्र मेता.न्युक्थाहानि भवन्ति, सूत्रमिव वा मणा.विति, तस्माद्य एव सर्ववित्स्या,त्तं ब्रह्माणं कुर्वी.तैष ह वै विद्वा.न्त्सर्ववि.द्ब्रह्मा- यद्भृग्वङ्गिरोवि,देते ह वा अस्य सर्वस्य शमयितारः पालयितार,स्तस्मा.द्ब्रह्मा स्तुते बहिष्पवमाने वाचयति।। 5.11।।

卐 5.12 श्येनोऽसि गायत्रछन्दा अनु त्वाऽऽरभे- स्वस्ति मा सं पारयेति-, स यदाह श्येनोऽसीति सोमँ वा एतदा.हैष ह वा अग्नि र्भूत्वाऽस्मि.न्लोके संश्याययति, तद्य.त्संश्याययति तस्माच्छ्येन,

स्तच्छ्येनस्य श्येनत्वं, स यदाह गायत्रछन्दा अनु त्वाऽऽरभ इति गायत्रेण छन्दसा वसुभि र्देवैः प्रातस्सवनेऽस्मि न्लोकेऽग्निं सन्त मन्वारभते, स यदाह स्वस्ति मा सं पारयेति गायत्रेणैव छन्दसा वसुभि र्देवैः प्रातस्सवनेऽस्मि न्लोकेऽग्निं सन्त मन्वारभते, स यदाह स्वस्ति मा सम्पारयेति गायत्रेणैव छन्दसा वसुभि र्देवैः प्रातस्सवनेऽस्मि न्लोकेऽग्निना देवेन स्वस्ति सं पारयति, गायत्रेणैवैन न्तच्छन्दसा वसुभि र्देवैः प्रातस्सवनेऽस्मि न्लोकेऽग्निना देवेन स्वस्ति सं पद्यते य एवँ वेद।। 5.12।।

5.13 अथ माध्यन्दिने पवमाने वाचयति, 卐 सम्राडसि त्रिष्टुप्छन्दा अनु त्वाऽऽरभे स्वस्ति मा सम्पारयेति, स यदाह सम्राडसीति- सोमँ वा एत.दाहैष ह वै वायु र्भूत्वाऽन्तरिक्षलोके सम्राजति, तद्य.त्सम्राजति तस्मा.त्सम्राट्,तत्सम्राजस्य सम्राड्वं, स यदाह त्रिष्टुप्छन्दा अनु त्वाऽऽरभ इति त्रैष्टुभेन छन्दसा रुद्रै र्देवै र्माध्यन्दिने सवनेऽन्तरिक्षे लोके वायुं सन्त मन्वारभते, स यदाह स्वस्ति मा सं पारयेति त्रैष्टुभेनैव छन्दसा रुद्रै र्देवै र्माध्यन्दिने सवनेऽन्तरिक्षलोके वायुना देवेन स्वस्ति मा सम्पारयेति,

त्रैष्टुभेनैवैन.न्तच्छन्दसा रुद्रै दैंवै र्माध्यन्दिने सवनेऽन्तरिक्षलोके वायुना देवेन स्वस्ति सं पद्यते य एवँ वेद।। 5.13।।

5.14 अथाऽऽर्भवे पवमाने वाचयति, ॐस्वरोऽसि गयोऽसि जगच्छन्दा अनु त्वाऽऽरभे स्वस्ति मा सम्पारयेति-, स यदाह स्वरोऽसीति सोमँ वा एत.दाहैष ह वै सूर्यो भूत्वाऽमुष्मि न्लोके स्वरति, तद्य.त्स्वरति तस्मा त्स्वर,स्त.त्स्वरस्य स्वरत्वं, स यदाह गयोऽसीति सोमँ वा एत.दाहैष ह वै चन्द्रमा भूत्वा सर्वा.न्लोका न्गच्छति, तद्य.द्गच्छति तस्माद्गय,स्तद्गयस्य गयत्वं, स यदाह जगच्छन्दा अनु त्वाऽऽरभ इति जागतेन छन्दसाऽऽदित्यै दैंवै स्तृतीयसवनेऽमुष्मि न्लोके सूर्य्यं सन्त.मन्वारभते, स यदाह स्वस्ति मा सम्पारयेति जागतेनैव छन्दसाऽऽदित्यै दैंवै स्तृतीयसवनेऽमुष्मिन्लोके सूर्येण देवेन स्वस्ति सम्पारयेति- जागतेनैवैन.न्तच्छन्दसा ऽऽदित्यै दैंवै स्तृतीय सवने ऽमुष्मि न्लोके सूर्येण देवेन स्वस्ति सं पद्यते य एवँ वेद।। 5.14।।

5.15 अथ संस्थिते संस्थिते सवने वाचयति, ॐमयि भर्गो मयि महो मयि यशो मयि सर्व-मिति-, पृथिव्येव भर्गो-ऽन्तरिक्ष एव महो- द्यौरेव यशो-ऽप एव सर्व,मग्नि रेव भर्गो- वायुरेव मह-

आदित्य एव यश- श्चन्द्रमा एव सर्वँ, वसव एव भर्गो- रुद्रा एव मह- आदित्या एव यशो- विश्वे देवा एव सर्व,ङ्गायत्र्येव भर्ग- स्त्रिष्टुबेव महो- जगत्येव यशो- ऽनुष्टुबेव सर्वं, प्राच्येव भर्गः- प्रतीच्येव मह- उदीच्येव यशो- दक्षिणैव सर्वँ, वसन्त एव भर्गो- ग्रीष्म एव महो- वर्षा एव यश- श्शरदेव सर्व,न्त्रिवृदेव भर्गः- पञ्चदश एव मह- स्सप्तदश एव यश- एकविंश एव सर्व,मृग्वेद एव भर्गो- यजुर्वेद एव मह- स्सामवेद एव यशो- ब्रह्मवेद एव सर्वं, होतैव भर्गो-ऽध्वर्युरेव मह- उद्गातैव यशो- ब्रह्मैव सर्वँ, वागेव भर्गः- प्राण एव मह- श्चक्षुरेव यशो- मन एव सर्वम्।। 5.15।।

5.16 स यदाह मयि भर्ग इति- पृथिवी मेवैतँ लोकाना माहा.ऽग्नि न्देवानाँ- वसून्देवा न्देवगणानां- गायत्र ञ्छन्दसां- प्राची न्दिशाँ- वसन्त मृतूना- न्त्रिवृतं स्तोमाना-मृग्वेदँ वेदानां- हौत्रं होत्रकाणाँ- वाच मिन्द्रियाणाम्।। 5.16।।

5.17 स यदाह मयि मह- इत्यन्तरिक्ष मेवैतँ लोकाना माह, वायु न्देवानां- रुद्रा न्देवा न्देवगणाना- न्त्रैष्टुभ ञ्छन्दसां- प्रतीची न्दिशा- ङ्ग्रीष्म मृतूनां- पञ्चदशं स्तोमानाँ- यजुर्वेदं वेदाना- माध्वर्यवं होत्रकाणां- प्राण मिन्द्रियाणाम्।। 5.17।।

5.18 स यदाह मयि यश इति- दिव मेवैतँ लोकाना माहा,ऽऽदित्य न्देवाना- मादित्या न्देवा न्देवगणाना-ञ्जागत ञ्छन्दसा- मुदीची न्दिशाँ- वर्षा ऋतूनां- सप्तदशं स्तोमानां- सामवेदँ वेदाना- मौद्गात्रं होत्रकाणा- ञ्चक्षु रिन्द्रियाणाम्।। 5.18।।

5.19 स यदाह मयि सर्व- मित्यप एवैतँ लोकाना माह, चन्द्रमस न्देवानाँ- विश्वा न्देवा न्देवगणाना- मनुष्टुभ.ञ्छन्दसा- न्दक्षिणा न्दिशां- शरद.मृतूना- मेकविंशं स्तोमानां- ब्रह्मवेदँ वेदानां- ब्रह्मत्वं होत्रकाणां- मन इन्द्रियाणाम्।। 5.19।।

5.20 स वा एष दशधा चतु स्सम्पद्यते, दश च ह वै चतुर्विराजोऽक्षराणि, तद्गर्भा उपजीवन्ति, श्रीर्वै विराड्यशोऽन्नाद्यं श्रिय मेव तद्विराजँ यशस्यन्नाद्ये प्रतिष्ठापयति, प्रतितिष्ठन्ती रिदं सर्व मनु प्रति तिष्ठति, प्रति तिष्ठति प्रजया पशुभि र्य एवँ वेद।। 5.20।।

5.21 अनर्वाणं ह वै देव.न्दध्य.ङ्ङाङ्गिरस मुपसीदं ह, यज्ञस्य श्रुष्टिं समश्नवामहा इति, स दध्य.ङ्ङाङ्गिरसोऽब्रवी-द्यो वै सप्तदशं प्रजापतिं यज्ञेऽन्वितँ वेद- नास्य यज्ञो रिष्यति न यज्ञपतिं रिष्यन्त इति, ता वा एताः पञ्च व्याहृतयो भवन्ति। ओं आश्राव.यास्तु श्रौषड्यज- ये यजामहे- वौषडिति, स दध्य.ङ्ङाङ्गिरसोऽब्रवी-न्न वयँ

विद्मो यदि ब्राह्मणा.स्स्मो- यद्यब्राह्मणा.स्स्मो, यदि तस्यऋषे स्मो-यदि नान्यस्ये,त्यनर्वाणञ्च ह वा ऋतावन्तश्च पितर स्स्वधाया मावृषायन्त- वयँ वदामहै '3' वयं वदामहा '3' इति, सोऽया.त्स्वायम्भुवो वा ऋतावन्तो मदेयाताँ- न वयँ वदामहा 3 इति, तस्मात्प्रवरे प्रव्रियमाणे वाचये- देवाः पितर इति तिस्रो, य एति सँयजति स भवति, यश्च न ब्रूते यश्च न ब्रूत इति ब्राह्मणम्।। 5.21।।

5.22 सावित्रं ह स्म वैतं पूर्वे पुरस्ता.त्पशु माऽलभन्त इत्येतर्हि प्रजापत्यं, यो ह्येव सविता स प्रजापतिरिति वदन्त,स्तस्मादु समुप्याग्नीं-स्तेन यजेरं-स्ते समानधिष्ण्या एव स्यु -रोखा सम्भरणीया- या उखा सम्भरणीया, याँ विन्युप्याग्नीं-स्तया यजेरं-स्ते नानाधिष्ण्या एव स्यु.रा दीक्षणीयाया, दीक्षणीयायां सन्न्युप्याग्नीं-स्तेन यजेरं-स्ते समानधिष्ण्या एव स्यु रोदवसानीयाया, उदवसानीयायाँ विन्युप्याग्नीं-स्तया यजेरं-स्ते नानाधिष्ण्या एव स्यु,रथ यजमानस्योपतपे-त्पार्श्वतोऽग्नी नाधाय ताव.दासीत, यावद्दग्ध स्स्या,द्यदि प्रेया त्स्वैरेव तमग्निभि र्दहे,द्दश वा

अग्निभि रितरे यजमाना आसत इति वदन्त,स्तस्य तदेव ब्राह्मणँ यदद॰ पुरस्सवने, पितृमेध आशिषो व्याख्याताः।। 5.22 ।।

5.23 卐 सायं प्रातर्होमौ स्थालीपाको नवश्च यः।

बलिश्च पितृयज्ञ श्चाष्टका सप्तम॰ पशु- रित्येते पाकयज्ञाः।

अग्न्याधेय मग्निहोत्रं पौर्णमास्यमावास्ये।

नवेष्टि श्चातुर्मास्यानि पशुबन्धोऽत्र सप्तम- इत्येते हविर्यज्ञाः।

अग्निष्टोमो ऽत्यग्निष्टोम उक्थ्य ष्षोडशिमां-स्ततः।

वाजपेयोऽतिरात्र श्चाप्तोर्यामोऽत्र सप्तम- इत्येते सुत्याः।

केस्वि.द्देवा॰ प्रवो वाजा॰ केस्वि द्देवा अभिद्यवः।

केस्वि द्देवा हविष्मन्त॰ किंस्वि ज्जिगाति सुम्नयुः।

ऋतव एव प्रवो वाजा मासा देवा अभिद्यवः।

अर्धमासा हविष्मन्त स्तज्जिगाति सुम्नयुः।

कति स्विद्रात्रय॰ कत्यहानि कति स्तोत्राणि कति शस्त्राण्यस्य।

कतिचि.त्सवना स्सँवत्सरस्य स्तोत्रिया॰ पदाक्षराणि कत्यस्य।

द्वावतिरात्रौ षड्ढत मग्निष्टोमा द्वे विंशति-शते उक्थ्यानाम्।

द्वादश षोडशिन ष्षष्टि ष्षडहा वैषुवतञ्च।

अहान्यस्य विंशति शतानि त्रीण्यह.श्चैक न्तावदस्य।

सँवत्सरस्य सवना स्सहस्त्र मशीति त्रीणि च संस्तुतस्य।
षड्वष्टिश्च द्वे च शते च भवत स्तुतशस्त्राणा मयुतञ्चैक मस्य।
स्तोत्रियाश्च नवतिसहस्त्रा द्वे नियुते नवतिश्चातिषड्व।
अष्टौ शतान्ययुतानि त्रिंश श्चतुर्नवतिश्च पदान्यस्य।
सँवत्सरस्य कविभि र्मितस्यैतावती मध्यमा देवमात्रा।
अयुतमेकं प्रयुतानि त्रिंशद् द्वे नियुते तथा ह्यनुसृष्टाः।
अष्टौ शतानि नव चाक्षराण्येतावा नात्मा परमꣳ प्रजापतेः।
आद्य वषट्कारꣳ प्रदानान्त मेत मग्निष्टोमे पर्वश स्साधु क्लृप्तम्।
सौभेषज ञ्छन्द ईप्स न्यदग्नौ चतुश्शतं बहुधा हूयते यत्।
प्रातस्सवन स्तुत एकविंशो गायत्रस्तोम मित एक एव।
माध्यन्दिन स्सप्तदशेन क्लृप्त स्त्रयस्त्रिंशेन सवन न्तृतीयम्।। 5.23।।

5.24 卐 श्रद्धायां रेत स्तपसा तपस्वी वैश्वानर स्सिषिचेऽपत्य मीप्सन्न्।
ततो यज्ञे लोकजित् सोमजम्भा ऋषे र्ऋषि रङ्गिरा स्सम्बभूव।
ऋषे र्यज्ञस्य चतुर्विधस्य श्रद्धाँ यश्श्रेयसीँ लोक ममु.ञ्जिगाय।
यस्मै वेदाꣳ प्रसृता स्सोमबिन्दु.युक्ता वहन्ति सुकृतामु लोकम्।

ऋचोऽस्य भागां-श्चतुरो वह-न्त्युक्थशस्त्रै॰ प्रमुदो मोदमानाः।

ग्रहै र्हविर्भिश्च कृताकृतश्च यजूंषि भागां-श्चतुरो वहन्ति।

औदुम्बर्य्यां सामघोषेण तावत् सविष्टुतिभिश्च स्तोमै श्छन्दसाम्।

सामानि भागां-श्चतुरो वहन्ति गीत्या स्तोमेन सह प्रस्तावेन च।

प्रायश्चित्तै र्भैषजै स्संस्तुवन्तोऽथर्वाणोऽङ्गिरसश्च शान्ताः।

ब्रह्मा ब्रह्मत्वेन प्रमुदो मोदमाना असंसृष्टा.न्भागां-श्चतुरो वहन्ति।

यो ब्रह्मवित् सोऽभिकरोऽस्तु व श्शिवो धिया धीरो रक्षतु धर्म मेतम्।

मा व॰ प्रमत्ता ममृताच्च यज्ञात्- कामाच्च येनानङ्गिरसोऽपि यासीत्।

मायु न्दशं मारुशस्ता॰ प्रमेष्ठा मा मे भूर्युक्ता विदहाथ लोकान्।

दिव्यं भयं रक्षत धर्म मुद्यतँ यज्ञं कालाश स्तुतिगो.पलायनम्।

होता च मैत्रावरुणश्च पाद मच्छावाक स्सह ग्रावस्तुतैकम्।

ऋग्भि स्स्तुवन्तो ऽहरह॰ पृथिव्या अग्निं पादं ब्रह्मणा धारयन्ति।

अध्वर्य्यु॰ प्रतिप्रस्थाता नेष्टोन्नेता निहितं पादमेकम्।

समन्तरिक्षँ यजुषा स्तुवन्तो वायुं पादं ब्रह्मणा धारयन्ति।

साम्नोद्गाता च्छादय न्नप्रमत्त औदुम्बर्य्यां स्तोभदेय स्सगद्गदः।

विद्वान् प्रस्तोता विदहाथ सुष्टुतिं सुब्रह्मण्यः प्रतिहर्ताऽथ यज्ञे।
साम्ना दिव्येक न्निहित न्निस्तुवन्त स्सूर्य्यं पादं ब्रह्मणा धारयन्ति।
ब्रह्मा हैकं ब्राह्मणाच्छंसिन स्सह पोत्राऽऽग्नीध्रो निहितं पादमेकम्।
अथर्वभि रङ्गिरोभिश्च गुप्तोऽप्सु चन्द्रं पादं ब्रह्मणा धारयन्ति।
षोडशिकं होत्रका अभिष्टुवन्ति वेदेषु युक्ताश्च पृथक् चतुर्धा।
मनीषिणो दीक्षिता श्श्रद्दधाना होतारो गुप्ता अभिवहन्ति यज्ञम्।
दक्षिणतो ब्रह्मणस्योम् जन-दित्येताँ व्याहृति.ञ्जपन्।
सप्तदशं सदस्य न्त - ङ्कीर्तयन्ति पुरा विदुः।
अष्टादशो दीक्षितो दीक्षितानाँ यज्ञे पत्नी श्रद्दधानेह युक्ता।
एकोनविंश श्शमिता बभूव विंशो यज्ञे गृहपतिरेव सुन्वन्।
एकविंशति रेवैषां संस्थाया मङ्गिरो वह।
वेदै रभिष्टुतो लोको नानावेशापराजितः।। 5.24।।

5.25 卐 सप्त सुत्या, स्सप्त च पाकयज्ञा हविर्यज्ञा स्सप्त तथैकविंशतिः।
सर्वे ते यज्ञा अङ्गिरसोऽपि यन्ति नूतना यानृषय स्सृजन्ति ये च सृष्टाः पुराणैः।
एतेषु वेदेष्वपि चैकमेवा.पव्रज मृत्विजां सम्भरन्ति।

कूटस्तृपात् सचते तामशस्तँ विष्कन्ध मेनँ विधृतं प्रजासु।

निवर्तन्ते दक्षिणा नीयमाना स्सुते सोमे वितते यज्ञतन्त्रे।

मोघाऽऽशिषो यन्त्यनिवर्तमाना अनिष्टयज्ञा न तरन्ति लोकान्।

द्वादशवर्षं ब्रह्मचर्य्यं पृथग्वेदेषु तत्स्मृतम्।

एवँ व्यवस्थिता वेदा स्सर्वं एव स्वकर्मसु।

सन्ति चैषां समाना मन्त्राः कल्पाश्च ब्राह्मणानि च।

व्यवस्थानन्तु तत्सर्वं पृथग्वेदेषु तत्स्मृतम्।

ऋग्वेदस्य पृथिवी स्थान मन्तरिक्षस्थानोऽध्वरः।

द्यौ स्स्थानं सामवेदस्याऽऽपो भृग्वङ्गिरसां स्मृतम्।

अग्निर्दैवत ऋग्वेदस्य यजुर्वेदो वायु र्दैवता।

आदित्य स्सामवेदस्य चन्द्रमा वैद्युतश्च भृग्वङ्गिरसाम्।

त्रिवृत्स्तोम ऋग्वेदस्य यजूंषि पञ्चदशेन सह जज्ञिरे।

सप्तदशेन सामवेद एकविंशो ब्रह्मसम्मितः।

वागध्यात्म मृग्वेदस्य यजुषां प्राण उच्यते।

चक्षुषी सामवेदस्य मनो भृग्वङ्गिरसां स्मृतम्।

ऋग्भि स्सह गायत्र ञ्जागत माहु र्यजूंषि त्रैष्टुभेन सह जज्ञिरे।

उष्णिक्ककुब्भ्यां भृग्वङ्गिरसो जगत्या सामानि कवयो वदन्ति।

ऋग्भिः पृथिवीँ यजुषाऽन्तरिक्षं साम्ना दिवँ लोकजि त्सोमजम्भाः।
अथर्वभि रङ्गिरोभिश्च गुप्तो यज्ञ श्चतुष्पा.द्दिव मुद्वहेत।
ऋग्भि स्सुशस्तो यजुषा परिष्कृत स्सविष्टुत स्सामजित् मजम्भाः।
अथर्वभि रङ्गिरोभिश्च गुप्तो यज्ञ श्चतुष्पा द्दिव मारुरोह।
ऋचो विद्वान् पृथिवीँ वेद सम्प्रति यजूंषि विद्वान् बृहदन्तरिक्षम्।
दिवँ वेद सामगो यो विपश्चित्- सर्वान् लोकान् यद् भृग्वङ्गिरोवित्।
यांश्च ग्रामे यांश्चाऽऽरण्ये जपन्ति मन्त्रा न्नानार्था.न्बहुधा जनासः।
सर्वे ते यज्ञा अङ्गिरसोऽपियन्ति नूतना सा हि गति र्ब्रह्मणो याऽवराध्यां।
त्रिविष्टप न्त्रिदिव न्नाक मुत्तम न्तमेतया त्रय्या विद्ययेति।
अत उत्तरे ब्रह्मलोका महान्तोऽथर्वणा मङ्गिरसाञ्च सा गति,रथर्वणा मङ्गिरसाञ्च सा गतिरिति ब्राह्मणम्।। 5.25।।
इत्यथर्ववेदे गोपथब्राह्मणे पूर्वभागे पञ्चमः प्रपाठकः समाप्तः। पूर्वार्धं समाप्तम्

ひ गोपथ ब्राह्मणभागे उत्तरार्धम्

ऽ९ऽ उत्तरार्धे प्रथमः प्रपाठकः

6.1 अथ यद्ब्रह्मसदना.त्तृण न्निरस्यति- शोधय त्यैवैनन्त,दथोपविश-तीद मह मर्वाग्वसो स्सदने सीदामी-त्यर्वाग्वसुर्ह वै देवानां ब्रह्मा- पराग्वसु रसुराणा,न्तमेवैत त्पूर्वं सादय,-त्यरिष्टँ यज्ञ न्तनुता दि,त्यथोपविश्य जपति- बृहस्पतिर्ब्रह्मेति, बृहस्पतिर्वा आङ्गिरसो देवानां ब्रह्मा, तस्मि न्नेवैत दनुज्ञा मिच्छति, प्रणीतासु प्रणीयमानासु वाचँ यच्छ.त्या हविष्कृत उद्वादना,देतद्वै यज्ञस्य द्वार- न्तदेत दशून्य ङ्करो,तीष्टे च स्विष्टकृत्याऽनुयाजानां प्रसवादि,त्येतद्वै यज्ञस्य द्वितीय न्द्वार-न्तदेत दशून्य.ङ्करोति, यत्परिधयः परिधीयन्ते- यज्ञस्य गोपीथाय, परिधी.न्परिधत्ते- यज्ञस्य साऽत्मत्वाय, परिधी.न्त्संमार्ष्टि- पुनात्येवैन,न्त्रिर्मध्यम- न्त्रय इमे प्राणाः- प्राणा नेवाभि जयति, त्रिर्दक्षिणार्ध्य- न्त्रयो वै लोका- लोका नेवाभि जयति, त्रिरुत्तरार्ध्य-न्त्रयो वै देवलोका- देवलोका नेवाभि जयति, त्रिरुप वाजयति- त्रयो वै देवयानाः पन्थान- स्तानेवाभि जयति, ते वै द्वादश भवन्ति, द्वादश ह वै मासा स्सँवत्सर - स्सँवत्सर मेव तेन प्रीणा,त्यथो सँवत्सर मेवास्मा उप दधाति स्वर्गस्य लोकस्य समष्ट्यै।। 2.1.1।।

6.2 प्रजापतिर्वै रुद्रँ यज्ञा न्निरभज,त्सोऽकामयत- मेय मस्मा आकूति स्समृद्धि- र्यो मा यज्ञा न्निरभाक्षीदिति, स यज्ञ मभ्यायम्याऽऽविध्य,त्तदाविद्ध न्निरकृन्त,त्तत्प्राशित्र मभव,त्तदु.दयच्छ, त्तद्भगाय पर्यहरं-स्तत्प्रत्यैक्षत, तस्य चक्षुः पराऽपत,त्तस्मादाहु- रन्धो वै भग इ,त्यपि ह तन्नेच्छे- द्यमिच्छति, तत्सवित्रे पर्यहरं-स्तत्प्रत्यगृह्ण,त्तस्य पाणी प्रचिच्छेद, तस्मै हिरण्मयौ प्रत्यदधु-स्तस्मा द्धिरण्यपाणिरिति स्तुत,स्तत्पूष्णे पर्यहरं-स्तत्प्राऽऽश्ना,त्तस्य दन्ताः परोप्यन्त, तस्मादाहु- रदन्तकः पूषा पिष्टभाजन इति, तदिध्मायाऽऽङ्गिरसाय पर्यहरं-स्तत्प्राऽऽश्ना,त्तस्य शिरो व्यपत,त्तँ यज्ञ एवाकल्पय,त्स एष इध्म-स्समिधो ह पुरातन,स्तद्बर्हय आङ्गिरसाय पर्यहरं-स्तत्प्राऽऽश्ना,त्तस्याङ्गा.पर्वाणि व्यस्रंसन्त, तँ यज्ञ एवाकल्पय,त्तदेत द्बर्हिःप्रस्तरो ह पुरातन,स्तद्बृहस्पतय आङ्गिरसाय पर्यहर,त्सोऽबिभे-द्बृहस्पति- रित्थँ वावाऽऽर्तिं माऽरिष्यतीति, स एतं मन्त्र मपश्यत्- सूर्यस्य त्वा चक्षुषा प्रतीक्ष इत्यब्रवी,न्न हि सूर्यस्य चक्षुः किञ्चन हिनस्ति, सोऽबिभे,त्प्रतिगृह्णन्तं मा हिंसिष्यतीति- देवस्य त्वा सवितुः प्रसवेऽश्विनो र्बाहुभ्यां पूष्णो हस्ताभ्यां प्रसूतः

प्रशिषा प्रतिगृह्णामी-त्यब्रवी,त्सवितृप्रसूत एवैन न्तद्देवताभिः प्रत्यगृह्णा,त्तद्व्यूह्य तृणानि प्राग्दण्डं स्थण्डिले निदधाति- पृथिव्यास्त्वा नाभौ सादयामीति, पृथिवी वा अन्नानां शमयित्री- तयैवैन.च्छमयाञ्चकार, सोऽबिभे-त्प्राश्नन्तं मा हिंसिष्यती- त्यग्नेष्ट्वाऽऽस्येन प्राश्नामी- त्यब्रवी,न्न ह्यग्ने रास्य.ङ्किञ्चन हिनस्ति, सोऽबिभे-त्प्राऽऽशितं मा हिंसिष्यती-तीन्द्रस्य त्वा जठरे सादयामी- त्यब्रवी,न्न हीन्द्रस्य जठर.ङ्किञ्चन हिनस्ति, वरुणस्योदर इति, न हि वरुणस्योदर.ङ्किञ्चन हिनस्तीति।। 2.1.2।।

6.3 अथो आहु, ब्राह्मणस्योदर इ,त्यात्माऽस्याऽऽत्म न्नात्मानं मा हिंसीस्स्वाहे-त्यन्नँ वै सर्वेषां भूताना मात्मा- तेनैवैत.च्छमयाञ्चकार, प्राशित्र मनुमन्त्रयते- योऽग्नि र्नृमणा नाम ब्राह्मणेषु प्रविष्ट- स्तस्मि न्म एतत्सुहुत मस्तु। प्राशित्रं तन्मा मा हिंसी.त्परमे व्योम-न्निति, तत्सर्वेण ब्रह्मणा प्राऽऽश्ना,त्त एन न्नाहिन,त्तस्माद्यो ब्रह्मिष्ठ स्स्या,त्तं ब्रह्माणं कुर्वीत, बृहस्पतिर्वै सर्वं ब्रह्म, सर्वेण ह वा एतद्ब्रह्मणा यज्ञ न्दक्षिणत उद्यच्छते,ऽप वा एतस्मा.त्प्राणाः क्रामन्ति- य आविद्धं प्राश्ना,त्यद्भि र्मार्जयित्वा प्राणा न्त्संस्पृशते- वाङ्म आस्य न्नि,त्यमृतँ वै प्राणा अमृत मापः

प्राणानेव यथास्थान मुपाऽऽह्वयते, तदु हैक आहु- रिन्द्राय पर्यहरन्निति, ते देवा अब्रुव- न्निन्द्रो वै देवाना मोजिष्ठो बलिष्ठ- स्तस्मा एतत्परि हरन्तीति, तत्तस्मै पर्यहरं- स्तत्स ब्रह्मणा शमयाञ्चकार, तस्मादाहु रिन्द्रो ब्रह्मेति, यवमात्रं भवति- यवमात्रँ वै विषस्य न हिनस्ति, यदधस्ता दभिघारयति- तस्मा दधस्ता.त्प्रक्षरणं प्रजा, अरुर्न हिनस्ति, यदुपरिष्टा दभिघारयति- तस्मा दुपरिष्टा.त्प्रक्षरणं प्रजा, अरुर्न हिनस्ति, यदुभयतोऽभिघारय - त्युभयतोऽभिघारी प्रजा, अरु र्घातुकं स्या,द्यत्समयाऽभिहरे- दनभिविद्धँ यज्ञस्याभि विध्येत्।। 2.1.3।।

6.4 अग्रेण परिहरति, तीर्थेनैव परिहरति, वि वा एत द्यज्ञ श्छिद्यते- यत्प्राशित्रं परिहरति, यदाह- ब्रह्म.न्प्रस्थास्यामीति- बृहस्पतिर्वै सर्वं ब्रह्म, सर्वेण ह वा एतद्ब्रह्मणा यज्ञ न्दक्षिणत स्सन्दधा,त्यथो अत्र वा एतर्हि यज्ञश्श्रितो- यत्र ब्रह्मा- तत्रैव यज्ञ श्श्रित- स्तत एवैन मा लभते, यद्धस्तेन प्रमीवे- द्वेपन स्स्या,द्यच्छीर्ष्णा शीर्षक्तिमा न्त्स्या,द्यत्तूष्णी मासीतासम्प्रत्तो यज्ञ स्स्या,त्प्रतिष्ठेत्येव ब्रूया,द्वाचि वै यज्ञ श्श्रितो, यत्र ब्रह्मा- तत्रैव यज्ञ श्श्रित- स्तत एवैनं संप्रयच्छ,त्यग्नीध आदधा- त्यग्निमुखा नेवर्तू

न्प्रीणा,त्यथोत्तरासा माहुतीनां प्रतिष्ठित्या, अथो समिद्वत्येव जुहोति, परिधी.न्त्संमार्ष्टि- पुनात्यैवैना,न्त्सकृत्सकृत्सं मार्ष्टि- पराङेव ह्येतर्हि यज्ञ,श्चतु स्सं पद्यते-ऽथो चतुष्पाद॰ पशव॰- पशूना माप्त्यै, देव सवित रेतत्ते प्राऽऽहेत्याह प्रसूत्यै, बृहस्पति र्ब्रह्मेत्याह- स हि ब्रह्मिष्ठ,स्स यज्ञं पाहि स यज्ञपतिं पाहि स मां पाहि, स मां कर्मण्यं पाहीत्याह, यज्ञाय च यजमानाय च पशूना माप्त्यै।। 2.1.4।।

6.5 न वै पौर्णमास्या- न्नामावास्याया न्दक्षिणा दीयन्ते, य एष ओदन॰ पच्यते- दक्षिणैषा दीयते- यज्ञस्यर्ध्या, -इष्टी वा एतेन यद्यजते,ऽथो वा एतेन पूर्ती- य एष ओदन॰ पच्यत, -एष ह वा इष्टापूर्ती- य एनं पचति।। 5।।

6.6 द्वया वै देवा यजमानस्य गृह मागच्छन्ति- सोमपा अन्येऽसोमपा अन्ये, हुतादोऽन्येऽहुतादोऽन्य, -एते वै देवा अहुतादो- यद्ब्राह्मणा, एतद्देवत्य एष- य॰ पुराऽनीजान, एते ह वा एतस्य प्रजाया॰ पशूना मीशते, तेऽस्याप्रीता इष मूर्जं मादायाप क्रामन्ति, यदन्वाहार्य मन्वाहरति- तानेव तेन प्रीणाति, दक्षिणत स्सव्य॰ परिहर्तवा आह- दक्षिणाऽऽवृतेनैव यज्ञेन यजत, आहुतिभि

रेव देवान् हुतादः प्रीणाति, दक्षिणाभि र्मनुष्यदेवां,स्तेऽस्मै प्रीता इष मूर्जं न्नियच्छन्ति।। 2.1.6।।

6.7 देवाश्च ह वा असुरा श्चास्पर्धन्त, ते देवाः प्रजापति मेवाभ्ययज.न्तान्योऽन्यस्याऽऽस- न्नसुरा अजुहवु,स्ते देवा एत मोदन मपश्यं-स्तं प्रजापतये भाग मनुनिरपं-स्तं भागं पश्य.न्प्रजापति- र्देवा नुपाऽऽवर्तत, ततो देवा अभव- न्पराऽसुरा,स्स य एवँ विद्वा नेत मोदनं पचति, भव त्यात्मना- पराऽस्याप्रियो भ्रातृव्यो भवति, प्रजापतिर्वै देवेभ्यो भागधेयानि व्यकल्पय,त्सोऽमन्यताऽऽत्मान मन्त रगादिति, स एत मोदन मभक्त मपश्य,त्तमात्मने भाग न्निरवप,त्प्रजापतेर्वा एष भागो- ऽपरिमितस्स्या- दपरिमितो हि प्रजापतिः, 卐 प्रजापते र्भागोऽस्यूर्जस्वा न्पयस्वा नक्षितोऽस्यक्षित्यै त्वा, मा मे क्षेष्ठा अमुत्रामुष्मि न्लोक इह च, प्राणापानौ मे पाहि- समानव्यानौ मे पा- ह्युदानरूपे मे पा-ह्यूर्गस्यूर्जं मे धेहि, कुर्वतो मे मा क्षेष्ठा, ददतो मे मोपदसः, प्रजापति मह न्त्वया समक्ष मृध्यास-मिति, प्रजापति मेव समक्ष मृध्नोति- य एवँ वेद- य एवँ वेद।। 2.1.7।।

6.8 ये वा इह यज्ञै राध्नुवं-स्तेषा मेतानि ज्योतींषि- यान्यमूनि नक्षत्राणि, तन्नक्षत्राणा न्नक्षत्रत्वँ- यन्न क्षियन्ति, दर्शपूर्णमासौ वै यज्ञस्यावसानदर्शौ, ये वा अनिष्ट्वा दर्शपूर्णमासाभ्यां सोमेन यजन्ते- तेषा मेतानि ज्योतींषि- यान्यमूनि नक्षत्राणि पतन्तीव, तद्यथा ह वा इद मस्पष्टावसाने- नेहावसास्यसि- नेहाव सास्यसीति नोनुद्यन्त- एवं हैवैतेऽमुष्मा ल्लोका न्नोनुद्यन्ते, त एते प्रच्यवन्ते।। 2.1.8।।

6.9 यस्य हवि र्निरुप्तं पुरस्ता च्चन्द्रमा अभ्युदिया,त्तां-स्त्रेधा तण्डुला न्विभजे,द्ये मध्यमा-स्ता.नग्नये दात्रेऽष्टाकपाल न्निर्वपे,द्ये स्थविष्ठा- स्तानिन्द्राय प्रदात्रे दधनि चरुँ, ये क्षोदिष्ठा- स्ता.न्विष्णवे शिपिविष्टाय शृते चरुं, पशवो वा एतेऽति रिच्यन्ते- तानेवाऽऽप्नोति- तानवरुन्धे,ऽग्निर्वै मध्यमस्य दा.तेन्द्रो वै ज्येष्ठस्य प्रदाता, यदेवेद ङ्क्षुद्रं पशूना-न्तद्विष्णो शिशपिविष्ट-न्तदेवाऽऽप्नोति- पशूनेवाव रुन्धे।। 2.1.9।।

6.10 या पूर्वा पौर्णमासी साऽनुमति,र्योत्तरा सा राका, या पूर्वाऽमावास्या सा सिनीवाली, योत्तरा सा कुहू,श्चन्द्रमा एव धाता च विधाता च, यत्पूर्णोऽन्याँ वस.त्यपूर्णोऽन्या-न्तन्मिथुनँ, यत्पश्य.त्यन्या.न्नान्या-न्तन्मिथुनँ, यदमावास्याया श्चन्द्रमा अधि

प्रजायते- तन्मिथुन,न्तस्मा देवास्मै मिथुना.त्पशू न्प्रजनयते।। 2.1.10।।

6.11 न द्वे यजेत, यत्पूर्वया सम्प्रति यजे.तोत्तरया छम्बट्कुर्या,द्यदुत्तरया सम्प्रति यजेत पूर्वया छम्बट्कुर्या,न्नेष्टि र्भवति- न यज्ञ,स्तदनु ह्रीतमुख्यपगल्भो जायत, -एकामेव यजेत- प्रगल्भो हैव जायते,ऽनादृत्य त.द्वे यजेत- यज्ञमुखमेव पूर्वयाऽऽलभते- यजत उत्तरया, देवता एव पूर्वयाऽऽप्नोतीन्द्रिय मुत्तरया, देवलोकमेव पूर्वयाऽव रुन्धे- मनुष्यलोक मुत्तरया, भूयसो यज्ञक्रतू नुपै,त्येष ह वै सुमना नामेष्टि,र्यमद्येजानꣳ पश्चा च्चन्द्रमा अभ्युदिया,दस्मा अस्मि न्लोक आर्धुकं भवति।। 2.1.11।।

6.12 आग्नावैष्णव मेकादशकपाल न्निर्वपे.द्दर्शपूर्णमासा. वारिप्समाणो,ऽग्निर्वै सर्वा देवता- विष्णु र्यज्ञो- देवताश्चैव यज्ञश्चाऽऽरभत ऋध्या,-ऋद्ध्योत्ये,-वोभौ सहाऽऽरम्भावित्याहु,ष्रुदिन्नु श्रृङ्गे श्रितो मुच्यत इति, दर्शो वा एतयोꣳ पूर्वꣳ- पौर्णमास उत्तरो,ऽथ यत्परस्ता त्पौर्णमास आरभ्यते- तद्यथापूर्व.क्रियते, तद्यत्पौर्णमास मारभमाण- स्सरस्वत्यै चरु न्निर्वपे-त्सरस्वते द्वादशकपाल,ममावास्या वै

सरस्वती- पौर्णमास स्सरस्वा नि,त्युभावेवैनौ सहाऽऽरभत ऋध्या, - ऋध्नोत्येव।। 2.1.12।।

6.13 अग्नये पथिकृतेऽष्टाकपाल न्निर्वपे- द्यस्य प्रज्ञातेष्टि रतिपद्यते, बहिष्पथँ वा एष एति- यस्य प्रज्ञातेष्टि रतिपद्यते,ऽग्निर्वै देवानां पथिकृ,त्तमेव भागधेयेनोपासर,त्स एनं पन्थान मपि नय,त्यनड्वा न्दक्षिणा, स हि पन्थान मभिवहति।। 2.1.13।।

6.14 अग्नये व्रतपतयेऽष्टाकपाल न्निर्वपे-द्य आहिताग्नि स्सम्प्रवसे,द्बहु वा एष व्रत मति पातयति- य आहिताग्नि स्सम्प्रवसति- व्रत्येऽहनि स्त्रियँ वोपैति- मांसँ वाऽश्ना,त्यग्निर्वै देवानाँ व्रतपति- रग्नि मेतस्य व्रत मगा,त्तस्मा देतस्य व्रत मालम्भयते।। 2.1.14।।

6.15 अग्नये व्रतभृतेऽष्टाकपाल न्निर्वपे-द्य आहिताग्नि रार्तिज मश्रु कुर्या,दानीतो वा एष देवानाँ य आहिताग्नि,स्तस्मादेतेनाश्रु न कर्तव्य,न्न हि देवा अश्रु कुर्व,न्त्यग्निर्वै देवानाँ व्रतभृ- दग्नि मेतस्य व्रत मगा,त्तस्मा देतस्य व्रत मालम्भयते।। 2.1.15।।

6.16 ऐन्द्राग्न मुत्सन्न मनुसृष्ट मालभेत- यस्य पिता पितामह स्सोमन्न पिबे,दिन्द्रियेण वा एष वीर्येण व्यृध्यते- यस्य पिता

पितामह स्सोमन्न पिबति, यदैन्द्र- इन्द्र इन्द्रियेणैवैन न्तद्वीर्येण समर्धयति, देवताभिर्वा एष वीर्येण व्यृध्यते- यस्य पिता पितामह स्सोमन्न पिबति, यदाग्नेयो-ऽग्निर्वै सर्वा देवता- स्सर्वाभिरेवैन न्तद्देवताभि स्समर्धय,त्यनुसृष्टो भव- त्यनुसृष्ट इव ह्येतस्य सोमपीथो- यस्य पिता पितामह स्सोमन्न पिबति, तस्मादेष एव तस्या देवताया॰ पशूनां समृद्धः।। 2.1.16।।

6.17 देवा वा ओषधीषु पक्वास्वाजि मयु,स्स इन्द्रोऽवे-दग्नि र्वावेमा॰ प्रथम उज्जेष्यतीति, सोऽब्रवी- द्यतरो नौ पूर्व उज्जया.त्तन्नौ सहेति, ता अग्नि रुदजय,-त्तदिन्द्रोऽनूदजय,त्स एष ऐन्द्राग्न स्स.न्नाग्नेन्द्र, एका वैतर्हि यवस्य श्रुष्टि रासी- देका व्रीहे- रेका माष.स्यैका तिलस्य, तद्विश्वे देवा अब्रुव.न्वयँ वा एत त्प्रथयिष्यामो- भागो नोऽस्त्विति, तद्भूम एव वैश्वदेवो-ऽथो प्रथय त्येतेनैव, पयसि स्या द्वैश्वदेवत्वाय- वैश्वदेवं हि पयो,ऽथेमा.वब्रूता-न्न वा ऋत आवाभ्या- मेवैत द्यूयं प्रथयत, मयि प्रतिष्ठित- मसौ वृष्ट्या पचति- नैत दितो ऽभ्युज्जेष्यतीति- भागो ना.वस्त्विति, ताभ्याँ वा एष भाग॰ क्रियत- उज्जित्या एवा.थो प्रतिष्ठित्या एव- यो द्यावापृथिवीय,स्सौमीर्वा ओषधी,स्सोम ओषधीना मधिराजो, याश्च

ग्राम्या- याश्चाऽऽरण्या.स्तासा मेष उद्धारो- यच्छ्यामाको, यच्छ्यामाक स्सौम्य-स्तमेव भागिन.ङ्कृणुते, यदकृत्वाऽऽग्रयण न्नवस्याश्नीया- द्देवानां भागं प्रति क्लृप्त मद्या,त्सँवत्सराद्वा एत दधि प्रजायते- यदाग्रयणं, सँवत्सरँ वै ब्रह्मा- तस्मा.द्ब्रह्मा पुरस्ता द्धोमसंस्थित.होमेष्वावपे,देकहायनी दक्षिणा- स हि सँवत्सरस्य प्रतिमा, रेत एव ह्येषो ऽप्रजातः प्रजात्यै।। 2.1.17।।

6.18 अथ हैत.दप्रतिरथ- मिन्द्रस्य बाहू स्थविरौ वृषाणा- वि,त्येतेन ह वा इन्द्रोऽसुरा नप्रत्यजय,दप्रति ह भव-त्येतेन यजमानो भ्रातृव्य.ञ्जयति सङ्ग्रामे, जुहुया.दप्रति ह भव,त्येतेन ह वै भरद्वाजः प्रतर्दनं समनह्य,त्स राष्ट्र्यभव,द्य.ङ्कामयेत राष्ट्री स्यादिति- तमेतेन सन्नह्ये- द्राष्ट्री ह भव,त्येतेन ह वा इन्द्रो विराज मभ्यजय,द्दशैवान्वाह- दशाक्षरा विरा-ड्वैराजँ वा एतेन यजमानो भ्रातृव्यं वृङ्क्ते, तदु हैक एकादशा.न्वाऽऽहु- रेकादशाक्षरा वै त्रिष्टु.प्त्रैष्टुभो वज्रो- वज्रेणैवैत द्रक्षां.स्यप सेधति, दक्षिणतो वै देवानाँ यज्ञं रक्षां.स्यजिघांसं- स्तान्यप्रतिरथेना.पाघ्नत, तस्माद्ब्रह्माऽप्रतिरथ.ञ्जपन्नेति, यद्ब्रह्माऽप्रतिरथ. ञ्जप.न्नेति- यज्ञस्याभिजित्यै- रक्षसा मपहत्यै- रक्षसा मपहत्यै।। 2.1.18।।

6.19 अथात श्चातुर्मास्यानां प्रयोगः, फाल्गुन्यां पौर्णमास्या.श्चातुर्मास्यानि प्रयुञ्जीत, मुखँ वा एतत्सँवत्सरस्य- यत्फाल्गुनी पौर्णमासी, मुख मुत्तरे फाल्गुन्यौ- पुच्छं पूर्वे, तद्यथा प्रवृत्तस्यान्तौ समेतौ स्याता-मेव मेवैत.त्सँवत्सरस्यान्तौ समेतौ भवत,स्तद्य.त्फाल्गुन्यां पौर्णमास्या.श्चातुर्मास्यै र्यजते- मुखत एवैत त्सँवत्सरं प्रयुङ्क्ते,ऽथो भैषज्य.यज्ञा वा एते- यच्चातुर्मास्यानि, तस्मा दृतुसन्धिषु प्रयुज्यन्त,-ऋतुसन्धिषु वै व्याधि र्जायते, तान्येता.न्यष्टौ हवींषि भव-न्त्यष्टौ वै चतसृणां पौर्णमासीनां हवींषि भवन्ति, चतसृणाँ वै पौर्णमासीनाँ वैश्वदेवं समासो,ऽथ यदग्निं मन्थन्ति- प्रजापतिर्वै वैश्वदेवं- प्रजात्या ए.वाथैत.न्दैव.ङ्गर्भं प्रजनय,त्यथ यत्सप्तदश सामिधेन्य- स्सप्तदशो वै प्रजापतिः- प्रजापते राप्त्या, - अथ यत्सद्वन्ता.वाज्यभागा. वसिसन्तीति वै सद्वन्तौ भवतो,ऽथ यद्विराजौ सँयाज्ये- अन्नँ वै श्री र्विरा- डन्नाद्यस्य श्रियोऽवरुद्ध्या, - अथ यन्नव प्रयाजा- नवानुयाजा- अष्टौ हवींषि- वाजिन न्नवम.न्तन्नक्षत्रीयाँ विराज माप्नो,त्यथो आहु र्दशमीँ विराजमिति, प्रयाजानुयाजा हवींष्याघारा.वाज्यभागाविति। 2.1.19।

☸ 6.20 अथ यदग्नीषोमौ प्रथम न्देवतानाँ यज-त्यग्नीषोमौ वै देवानां मुखं- मुखत एव तद्देवा.न्प्रीणा,त्यथ यत्सविताऱँ यज-त्यसौ वै सविता- योऽसौ तप-त्येत मेव तेन प्रीणा,त्यथ यत्सरस्वतीँ यजति- वाग्वै सरस्वती- वाचमेव तेन प्रीणा,त्यथ यत्पूषणँ यज-त्यसौ वै पूषा- योऽसौ तप-त्येतमेव तेन प्रीणा,त्यथ यन्मरुत स्स्वतवसो यजति- घोरा वै मरुत स्स्वतवस-स्तानेव तेन प्रीणा,त्यथ यद्विश्वा न्देवान् यज-त्येते वै विश्वे देवा- यत्सर्वे देवा-स्तानेव तेन प्रीणा,त्यथ यद्यावापृथिव्यौ यजति- प्रतिष्ठे वै द्यावापृथिव्यौ- प्रतिष्ठित्या ए,वाथ यद्वाजिनो यजति- पशवो वै वाजिनꣳ- पशूनेव तेन प्रीणा,त्यथो ऋतवो वै वाजिन- ऋतूनेव तेन प्रीणा,त्यथो छन्दांसि वै वाजिन-श्छन्दांस्येव तेन प्रीणा,त्यथो देवाश्वा वै वाजिनो-ऽत्र देवा स्साश्वा अभीष्टाꣳ प्रीता भव,न्त्यथ यत्परस्ता त्पौर्णमासेन यजते- तथा हास्य पूर्वपक्षे वैश्वदेवेनेष्टं भवति।। 2.1.20।।

☸ 6.21 वैश्वदेवेन वै प्रजापतिꣳ प्रजा असृजत, तास्सृष्टा अप्रसूता वरुणस्य यवा न्जक्षु,स्ता वरुणो वरुणपाशैꣳ प्रत्यबध्ना,त्ताꣳ प्रजाꣳ प्रजापतिं पितर मेत्योपावद,न्नुप तँ .ज्ञानीहि- येनेष्ट्वा वरुण

मप्रीणा,त्स प्रीतो वरुणो- वरुणपाशेभ्य स्सर्वस्मा त्पाप्मन स्संप्रमुच्यन्त इति, तत एतं प्रजापति र्यज्ञक्रतु मपश्य द्वरुणप्रघास,-न्तमाऽहर,त्तेनायजत- तेनेष्ट्वा वरुण मप्रीणा,त्स प्रीतो वरुणो- वरुणपाशेभ्य स्सर्वस्माच्च पाप्मनः प्रजाः प्रामुञ्च,त्प्र ह वा एतस्य प्रजा वरुणपाशेभ्य स्सर्वस्माच्च पाप्मनो मुच्यन्ते- य एवँ वे,दाथ यदग्निं प्रणयन्ति- यमेवामुँ वैश्वदेवे मथ्नन्ति- तमेव तत्प्रणयन्ति, यन्मथ्यते- तस्योक्तं ब्राह्मण,मथ यत्सप्तदश सामिधेन्य-स्सद्वन्ता.वाज्यभागौ- विराजौ सँयाज्ये- तेषामुक्तं ब्राह्मण,मथ यन्नव प्रयाजा- नवानुयाजा- नवैतानि हवींषि- समानानि त्वेव पञ्च सञ्चराणि हवींषि भवन्ति पौष्णान्तानि- तेषामुक्तं ब्राह्मणम्।। 2.1.21।।

6.22 अथ यदैन्द्राग्नो द्वादशकपालो भवति, बलँ वै तेज इन्द्राग्नी- बल मेव तत्तेजसि प्रतिष्ठापय,त्यथ यद्वारुण्यामि.क्षेन्द्रो वै वरुण- स्स उ वै पयोभाजन-स्तस्मा द्वारुण्यामिक्षा,ऽथो यन्मारुती पयस्या-ऽप्सु वै मरुत श्श्रिता- आपो हि पयो-ऽथेन्द्रस्य वै मरुत श्श्रिता- ऐन्द्रं पय-स्तस्मा न्मारुती पयस्या,ऽथ यत्काय एककपालः- प्रजापतिर्वै कः- प्रजापते.राप्त्या, -अथो सुखस्य वा

एत.न्नामधेय.ङ्कमिति- सुखमेव तदध्यात्म न्धत्ते,ऽथ यन्मिथुनौ गावौ ददाति- प्रजात्यै रूप- मुक्थ्या वाजिनो,ऽथ यदप्सु वरुणँ यजति- स्व एवैन न्तदायतने प्रीणा,त्यथ यत्परस्ता.त्पौर्णमासेन यजते- तथा हास्य पूर्वपक्षे वरुणप्रघासै रिष्टं भवति।। 2.1.22।।

6.23 ऐन्द्रो वा एष यज्ञक्रतु- र्यत्साकमेधा,स्तद्यथा महाराजः पुरस्ता.त्सेनाऽनीकानि व्यु.ह्याभयं पन्थान मन्विया- देव मेवैत त्पुरस्ता द्देवता यजति, तद्यथैवाद स्सोमस्य महाव्रत- मेव मेवैत दिष्टि.महाव्रत,मथ यदग्नि मनीकवन्तं प्रथम न्देवतानाँ यज- त्यग्निर्वै देवानां मुखं- मुखत एव तद्देवा.न्प्रीणा,त्यथ यन्माध्यन्दिने मरुत स्सान्तपनान् यज,तीन्द्रो वै मरुत स्सान्तपना- ऐन्द्रं माध्यन्दिन- न्तस्मा देना.निन्द्रेणोपसंहितान् यज,त्यथ यत्साय.ङ्गृहमेधीयेन चरन्ति, पुष्टिकर्म वै गृहमेधीय- स्सायंपोषः पशूना- न्तस्मा.त्सायं गृहमेधीयेन चर,न्त्यथ यच्छ्वोभूते गृहमेधीयस्य निष्कासमिश्रेण पूर्णदर्व्या चरन्ति- पूर्वेद्युः कर्मणैवैत.त्प्रातः कर्मोप सन्तन्व,न्त्यथ यत्प्रात र्मरुतः क्रीडिनो यज-तीन्द्रो वै मरुतः क्रीडिन- स्तस्मादेना निन्द्रेणोपसंहितान् यज,त्यथ यदग्निं प्रणयन्ति- यमेवामुँ वैश्वदेवे मन्थन्ति- तमेव तत्प्रणयन्ति, यन्मथ्यते- तस्योक्तं ब्राह्मण,मथ

यत्सप्तदश सामिधेन्य- स्सद्वन्ता.वाज्यभागौ- विराजौ सँयाज्ये- तेषा मुक्तं ब्राह्मण,मथ यन्नव प्रयाजा- नवानुयाजा- अष्टौ हवींषि- समानानि त्वेव षड्वञ्चराणि हवींषि भव.न्त्यैन्द्राग्नान्तानि- तेषामुक्तं ब्राह्मण,मथ यन्महेन्द्र मन्ततो यज-त्यन्तँ वै श्रेष्ठो भजते- तस्मा.देन मन्ततो यज,त्यथ यद्वैश्वकर्मण एककपालो-ऽसौ वै विश्वकर्मा- योऽसौ तप-त्येत मेव तेन प्रीणा,त्यथ यदृषभ.ङ्गां ददा- त्यैन्द्रो ह यज्ञक्रतुः।। 2.1.23।।

6.24 अथ य.दपराह्णे पितृयज्ञेन चर-न्त्यपराह्णभाजो वै पितर- स्तस्मा दपराह्णे पितृयज्ञेन चरन्ति, तदाहु र्यदपरपक्षभाजो वै पितरः- कस्मा.देना न्पूर्वपक्षे यजन्तीति- देवा वा एते पितर- स्तस्मा.देना न्पूर्वपक्षे यजन्ती,त्यथ यदेकां सामिधेनी न्त्रिरन्वाह- सकृदु ह वै पितर- स्तस्मादेकां सामिधेनी न्त्रिरन्वा,हाथ यद्यजमानस्याऽऽर्षेय मन्वाह-नेद्यजमानं प्रमृणजानी,त्यथ यत्सोमं पितृमन्तं- पितृ.न्त्सोमवतः- पितृ.न्बर्हिषदः- पितृ.नग्निष्वात्ता- नित्या वाहयन्ति, न हैके स्वं महिमान मावाहयन्ति- यजमानस्यैष महिमेति वदन्त,आवाहये दिति त्वेव स्थित- मग्ने ह्येष महिमा भवति। ओं स्वधेत्या श्रावयति। अस्तु स्वधेति प्रत्याश्रावयति,

स्वधाकारो हि पितृणा,मथ यत्प्रयाजानुयाजेभ्यो बर्हिष्मन्ता.वुद्धरति- प्रजा वै बर्हि- र्नेत्प्रजां पितृषु दधानीति, ते वै षट्त्सम्पद्यन्ते- षड्वा ऋतव- ऋतवः पितरः- पितृणा माप्त्यै।। 2.1.24।

🏺 6.25 अथ यज्जीवन.वन्ता वाज्यभागौ भवतो- यजमानमेव तज्जीवयतो,ऽथ यदेकैकस्य हविष स्तिस्र.स्तिस्रो याज्या भवन्ति- ह्वय.त्येवैना न्प्रथमया- द्वितीयया गमयति- प्रैव तृतीयया यच्छ,त्यथो देवयज्ञ मेवैतं पितृयज्ञेन व्यावर्तय,न्त्यथो दक्षिणासंस्थो वै पितृयज्ञ- स्तमेवैत दुदक्संस्थ.ङ्कुर्व,न्त्यथ यदग्नि.ङ्कव्यवाहन मन्ततो यज-त्येतत्स्विष्टकृतो वै पितर-स्तस्मा दग्नि.ङ्कव्यवाहन मन्ततो यज,त्यथ यदिडा मुपहूयावघ्राय न प्राश्नन्ति- पशवो वा इडा- नेत्पशू.न्प्रमृणजानी,त्यथ यत्सूक्तवाके यजमानस्या ऽऽशिषोऽन्वाह- नेद्यजमानं प्रमृणजानी,त्यथ यत्पत्नी.न्न सँयाजयन्ति- नेत्पत्नीं प्रमृणजानी,त्यथ यत्पवित्रवति मार्जयन्ते- शान्तिर्वै भेषज माप- श्शान्ति रेवैषां भेषज- मन्ततो यज्ञे क्रियते,ऽथ यदध्वर्युः पितृभ्यो निपृणाति- जीवानेव तत्पितृ ननु मनुष्याः पितरोऽनु प्रवह,न्त्यथो देवयज्ञ मेवैनं पितृयज्ञेन

व्यावर्तय,न्त्यथो दक्षिणासंस्थो वै पितृयज्ञ-स्तमेवैत दुदक्संस्थ.ङ्कुर्व,न्त्यथ यत्प्राञ्चोऽभ्युत्क्रम्याऽऽदित्य मुपतिष्ठन्ते- देवलोको वा आदित्यः- पितृलोकः पितरो- देवलोक मेवैनं पितृलोका दुप सङ्क्रामन्ती,त्यथ यद्दक्षिणाञ्चोऽभ्युत्क्रम्याग्नी नुपतिष्ठन्ते- प्रीत्यैव तद्देवे.ष्वन्ततोऽर्ध.ञ्चर,न्त्यथ यदुदञ्चोऽभ्युत्क्रम्य त्रैयम्बकै र्यजन्ते- रुद्र मेव तत्स्वस्या न्दिशि प्रीण,न्त्यथो देवयज्ञ मेवैनं पितृयज्ञेन व्यावर्तय,न्त्यथो दक्षिणासंस्थो वै पितृयज्ञ-स्तमेवैत दुदक्संस्थ ङ्कुर्व,न्त्यथ यदन्तत आदित्येष्ट्या यज-तीयँ वा अदिति- रस्या मेवैन मन्ततः प्रतिष्ठापय,त्यथ यत्परस्ता.त्पौर्णमासेन यजते- तथा हास्य पूर्वपक्षे साकमेधै रिष्टं भवति।। 2.1.25।।

6.25 त्रयोदशँ वा एतं मास माप्नोति- यच्छुनासीर्येण यजत, - एतावा.न्वै सँवत्सरो- यावानेष त्रयोदशो मासो,ऽथ यदग्निं प्रणयन्ति- यमेवामुँ वैश्वदेवे मन्थन्ति- तमेव तत्प्रणयन्ति, यन्मथ्यते- तस्योक्तं ब्राह्मणँ, यद्यु न मथ्यते- पौर्णमास मेव तन्त्रं भवति- प्रतिष्ठा वै पौर्णमासं- प्रतिष्ठित्या ए,वाथ यद्वायुँ यजति- प्राणो वै वायुः- प्राणमेव तेन प्रीणा,त्यथ यच्छुनासीरँ यजति-

सँवत्सरो वै शुनासीर- स्सँवत्सरमेव तेन प्रीणा,त्यथ यत्सूर्यँ यजत्यसौ वै सूर्यो- योऽसौ तप-त्येतमेव तेन प्रीणा,त्यथ यच्छ्वेता न्दक्षिणा न्ददा-त्येतस्यैव तद्रूप.ङ्क्रियते,ऽथ यत्प्रायश्चित्त.प्रतिनिधि.ङ्कुर्वन्ति- यज्ञस्यैव शान्ति र्यजमानस्य भैषज्याय, तैर्वा एतै श्चातुर्मास्यै र्देवा स्सर्वा न्कामा नाप्नुव,न्त्सर्वा इष्टी- स्सर्व ममृतत्वं, स वा एष प्रजापति स्सँवत्सर श्चतुर्विंशो- यच्चातुर्मास्यानि, तस्य मुखमेव वैश्वदेवं- बाहू वरुणप्रघासाः - प्राणोऽपानो व्यान इत्येता स्तिस्र इष्टय- आत्मा महाहविः- प्रतिष्ठा शुनासीरं, स वा एष प्रजापतिरेव सँवत्सरो- यच्चातुर्मास्यानि, सर्वँ वै प्रजापति- स्सर्व.ञ्चातुर्मास्यानि, तत्सर्वेणैव सर्व माप्नोति- य एवँ वेद- यश्चैवँ विद्वां-श्चातुर्मास्यै र्यजते- चातुर्मास्यै र्यजते।। 2.1.26।

इति अथर्ववेदे गोपथब्राह्मणोत्तरभागे प्रथमः प्रपाठकः समाप्तः।

## उत्तरार्धे द्वितीयः प्रपाठकः

7.1 ओम्। मांसीयन्ति वा आहिताग्ने रग्नय,स्त एन मेवाग्रेऽभि ध्यायन्ति यजमानँ, य एत मैन्द्राग्नं पशुं षष्ठे षष्ठे मास आलभते- तेनैवेन्द्राग्निभ्या.ङ्ग्रसित मात्मान.न्निरवदयत, -आयुष्काम आलभेत- प्राणापानौ वा इन्द्राग्नी- प्राणापानावेवाऽऽत्मनि धत्त-

आयुष्मा.न्भवति, प्रजाकाम आलभेत- प्राणापानौ वा इन्द्राग्नी- प्राणापानौ प्रजा अनु प्रजायन्ते- प्रजावा.न्भवति, पशुकाम आलभेत- प्राणापानौ वा इन्द्राग्नी- प्राणापानौ पशवोऽनु प्रजायन्ते- पशुमा.न्भवति, यामं शुकं हरित मालभेत शुण्ठं वा- यः कामयेतानामयः पितृलोके स्या मि-त्येतेन ह वै यमो ऽमुष्मि न्लोक आर्ध्नो-त्पितृलोक एवर्ध्नोति, त्वाष्ट्रँ वडब मालभेत प्रजाकामः- प्रजापतिर्वै प्रजा स्सिसृक्षमाण- स्स द्वितीयं मिथुन न्नाविन्द,त्स त्वाष्ट्रं वडब मपश्य,त्त्वष्टा हि रूपाणां प्रजनयिता, तेन प्रजा असृजत, तेन मिथुन मविन्द.त्रसजावा.न्मिथुनवा.न्भवति- य एवँ वेद- यश्चैवँ विद्वा नेत मालभते, योनी.न्वा एष काम्या न्पशू नालभते- योऽनिष्ट्वेन्द्राग्नेन काम्यं पशु माऽलभत- इष्ट्वाऽऽलम्भ स्समृद्ध्यै।। 2.2.1।।

7.2 पञ्चधा वै देवा व्युदक्राम- न्नग्नि र्वसुभि- स्सोमो रुद्रै- रिन्द्रो मरुद्भि- र्वरुण आदित्यै- र्बृहस्पति र्विश्वै र्देवै,स्ते देवा अब्रुव- न्नसुरेभ्यो वा इदं भातृव्येभ्यो रध्यामो- यन्मिथो विप्रिया.स्स्मो, या न इमाः प्रिया स्तन्व- स्ता स्समवद्यामहा इति, ता.स्समवाद्यन्त, ताभ्य स्स निर्ऋच्छा- द्यो नः प्रथमोऽन्योऽन्यस्मै द्रुह्यादिति,

यत्तन्व स्समवाद्यन्त- तत्तानूनप्त्रस्य तानूनप्त्रत्व,न्ततो देवा अभव न्परा॰सुरा,स्तस्माद्य स्सतानूनप्त्रिणां प्रथमो द्रुह्यति- स आर्ति मार्च्छति, यत्तानूनप्त्रं समवद्यति- भ्रातृव्याभिभूत्यै, भवत्यात्मना, परा॰स्याप्रियो भ्रातृव्यो भवति।

7.3 पञ्चकृत्वो॰वद्यति, पाङ्क्तो यज्ञः- पञ्चधा हि ते ता.स्समवाद्यन्ता,॰पतये त्वा गृह्णामीत्याह- प्राणो वा आपतिः- प्राणमेव तेन प्रीणाति, परिपतये त्वेत्याह- मनो वै परिपति- र्मन एव तेन प्रीणाति, तनूनप्त्र इत्याह- तन्वो हि ते ता.स्समवाद्यन्त, शाक्वरायेत्याह- शक्त्यै हि ते तास्समवाद्यन्त, शक्म न्नोजिष्ठायेत्या- हौजिष्ठं हि ते तदात्मन स्समवाद्य,न्तानाधृष्ट.मित्या- हानाधृष्टं ह्येत,दनाधृष्य.मित्या-हानाधृष्यं ह्येत,द्देवाना मोज इत्याह- देवानां ह्येत.दोजो,॰भिशस्तिपा इत्या.हाभिशस्तिपा ह्येत,दनभिशस्तेन्य मित्याहा.नभिशस्तेन्यं ह्येत,दनु मे दीक्षा न्दीक्षापति र्मन्यता- मनु तप स्तप.स्पति रञ्जसा सत्य मुप गेषं- स्विते मा धा इत्याह, यथायजु रेवैतत्।। 3।।

7.4 घृतँ वै देवा वज्र.ङ्कृत्वा सोम मघ्न-न्त्स्रुचौ बाहू, तस्मात्स्रुचौ सौमी माहुति न्ना॰साते,॰वधीयेत सोम,स्तस्मात्स्रुचौ

चाऽऽज्य.ञ्चान्तिक माऽहार्षी,दन्तिकमिव खलु वा अस्यैत.त्प्रचरन्ति- यत्तानूनप्त्रेण प्रचर,न्त्यंशु.रंशुष्टे देव सोमाऽऽप्यायता मिन्द्रा.यैकधनविद् इत्याह, यदेवा.स्यापवायते यन्मीयते- तदेवास्यैतेनाऽऽप्यायय,न्त्या तुभ्य मिन्द्रः प्यायता मा त्व मिन्द्राय प्यायस्वेत्या.होभा वेवेन्द्रञ्च सोमं चाऽऽप्यायय,-न्त्याप्याययास्मा.न्त्सखी.न्त्सन्या मेधया प्रजया धनेनेत्या.हर्त्विजो वा एतस्य सखाय- स्तानेवास्यैतेनाऽऽ प्याययन्ति, स्वस्ति ते देव सोम सुत्या मुद्दच मशीयेत्या.हाऽऽशिष मेवैता माशास्ते, प्र वा एतस्मा ल्लोका च्च्यवन्ते- ये सोम माप्यायय,न्त्यन्तरिक्षदेवत्यो हि सोम आप्यायित, एष्टा राय एष्टा वामानि प्रेषे भगाय.र्त मृतवादिभ्यो नमो दिवे नमः पृथिव्या इति- द्यावापृथिवीभ्यामेव नमस्कृत्यास्मि न्लोके प्रति तिष्ठति प्रति तिष्ठति।। 2.2.4।।

7.5 मख इत्येत द्यज्ञ.नामधेय-ञ्छिद्र.प्रतिषेध.सामर्थ्या,च्छिद्रं खमित्युक्त-न्तस्य मेति प्रतिषेधो, मा यज्ञ.ञ्छिद्र ङ्करिष्यतीति, छिद्रो हि यज्ञो- भिन्न इवोदधि र्विस्रवति, तद्धै खलु छिद्रं भव,त्यृत्वि.ग्यजमान.विमानाद्वा,ऽपि वैषाँ व्यपेक्षया मन्त्र-कल्प-ब्राह्मणाना मप्रयोगा,द्यथोक्तानाँ वा दक्षिणाना मप्रदाना,द्धीना

द्वाऽतिरिक्ता.द्वोत्पाता.द्भूतेषु, प्रायश्चित्त व्यतिक्रमा,दित्येतद्वै सर्वं ब्रह्मण्यर्पितं, ब्रह्मैव विद्वान् य.द्भृग्वङ्गिरोवि.त्सम्य.गधीयान श्चरितब्रह्मचर्यो ऽन्यूनातिरिक्ताङ्गोऽप्रमत्तो यज्ञं रक्षति, तस्य प्रमादा द्यदि वाऽप्यसान्निध्या- द्यथा भिन्ना नौ रगाधे मह.त्युदके संप्लवे- न्मत्स्य कच्छप शिंशुमार नक्र मकर पुण्डरीक जष रजस पिशाचानां भागधेयं भव-त्येव.मादीना.ञ्चान्येषाँ विनष्टोपजीविना,मेवङ्खल्वपि यज्ञ श्छिन्न.भिन्नो ऽपध्वस्त उत्पाताद्भुतो बहुलो ऽथर्वभि.रस॰स्कृतो- ऽसुर गन्धर्व- यक्ष- राक्षस- पिशाचानां भागधेयं भव,त्येव.मादीना.ञ्चान्येषाँ विनष्टोपजीविना,न्तदपि श्लोकाः-

卐 छिन्न भिन्नोऽपध्वस्तो विश्रुतो बहुधा मखः।

इष्टापूर्त.द्रविणं गृह्य - यजमानस्याऽवापतत्।।

ऋत्विजाञ्च विनाशाय राज्ञो जनपदस्य च।

सँवत्सर.विरिष्ट.न्त-द्यत्र यज्ञो विरिष्यते।।

दक्षिणा.प्रवणीभूतो यज्ञो दक्षिणत.स्स्मृतः।

हीनाङ्गो रक्षसां भागो ब्रह्मवेदा.दसंस्कृतः।।

चतुष्पा.त्सकलो यज्ञ श्चातुर्हौत्र.विनिर्मितः।

चतुर्विधै स्स्थितो मन्त्रै र्ऋत्विग्भि र्वेदपारगैः।।

प्रायश्चित्तै रनुध्यानै- रनुज्ञानानुमन्त्रणैः।

होमैश्च यज्ञविभ्रंशं सर्वं ब्रह्मा प्रपूरये-दिति।।

तस्मा.द्यजमानो भृग्वङ्गिरोविदमेव तत्र ब्रह्माणँ वृणीया,त्स हि यज्ञ न्तारयतीति ब्राह्मणम्।। 2.2.5।।

7.6 यज्ञो वै देवेभ्य उदक्राम,न्न वोऽह मन्नं भविष्यामीति, नेति देवा अब्रुव-न्नन्न मेव नो भविष्यसीति, तन्देवा विमेथिरे, स एभ्यो विहृतो न प्रबभूव, ते होचु र्देवा- न वै न इत्थँ विहृतोऽलं भविष्यति- हन्तेमं सम्भरामेति, तं सञ्जभ्रु,स्तं सम्भृत्योचु- रश्विना विमं भिषज्यतमि,त्यश्विनौ वै देवानां भिषजा-वश्विना वध्वर्यू- तस्मा.दध्वर्यू घर्मं सम्भरत,स्तं सम्भृत्योचतु- र्ब्रह्म न्घर्मेण प्रचरिष्यामो- होत र्घर्म मभिष्टु-ह्युद्गात स्सामानि गायेति, प्रचरत घर्म- मित्यनु जानाति, ब्रह्मप्रसूता हि प्रचरन्ति, ब्रह्म हेदं प्रसवाना मीशे सवितृ.प्रसूततायै, घर्मं न्तपामि- ब्रह्म जज्ञान- मियं पित्र्या राष्ट्र्येत्वग्र इति- घर्मं न्ताप्यमान मुपाऽऽसीत- शस्त्रव दर्धर्चेश आहाव.प्रतिगर.वर्जं रूपसमृद्धाभि,रेतद्वै यज्ञस्य समृद्धँ- यद्रूपसमृद्धँ- यत्कर्म क्रियमाण मृग्यजुर्वाऽभिवदति, स्वस्ति तस्य

यज्ञस्य पार मश्नुते य एवँ वेद, देवमिथुनँ वा एत द्य.द्धर्म,स्तस्मा दन्तर्धाय प्रचर.न्त्यन्तर्हिता वै मिथुन.ञ्चरन्तीति, तदेत.देव मिथुन मित्याचक्षते, तस्य यो घर्म- स्तच्छिश्नँ, यौ शफौ- तावाण्ड्यौ, ये उपयमनी- ते श्रोणिकपाले, यत्पय- स्तद्रेत,स्तदग्नौ देवयोन्यां रेतो ब्रह्ममय न्धत्ते प्रजननाय, सोऽग्नि र्देवयोनिर् ऋङ्मयो यजुर्मय स्सामममयो ब्रह्ममयोऽमृतमय आहुतिमय स्सर्वेन्द्रियसम्पन्नो यजमान ऊर्ध्व.स्स्वर्गँ लोक.मेति, तदाहु- र्न प्रथमयज्ञे प्रवर्ग्य.ङ्कुर्वी.तानुप.नामुका ह वा एन मुत्तरे यज्ञक्रतवो भवन्तीति, कामन्तु योऽनूचान श्श्रोत्रिय स्स्या-त्तस्य प्रवृञ्ज्या,दात्मा वै स यज्ञस्येति विज्ञायतेऽपशिरसा ह वा एष यज्ञेन यजते- योऽप्रवर्ग्येण यजते, शिरो ह वा एत द्यज्ञस्य- यत्प्रवर्ग्य,स्तस्मा.त्प्रवर्ग्यवतैव याजये- न्नाप्रवर्ग्येण, तदप्येषाऽभ्यनूक्ता- चत्वारि श्रृङ्गेति।। 2.2.6।।

7.7 देवाश्च ह वा ऋषय श्चासुरै स्सँयत्ता आस,न्तेषा मसुराणा मिमाः पुरः प्रत्यभिजिता आस-न्नयस्मयी पृथिवी- रजताऽन्तरिक्षं- हरिणी द्यौ,स्ते देवा स्सङ्घातं पराऽजयन्त, तेऽविदु रनायतना हि वै स्म-स्तस्मा त्पराजयामह इति, त एताः पुरः प्रत्यकुर्वत- हविर्धान

न्दिव- आग्नीध्र मन्तरिक्षा-त्सदः पृथिव्या,स्ते देवा अब्रुव- न्नुपसद मुपाऽऽया.मोपसदा वै महापुर.ञ्जयन्तीति, त एभ्यो लोकेभ्यो निरघ्न-न्नेकया ऽमुष्मा ल्लोका.देकयाऽन्तरिक्षा.देकया पृथिव्या,स्तस्मा.दाहु रुपसदा वै महापुर.ञ्जयन्तीति, त एभ्यो लोकेभ्यो निर्हता ऋतू.न्प्राविशं-स्ते षडुपाऽऽयं-स्तानुपसद्भि रेवर्तुभ्यो निरघ्न-न्द्वाभ्या ममुष्मा ल्लोका- द्वाभ्या मन्तरिक्षा- द्वाभ्यां पृथिव्या,स्त ऋतुभ्यो निर्हता स्सँवत्सरं प्राविशं-स्ते द्वादशोपाऽऽयं-स्तानुपसद्भि रेव सँवत्सरा न्निरघ्नं- श्चतसृभि रमुष्मा ल्लोका- च्चतसृभि रन्तरिक्षा-च्चतसृभिः पृथिव्या,स्ते सँवत्सरा न्निर्हता अहोरात्रे प्राविशं-स्ते य.त्साय मुपाऽऽयं- स्तेनैता.न्रात्र्या अनुदन्त, यत्प्रात स्तेनाह्न,स्तस्माद्दौ स्सायं प्रातस्तन माप्यायते- प्रात स्सायन्तन,न्तानुपसद्भि रेवैभ्यो लोकेभ्यो नुदमान आयं,स्ततो देवा अभव- न्पराऽसुरा, स्सर्वेभ्य एवैभ्यो लोकेभ्यो भ्रातृव्य न्नुदमान एति, य एवँ विद्वा नुपसद मुपैति।। 2.2.7।।

7.8 न द्वादशाग्निष्टोमस्योपसद स्स्यु, रशान्ता निर्मृज्यु, र्न तिस्रोऽहीनस्योपरिष्टा.द्यज्ञक्रतु र्गरीया नभिषीदे,द्यथा गुरु र्भारो ग्रीवा निश्शृणीया दार्ति मार्छे,द्द्वादशाहीनस्य कुर्या.त्प्रत्युत्तब्ध्यै

सयत्वाय, तिस्रोऽग्निष्टोमस्योपसद स्स्यु श्शान्त्या अनिर्मार्गाय, ते देवा असुर्या निमा न्लोका न्नान्ववैतु मधृष्णुवं,स्तानग्निना मुखेनान्ववायन्, यदग्निम.न्त्युपसदां प्रतीकानि भवन्ति, यथा क्षेत्रपतिः~ क्षेत्रे ऽन्वव.नय-त्येव मेवैत दग्निना मुखे.नेमा न्लोका नभिनयन्तो यन्ति, यो ह वै देवा.न्त्साध्या.न्वेद- सिध्यत्यस्मा, इमे वाव लोका- यत्साध्या देवा,स्स य एव मेता.न्त्साध्या न्वेद- सिद्धत्यस्मै- सिध्यत्यमुष्मै, सिध्यत्यस्मै लोकाय- य एवँ विद्वा नुपसद मुपैति।। 2.2.8।।

7.9 अथ यत्राऽऽहाध्वर्यु- रग्नी द्देवपत्नी र्व्याचक्ष्व, सुब्रह्मण्य- सुब्रह्मण्या माह्वयेति, तदपरेण गार्हपत्यं प्राङ्मुख स्तिष्ठ- न्ननवान.न्नाग्नीध्रो देवपत्नी र्व्याचष्टे- पृथिव्यग्नेः पत्नी, वा.ग्वातस्य पत्नी, सेनेन्द्रस्य पत्नी, धेना बृहस्पतेः पत्नी, पथ्या पूष्णः पत्नी, गायत्री वसूनां पत्नी, त्रिष्टु.ब्रुद्राणां पत्नी, जग.त्यादित्यानां पत्नी, अनुष्टु.म्मित्रस्य पत्नी, विरा.ड्वरुणस्य पत्नी, पङ्क्ति र्विष्णोः पत्नी, दीक्षा सोमस्य राज्ञः पत्नी,त्यतिभ्रातृव्या नारोहति, नैनं भ्रातृव्या आरोह,न्त्युपरि भ्रातृव्या नारोहति- य एवँ विद्वा नाग्नीध्रो देवपत्नी

र्व्याचष्टे।। 2.2.9।। (तिष्ठन् - अनवानन् (न-अव-अनन् (शतृ)- आग्नीध्रः)

7.10 यथा वै रथ एकैक.मर मभि.प्रतितिष्ठ.न्वर्तत, -एवँ यज्ञ एकैकां तन्व मभि प्रति तिष्ठन्नेति, पुरा प्रचरितो राग्नीध्रीये होतव्या, एतद्ध वा उवाच वासिष्ठ स्सात्यहव्यो- ऽस्क.न्सोपुम इत्युक्ते- मा सूर्क्षत प्रचरत- प्रात र्वावाद्याहं सोमं समस्थापय-मिति, नास्य सोम स्स्कन्दति- य एवँ विद्वा.न्त्सोमं पिबति, स ह स्म वै सहाऽऽसन्द्या मासीन स्सक्तुभि रुपमथ्य सोमं पिब-त्यहं वाव सर्वतो यज्ञँ वेद- य एता.न्वेद, न मा मेष हिंसिष्यतीति, नैनं सोमपीथो न पेयो हिनस्ति- य एवँ विद्वान्स्ोतमं पिबति, तं ह स्म यदाहुः- कस्मा त्त्वमिद मासन्द्या मासीन स्सक्तुभि रुपमथ्य सोमं पिबसीति, देवतास्वेव यज्ञं प्रतिष्ठापयामी.त्यब्रवी.द्ब्राह्मणो, यस्यैवँ विदुषो- यस्यैवँ विद्वान् यज्ञाऽऽर्त्या यज्ञे प्रायश्चित्त.ञ्जुहोति- देवतास्वेव यज्ञं प्रतिष्ठापयति, यज्ञाऽऽर्तिं प्रति जुहुया.त्सयोनित्वाय, त्रयस्त्रिंशद्वै यज्ञस्य तन्व इति, एकान्नत्रिंश.त्स्तोमभागा- स्त्रीणि सवनानि- यज्ञश्चतुर्थ,स्स्तोमभागै रेवैत.त्स्तोमभागा.न्प्रति प्रयुङ्क्ते- सवनै स्सवनानि- यज्ञेन यज्ञं, सर्वा ह वा अस्य यज्ञस्य तन्वः प्रयुक्ता भवन्ति- सर्वा आप्ता- स्सर्वा

अवरुद्धा, देवस्य सवितुः प्रसवे बृहस्पतये स्तुतेति, यद्यद्धै सविता देवेभ्यः प्रासुव,त्तेनाऽऽर्ध्नुव,न्त्सवितृप्रसूता एव स्तुव.न्त्यृध्नुव,न्त्यृध्यन्ते ह वा अस्य स्तोमा- यज्ञ ऋध्यते- यजमान ऋध्यते प्रजाया -ऋध्यते पशुभ्य- ऋध्यते ब्रह्मणे- यस्यैवँ विद्वा.न्ब्रह्मा भवति।। 2.2.10।।

7.11 देवाश्च ह वा असुरा श्चास्पर्धन्त, ते देवा स्समाव.देव यज्ञे कुर्वाणा आसन्, यदेव देवा अकुर्वत- तदसुरा अकुर्वत, ते न व्यावृत मगच्छं,स्ते देवा अब्रुव.न्नयतेमँ यज्ञ- न्तिर उपर्यसुरेभ्य.स्तंस्यामहा इति, तमेताभि राच्छाद्योदक्रामन्- यजूंषि यज्ञे समिध स्स्वाहेति, तन्तिर उपर्यसुरेभ्यो यज्ञ मतन्वत, तमेषाँ यज्ञ मसुरा नान्ववायं,स्ततो देवा अभव- न्पराऽसुरा,स्स य एवँविद्वां.स्तिर उपर्यसुरेभ्यो यज्ञ न्तनुते- भव.त्यात्मना- पराऽस्याप्रियो भ्रातृव्यो भव,त्येतै रेव जुहुया.त्समृतयज्ञे- चतुर्भि श्चतुर्भि रन्वाख्यायं पुरस्ता.त्प्रातरनुवाकस्य जुहुया,देतावान् वै यज्ञो- यावानेष यज्ञ- स्तँ वृङ्क्ते, सयज्ञो भव- त्ययज्ञ इतर, -एतै रेव जुहुया.त्पुरस्ता.द्वादशाह,स्यैष वै प्रत्यक्ष न्द्वादशाह- स्तमेवाऽऽलभ्यैतै रेव जुहुया.त्पुरस्ता.द्दीक्षाया, -एषा ह वै प्रत्यक्ष

न्दीक्षा, तामेवाऽऽलभ्यैतै रेवाऽऽतिथ्य मभिमृशे- द्यज्ञेन यज्ञ मयजन्त देवा इति।। 2.2.11।।

7.12. यत्र विजानाति- ब्रह्म न्त्सोमोऽस्क-न्निति, तमेतयाऽऽलभ्याभिमन्त्रयते- अभू द्देव स्सविता वन्द्यो नुन- इदानी मह्न उपवाच्यो नृभिः। वि यो रत्ना भजति मानवेभ्य श्श्रेष्ठन्नो अत्र द्रविणँ यथा दध- दिति, ये अग्नयो अप्स्व1(अ)न्त- रिति सप्तभि रभि जुहोति, यदेवास्यावस्कन्नं भवति- तदेवास्यैत दग्नौ स्वगाकरो,त्यग्निर्हि सुकृतीनां हविषां प्रतिष्ठा,ऽथ विसृप्य वैप्रुषान् होमा.न्जुह्वति- द्रप्स श्चस्कन्देति, या एवास्याभिषूयमाणस्य विप्रुष स्स्कन्द.न्त्यंशुर्वा, ता एवास्यैत दाहवनीये स्वगाकरो,त्याहवनीयो ह्याहुतीनां प्रतिष्ठा, यस्ते द्रप्स स्कन्दती-ति, स्तोको वै द्रप्सो, यस्ते अंशु र्बाहुच्च्युतो धिषणाया उपस्था-दिति, बाहुभि रभिच्युतोंऽशु रधिषवणाभ्या मधिस्कन्द-त्यध्वर्योर्वा परि यः पवित्रा त्तन्ते जुहोमि मनसा वषट्कृत- मिति, तद्यथावषट्कृतं स्वाहाकृतं हुतमेव भवति।। 2.2.12।।

7.13 ऋषयो वा इन्द्रं प्रत्यक्ष न्नापश्यं,स्तँ वसिष्ठ एव प्रत्यक्ष मपश्य,त्सोऽबिभे-दितरेभ्य ऋषिभ्यो मा प्रवोचदिति, सोऽब्रवी-

द्ब्राह्मणन्ते वक्ष्यामि- यथा त्वत्पुरोहिताः प्रजाः प्रजनयिष्यन्ते-ऽथेतरेभ्य ऋषिभ्यो मा प्रवोचदिति, तस्मा एता.न्स्तोोितमभागा नुवाच, ततो वसिष्ठ.पुरोहिताः प्रजाः प्राजायन्त, स्तोमो वा एतेषां भाग,स्तत्स्तोमभागानां स्तोमभागत्वं, रश्मिरसि क्षयाय त्वा क्षय.ञ्जिन्वेति- क्षयो वै देवा- देवेभ्य एव यज्ञं प्राऽऽह, प्रेतिरसि धर्मणे त्वेति- धर्मो मनुष्या- मनुष्येभ्य एव यज्ञं प्राऽऽ,हान्वितिरसि-सन्धिरसि- प्रतिधिरसीति- त्रयो वै लोका- लोकेष्वेव यज्ञं प्रतिष्ठापयति, विष्टम्भोऽसीति- वृष्टि मेवाव रुन्धे, प्रावोऽ-स्यह्वांसीति मिथुन मेव करो,त्युशिगसि- प्रकेतोऽसि- सुदीति रसी- त्यष्टौ वसव एकादश रुद्रा द्वादशाऽऽदित्या- वाग्द्वात्रिंशी- स्वर स्त्रयस्त्रिंश,स्त्रयस्त्रिंश द्देवा- देवेभ्य एव यज्ञं प्राऽऽ,हौजोऽसि पितृभ्य.स्त्वेति- बलमेव तत्पितृ ननु सन्तनोति, तन्तुरसि प्रजाभ्य स्त्वेति- प्रजा एव पशू ननु सन्तनोति, रेव.दस्योषधीभ्य स्त्वे-त्योषधीष्वेव यज्ञं प्रतिष्ठापयति, पृतनाषा.डसि पशुभ्य.स्त्वेति- प्रजा एव पशू ननु सन्तनो,त्यभिजि.दसीति- वज्रो वै षोडशी-व्यावृत्तोऽसौ वज्र-स्तस्मा देषोऽन्यै र्व्यावृत्तो, नाभु रसीति-प्रजापतिर्वै सप्तदशः- प्रजापति मेवाव रुन्धे।। 2.2.13।।

7.14 अधिपतिरसि- धरुणोऽसि- संसर्पोऽसि- वयोधा असीति- प्राणोऽपान श्चक्षु श्श्रोत्र मित्येतानि वै पुरुष मकर-न्प्राणा नुपैति- प्रजात्या एव, त्रिवृदसि- प्रवृदसि- स्ववृद-स्यनुवृदसीति- मिथुनमेव करो,त्यारोहोऽसि- प्ररोहोऽसि- संरोहोऽ-स्यनुरोहोऽसीति- प्रजापतिरेव, वसुकोऽसि- वस्यष्टिरसि- वेषश्रीरसीति प्रतिष्ठितिरेवा,ऽऽक्रमोऽसि- सङ्क्रमोऽ-स्युत्क्रमोऽ-स्युत्क्रान्ति रसी- त्यृद्धिरेव, यद्यद्वै सविता देवेभ्यः प्रासुव.त्तेनाऽऽर्ध्नुव,न्स्तवितृप्रसूता एव स्तुव.न्त्यृध्नुवन्ति, बृहस्पतये स्तुतेति, बृहस्पतिर्वा आङ्गिरसो देवानां ब्रह्मा, तदनुमत्यै.वों भूर्जन-दिति प्रातस्सवन- ऋग्भि रेवोभयतोऽथर्वाङ्गिरोभि र्गुप्ताभि र्गुप्तै स्स्तुतेत्ये,वों भुवो जनदिति- माध्यन्दिने सवने- यजुर्भि रेवोभयतोऽथर्वाङ्गिरोभि र्गुप्ताभि र्गुप्तै स्स्तुतेत्ये,वों स्वर्जन दिति- तृतीय सवने- सामभि रेवोभयतोऽथर्वाङ्गिरोभि र्गुप्ताभि र्गुप्तै स्स्तुतेत्ये,वाऽथ यद्यहीन उक्थ्य ष्षोडशी वाजपेयो ऽतिरात्रोऽप्तोर्यामो वा स्या.त्सर्वाभि स्सर्वाभि रत ऊर्ध्वं व्याहृतिभि रनुजाना,त्यों भूर्भुवस्स्व-र्जन- द्वृधत्- कर- द्रुहन्-मह-त्त-च्छ-मो- मिन्द्रवन्त स्स्तुतेति, सेन्द्रा

न्मापगायत सेन्द्रा स्स्तुत- इत्ये,वेन्द्रियवा.नृद्धिमा.न्वशीया.न्मवति-य एवँ वेद, यश्चैवँ विद्वा.न्स्तो्यमभागै र्यजते।।

7.15 यो ह वा आयतांश्च प्रतियतांश्च स्तोमभागा.न्विद्या-त्स विष्पर्धमानयो स्समृतसोमयो ब्र्ह्मा स्यात्,- स्तुतेषे- स्तुतोर्जे- स्तुत देवस्य सवितु स्सवे- बृहस्पतिँ वः- प्रजापतिँ वो- वसून्वो देवा-न्रुद्रान् वो देवा- नादित्यान् वो देवा-न्सावोध्यान् वो देवा- नाप्त्यान् वो देवा- न्विश्वान् वो देवा-न्स्तर्वान् वो देवा- न्विश्वतस्परि हवामहे जनेभ्योऽस्माक मस्तु केवल- इतः कृणोतु वीर्य,मित्येते ह वा आयताश्च प्रतियताश्च स्तोमभागा-स्तान्जप न्नुपर्युपरि परेषां ब्रह्माण मवेक्षेत, तत एषा मधश्शिरा ब्रह्मा पतति- ततो यज्ञ-स्ततो यजमानो, यजमानेऽध.श्शिरसि पतिते- स देशोऽधश्शिराः पतति- यस्मि न्नर्धे यजन्ते, देवाश्च ह वा असुराश्च समृतसोमौ यज्ञा वतनुता,मथ बृहस्पति राङ्गिरसो देवानां ब्रह्मा, स आयतांश्च प्रतियतांश्च स्तोमभागा.न्जप न्नुपर्युपर्यसुराणां ब्रह्माण मवैक्षत, तत एषा मधश्शिरा ब्रह्माऽपत-त्ततो यज्ञ- स्ततोऽसुरा इति।। 2.2.15।।

7.16 देवा यज्ञं पराऽजयन्त, तमाग्नीध्रा त्पुन रुपाजयन्त, तदेत द्यज्ञस्यापराजितँ - यदाग्नीध्रँ, यदाग्नीध्रा द्धिष्ण्या न्विहरति- तत एवैनं पुन स्तनुते- पराजित्या, -अप खलु वा एते गच्छन्ति- ये बहिष्पवमानं सर्पन्ति, बहिष्पवमाने स्तुत आ.हाग्नी दग्नी न्विहर- बर्हि स्तृणीहि- पुरोडाशा नलङ्कुर्विति, यज्ञमेवापराजित्य पुन स्तन्वाना आय,न्त्यङ्गारै र्द्वे सवने विहरति- शलाकाभि स्तृतीयसवनं सशुक्रत्वाया,थो सम्भव-त्येव.मेवैत,द्दक्षिणतो वै देवानाँ यज्ञं रक्षां.स्यजिघांसं,स्ता.न्याग्नीध्रेणा ऽपाघ्नत, तस्मा द्दक्षिणामुख स्तिष्ठ- न्नग्नी.त्प्रत्या.श्रावयति- यज्ञस्याभिजित्यै - रक्षसा.मपहत्यै रक्षसा.मपहत्यै।। 2.2.16।।

7.17 तदाहु- रथ कस्मा.त्सौम्य एवाध्वरे प्रवृताऽऽहुती र्जुह्वति- न हविर्यज्ञ इ,त्यकृत्स्ना वा एषा देवयज्या- यद्धविर्यज्ञो,ऽथ हैषैव कृत्स्नैषा देवयज्या- यत्सौम्योऽध्वर,स्तस्मा.त्सौम्य एवाध्वरे प्रवृताऽऽहुती र्जुह्वति, जुष्टो वाचो भूयास.ञ्जुष्टो वाचस्पतये देवि वाक्। यद्वाचो मधुमत्तम- न्तस्मिन्मा धा,स्स्वाहा वाचे, स्वाहा वाचस्पतये, स्वाहा सरस्वत्यै, स्वाहा सरस्वत्या इति पुरस्ता.त्स्वाहाकारेण जुहोति, तस्माद्वा.गत ऊर्ध्व मुत्सृष्टा यज्ञँ

वहति मनसोत्तरां, मनसा हि मनः प्रीत,न्तदु हैके सप्ताऽऽहुती र्जुह्वति- सप्त छन्दांसि प्रवृत्तानि प्रतिमन्त्र मिति वदन्तो, यथा मेखला पर्यस्यते मेध्यस्य चामेध्यस्य च विहृत्या - एवं हैवैते न्युप्यन्ते मेध्यस्य चामेध्यस्य विहृत्यै- यज्ञस्य विहृत्यै, प्राचीनं हि धिष्ण्येभ्यो देवानाँ लोकाः- प्रतीचीनं मनुष्याणा,न्तस्मा.त्सोमं पिबता प्राञ्चो धिष्ण्या नोपसर्प्या, जनं ह्येत द्देवलोकं ह्यध्यारोहन्ति, तेषा मेत दायतन ञ्चोदयनञ्च- यदाग्नीध्रञ्च सदश्च, तद्योऽविद्वा.न्त्सञ्चर- त्यार्ति मार्च्छे,त्यथ यो विद्वान्त्सञ्चरति- न स धिष्णीया मार्ति मार्च्छति।

7.18 प्रजापतिर्वै यज्ञ,स्तस्मि.न्त्सर्वे कामा- स्सर्वा इष्टी- स्सर्व ममृतत्व,न्तस्य हैते गोप्तारो यद्धिष्ण्या,स्तान्त्सदः प्रस्रप्स्य न्नमस्करोति- नमो नम इति, न हि नमस्कार मति देवा,स्ते ह नमसिताः कर्तार मति.सृजन्तीति, तत एतं प्रजापतिँ यज्ञं प्रपद्यते- नमो नम इति, न हि नमस्कार मति देवा- स्स तत्रैव यजमान स्सर्वा न्कामा नाप्नोति- सर्वा न्कामा नाप्नोति।। 2.2.18।।

7.19 यो वै सदस्या.न्गान्धर्वा.न्वेद- न सदस्या मार्ति मार्च्छति, सदः प्रस्रप्स्य.न्ब्रूया-दुपद्रष्ट्रे नम इ,त्यग्निर्वै द्रष्टा- तस्मा उ एवाऽऽत्मानं परिदधाति- सर्व.मायु.रेति- न पुरा जरसः प्रमीयते- य

एवँ वेद, सदꣳ प्रसृप्य ब्रूया- दुपश्रोत्रे नम इति, वायुर्वा उपश्रोता- तस्मा उ एवाऽऽत्मानं परिदधाति- सर्व.मायु.रेति- न पुरा जरसꣳ प्रमीयते- य एवँ वेद, सदꣳ प्रसर्प न्ब्रूया- दनुख्यात्रे नम इ,त्यादित्यो वा अनुख्याता- तस्मा उ एवाऽऽत्मानं परिदधाति- सर्व.मायु.रेति- न पुरा जरसꣳ प्रमीयते- य एवँ वेद, सदꣳ प्रसृप्तो ब्रूया- दुपद्रष्ट्रे नम इति, ब्राह्मणो वा उपद्रष्टा- तस्मा उ एवाऽऽत्मानं परि दधाति- सर्व.मायु.रेति- न पुरा जरसꣳ प्रमीयते- य एवँ वे,दैते वै सदस्या गन्धर्वा,स्स एव मेता.न्त्सदस्या.न्गान्धर्वा नविद्वा.न्त्सदꣳ प्रसर्पति- स सदस्या मार्तिं मार्च्छे,त्यथ यो विद्वा.न्त्सञ्चरति-न सदस्या मार्तिं मार्च्छे,त्येतेन ह स्म वा अङ्गिरस स्सर्वं सदꣳ पर्याहु,स्ते न सदस्या मार्तिं मार्च्छे,न्त्यथ यान्कामयेत न सदस्या मार्तिं मार्च्छेयु रिति- तेभ्य एतेन सर्वं सदꣳ परिब्रूया,त्ते न सदस्या मार्तिं मार्च्छे,न्त्यथ यङ्कामयेत प्रमीयेतेति- तमेतेभ्य आवृश्चे-त्प्रमीयते।।

7.20 तदाहु- र्यदैन्द्रो यज्ञो-ऽथ कस्मा द्वावेव प्रातस्सवने प्रस्थितानां प्रत्यक्षा दैन्द्रीभ्याँ यजतो- होता चैव ब्राह्मणाच्छंसी चे- दन्ते सोम्यं मध्विति होता यज-तीन्द्र त्वा वृषभँ वयमिति ब्राह्मणाच्छंसी- नाना देवत्याभि रितरे- कथन्तेषा मैन्द्रियो भवन्ति?

मित्रँ वयं हवामह इति- मैत्रावरुणो यजति वरुणं सोमपीतय इति, यद्वै किञ्च पीतव-त्तदैन्द्रं रूप-न्तेनेन्द्रं प्रीणाति, मरुतो यस्य हि क्षय इति- पोता यजति- स सुगोपातमो जन इ,तीन्द्रो वै गोपा-स्तदैन्द्रं रूप-न्तेनेन्द्रं प्री,णात्यग्ने पत्नी रिहाऽऽवहेति- नेष्टा यजति- त्वष्टारं सोमपीतय इति, यद्वै किञ्च पीतव-त्तदैन्द्रं रूप-न्तेनेन्द्रं प्रीणा,त्युक्षान्नाय वशाऽन्नाये त्याग्नीध्रो यजति- सोमपृष्ठाय वेधस इ,तीन्द्रो वै वेधा-स्तदैन्द्रं रूप-न्तेनेन्द्रं प्रीणाति, प्रातर्य्यावभि रागत-न्देवेभि र्जेन्या वसू- इन्द्राग्नी सोम पीतय इति स्वयंसमृद्धा अच्छावाक,स्यैवमु हैता ऐन्द्रियो भवन्ति, यन्नानादेवत्या- स्तेनान्या देवताः प्रीणाति, यद्गायत्र्य- स्तेनाऽऽग्नेय्य,स्तस्मा देताभि स्त्रय मवाऽऽप्तं भवति।। 2.2.20।।

☸ 7.21 ते वै खलु सर्व एव माध्यन्दिने प्रस्थितानां प्रत्यक्षा दैन्द्रीभि र्यज- न्त्यभितृण्णवतीभि रेके, पिबा सोम.मभि य मुग्र तर्द इति- होता यजति, स ईं पाहि य ऋजीषी तरुत्र इति- मैत्रावरुण, एवा पाहि प्रत्नथा मन्दतु त्वेति- ब्राह्मणाच्छं,स्यर्वाङेहि सोमकाम न्त्वाऽऽहु रिति-पोता, तवायं सोम स्त्व.मेह्यर्वा.ङिति- ने,ष्टेन्द्राय सोमाः प्र दिवो विदाना इत्यच्छावाक, आ पूर्णो अस्य कलश

स्स्वाहे.त्याग्नीध्र, -एवमु हैता अभितृण्णवत्यो भव,न्तीन्द्रो वै प्रातस्सवनेना ऽभ्यजय,त्स एताभि र्माध्यन्दिनं सवन मभ्यतृण,त्तद्य.देताभि र्माध्यन्दिनं सवन मभ्यतृण-त्तस्मादेता अभितृण्णवत्यो भवन्ति।। 2.2.21।।

7.22 तदाहु- र्यदैन्द्रार्भव न्तृतीयसवन,मथ कस्मा देक एव तृतीयसवने प्रस्थितानां प्रत्यक्षा दैन्द्रार्भव्या यज,तीन्द्र ऋभुभि र्वाजवद्भि स्समुक्षित.मिति होतैव- नानादेवत्याभि रितरे- कथ.न्तेषा मैन्द्रार्भव्यो भव,न्तीन्द्रावरुणा सुतपा विमं सुत मिति मैत्रावरुणो यजति- युवो रथो अध्वरो देववीतय इति बहूनि वाऽऽह- तदृभूणां रूप,मिन्द्रश्च सोमं पिबतं बृहस्पत इति ब्राह्मणाच्छंसी यज- त्यावाँ विश.न्त्विन्दव स्स्वाभुव इति बहूनि वाऽऽह- तदृभूणां रूप,मा वो वहन्तु सप्तयो रघुष्यद- इति पोता यजति- रघुपत्वा नः प्र जिगात बाहुभि रिति बहूनि वाऽऽह- तदृभूणां रूप,ममेव न स्सुहवा आ हि गन्तनेति नेष्टा यजति- गन्तनेति बहूनि वाऽऽह तदृभूणां रूप,मिन्द्राविष्णू पिबतं मध्वो अस्ये-त्यच्छावाको यज-त्या वा मन्धांसि मदिरा.ण्यग्म न्निति बहूनि वाऽऽह- तदृभूणां रूप,मिमं स्तोम मर्हते जातवेदस इत्याग्नीध्रो यजति- रथमिव संमहे मा

मनीषयेति बह्वनि वाऽह- तद्दभूणां रूप,मेवमु हैता ऐन्द्रार्भव्यो भवन्ति, यन्नानादेवत्या- स्तेनान्या देवताꣳ प्रीणाति, यदु जगत्प्रासाहा- जागतमु वै तृतीयसवन- न्तृतीयसवनस्य समष्ट्यै।।

7.23 विचक्षणवतीँ वाचं भाषन्ते चनसितवतीँ, विचक्षयन्ति ब्राह्मणञ्च- चनसयन्ति प्राजापत्यं, सत्यँ वद,न्त्येतद्वै मनुष्येषु सत्यँ- यच्चक्षु,स्तस्मादाहु राचक्षाण -मद्रागिति, स यदा.हाद्राक्ष.मिति- तथा हास्य श्रद्दधति, यद्यु वै स्वय न्दृष्टं भवति- न बह्वनां जनाना- मेष श्रद्दधाति, तस्मा.द्विचक्षणवतीँ वाचं भाषन्ते चनसितवतीं, सत्योत्तरा हैवैषाँ वागुदिता भवति।। 2.2.23।।

7.24 समृतयज्ञो वा एष यद्दर्शपूर्णमासौ, कस्य वाव देवा यज्ञ मागच्छन्ति- कस्य वा न, बह्वनाँ वा एत द्यजमानानां सामान्य मह- स्तस्मा.त्पूर्वेद्यु र्देवताꣳ परिगृह्णीया,द्यो ह वै पूर्वेद्यु र्देवताꣳ परिगृह्णाति- तस्य श्वोभूते यज्ञ मागच्छन्ति, तस्मा.द्धिहव्यस्य चतस्र ऋचो जपे,द्यज्ञविदो हि मन्यन्ते- सोम एव समृत इति, यज्ञो यज्ञेन समृतः।। 24।। इति गोपथ ब्राह्मणोत्तरभागे द्वितीयः प्रपाठकः समाप्तः

उत्तरार्धे तृतीयः प्रपाठकः

8.1 ओम्। देवपात्रँ वै वषड्कारो, यद्वषड्करोति- देवपात्रेणैव तद्देवता स्तर्पय,त्यथो यदभितृष्यन्ती रभिसंस्थ न्तर्पय-त्येव.मेव तद्देवता स्तर्पयति- यदनुवषड्करोति, तद्यथैवादोऽश्वान् वा गा वा पुनरभ्याकार न्तर्पय- त्येव.मेव तद्देवता स्तर्पयति- यदनुवषड्करो,तीमा नेवाग्नी नुपाऽऽसत इत्याहु र्धिष्ण्या- नथ कस्मा.त्पूर्वस्मि न्नेवाग्नौ जुह्वति- पूर्वस्मि.न्वषड्करोति, यदेव सोमस्याग्ने वीहीत्यनु वषड्करोति- तेनैव वषड्करोति- धिष्ण्या.न्प्रीणा,त्यथ संस्थिता.न्त्सोमा.न्भक्षयन्तीत्याहु- र्येषा न्नानु वषड्करोति, तदाहुः- को नु सोमस्य स्विष्टकृद्भाग इति- यदेव सोमस्याग्ने वीहीत्यनु वषड्करोति- तेनैव संस्थिता.न्त्सोमा न्भक्षयन्तीत्याहु, स्स उ एष सोमस्य स्विष्टकृद्भागो- यदनुवषड्करोति।। 2.3.1।।

8.2 वज्रो वै वषड्कार- स्स यन्द्विष्या-त्तं मनसा ध्याय.न्वषड्कुर्या,त्तस्मिं.स्तद्वज्र मास्थापयति, षडिति वषड्करोति- षड्वा ऋतव- ऋतूना माप्त्यै, वौषडिति वषड्करो-त्यसौ वाव वा.वृतव ष्व,डेतमेव तदृतु.ष्वादधा-त्यृतुषु प्रतिष्ठापयति, तदु ह स्माऽऽह बैद- एतानि वा एतेन ष.ड्प्रतिष्ठापयति, द्यौरन्तरिक्षे प्रतिष्ठिता-ऽन्तरिक्षं

पृथिव्यां- पृथिव्य.प्स्वाप स्सत्ये- सत्यं ब्रह्मणि- ब्रह्म तपसी.त्येता एव तद्देवता꣡ प्रतिष्ठा꣡- प्रति.तिष्ठन्ती रिदं सर्वमनु प्रतितिष्ठति, प्रति.तिष्ठति प्रजया पशुभि र्य एवँ वेद।। 2.3.2।। (वौषट् - वौ (असौ), षट् - ऋतवः, वौ- ऋतवः- वावृतवः)

8.3 त्रयो वै वषड्कारा, वज्रो- धामच्छ- द्रिक्त,स्स यदेवोच्चै.र्बलँ वषड्करोति- स वज्र-स्तन्तं प्रहरति द्विषते भ्रातृव्याय वधँ- योऽस्य स्तृत्य स्तस्मै स्तरीतवे- तस्मा.त्स भ्रातृव्यवता वषड्कृत्यो,ऽथ यस्सम स्सन्ततो निर्हाणर्च-स्स धामच्छ,त्तन्तं प्रजाश्च पशव श्चानूपतिष्ठन्ते- तस्मात्स प्रजाकामेन पशुकामेन वषड्कृत्यो,ऽथ येनैव षडप.राध्नोति- स रिक्तो, रिणक्त्यात्मानं- रिणक्ति यजमानस्य- पापीया.न्वषड्कर्ता भवति- पापीयान् यस्मै वषड्करोति, तस्मा.त्तस्याशा न्नेया,त्किंस्वि.त्स यजमानस्य पापभद्र माद्रियेतेति ह स्माऽऽह- योऽस्य वषड्कर्ता भव,त्यत्रैवैनँ यथा कामयेत तथा कुर्या-द्यङ्कामयेत यथैवानीजानोऽभू-त्तथैवेजान स्स्यादिति, यथैवास्यर्चं ब्रूया-त्तथैवास्य वषड्कुर्या,त्समानमेवैन न्तत्करोति, यङ्कामयेत पापीया.न्त्स्यादि-त्युच्चैस्तरा मस्यर्चं ब्रूया- न्नीचैस्तराँ वषड्कुर्या-त्पापीयांस मेवैन न्तत्करोति, यङ्कामयेत

श्रेया.न्स्याॅदिति- नीचैस्तरा मस्यर्चं ब्रूया- दुच्चैस्तराँ वषड्कुर्या- च्छ्रेयांस मेवैन न्तत्करोति, श्रिय एवैन न्तच्छ्रिय मादधाति।। 2.3.3।।

☸ 8.4 यस्यै देवतायै हविर्गृहीतं स्या-त्तां मनसा ध्याय.न्वषड्कुर्या- त्साक्षादेव तद्देवतां प्रीणाति- प्रत्यक्षा द्देवतां परिगृह्णाति, सन्तत मृचा वषड्कृत्यं सन्तत्यै, सन्धीयते प्रजया पशुभि- र्य एवँ वेद।। 2.3.4।।

☸ 8.5 वज्रो वै वषड्कार, स्स उ एष प्रहृतोऽशान्तो दीदाय, तस्य ह न सर्व एव शान्तिँ वेद- नो प्रतिष्ठा,न्तस्मा.द्धाप्येतर्हि भूयानिव मृत्यु,स्तस्य हैषैव शान्ति- रेषा प्रतिष्ठा- यद्वागिति, वषड्कृत्य वागि.त्यनुमन्त्रयते- वषड्कार मा मां प्रमृक्षो माऽहन्त्वां प्रमृक्षं, बृहता मन उपह्वये- व्यानेन शरीरं, प्रतिष्ठाऽसि, प्रतिष्ठा.ङ्गच्छ, प्रतिष्ठां मा गमये-दिति, तदु ह स्माऽऽह दीर्घ मेवैतत्,सदप्रभ्वोज स्सह ओज- इत्यनुमन्त्रये,तौजश्च ह वै सहश्च वषड्कारस्य प्रियतमे तन्वौ- प्रियाभ्यामेव तत्तनूभ्यां समर्धयति, प्रियया तन्वा समृध्यते- य एवँ वेद।। 2.3.5।।

☸ 8.6 वाक्क वै प्राणापानौ च वषड्कार,स्ते वषड्कृते वषड्कृते व्युत्क्रामन्ति, ताननु मन्त्रयते- वागोज स्सह ओजो मयि प्राणापाना

विति, वाचञ्चैव तत्प्राणापानौ च होताऽऽत्मनि प्रतिष्ठापयति, सर्व मायु.रेति- न पुरा जरसः प्रमीयते- य एवँ वेद, शन्नो भव हृद आपीत इन्दो पितेव सोम सूनवे सुशेवः। सखेव सख्य उरुशंस धीरः प्रण आयु र्जीवसे सोम तारी-रित्यात्मानं प्रत्यभिमृश,तीश्वरो वा एषोऽप्रत्यभिमृष्टो यजमानस्याऽऽयुः प्रत्यवहर्तो-रनर्ह.न्मा भक्षयेदिति, तद्यदेतेन प्रत्यभिमृश-त्यायु रेवास्मै तत्प्रतिरत,- आप्यायस्व सन्ते पयांसीति- द्वाभ्या.ञ्चमसा नाप्यायय.न्त्यभिरूपाभ्याँ, यद्यज्ञेऽभिरूप- न्तत्समृद्धम्।।

8.7 प्राणा वा ऋतुयाजा,स्तद्य.दृतुयाजै श्चरन्ति- प्राणानेव तद्यजमाने दधति, षड्ऋतुनेति यजन्ति- प्राणमेव तद्यजमाने दधति, चत्वार ऋतुभि र्यज -न्त्यपानमेव तद्यजमाने दधति, द्विर्ऋतुनेत्युपरिष्टा.द्व्यानमेव तद्यजमाने दधति, स चाऽऽसु सम्भृत स्त्रेधा विहृतः- प्राणोऽपानो व्यान इति, ततोऽन्यत्र गुणित,स्तथा ह यजमान स्सर्व मायुरे-त्यस्मि न्लोक आर्ध्नो-त्याप्नो त्यमृतत्व मक्षितं स्वर्गे लोके, ते वा एते प्राणा एव- यदृतुयाजा,स्तस्मा दनवानन्तो यजन्ति- प्राणानां सन्तत्यै, सन्तता इव हीमे प्राणा,- अथो ऋतवो वा ऋतुयाजा- स्संस्थाऽनुवषट्कारो, योऽत्रानुवषट्कुर्या दसंस्थिता

नृतू.न्संस्स्थापये,द्यस्त न्तत्र ब्रूया- दसंस्थिता नृतू.न्त्समतिष्ठिप-
न्दुःखरूपं भविष्यतीति- शश्वत्तथा स्यात्।। (तस्मादनवानन्तः-
तस्मात्, अ-नव-अनन्तः, अनन्तः - अन (प्राणने)-शतृ-जस्)

8.8 तदाहु- र्य.द्धोता यक्ष.द्धोता यक्षदिति मैत्रावरुणो होत्रे प्रेष्य-
त्यथ कस्मा.दहोतृभ्य स्सद्भ्यो होत्राऽऽशंसिभ्यो- होता यक्ष द्धोता
यक्षदिति प्रेष्यतीति, वाग्वै होता- वा.क्सर्व ऋत्विजो-
वाग्यक्ष.द्वाग्यक्षदि,त्यथो सर्वे वा एते सप्त होतारो,ऽपि वा
ऋचाऽभ्युदितं- सप्त होतार ऋतुथा यजन्ती,त्यथ यदुपरिष्टा द्वादशार्चं
जामितायै, ते वै द्वादश भवन्ति, द्वादश ह वै मासा
स्सँवत्सर,स्सँवत्सरः प्रजापतिः- प्रजापति र्यज्ञ,स्स योऽत्र भक्षये-
द्यस्त.न्तत्र ब्रूया,दशान्तो भक्षो नानुवषट्कृत- आत्मान मन्त रगा- न्न
जीविष्यतीति- तथा ह स्या,द्यो वै भक्षये-त्प्राणो भक्षः- प्राण
आत्मान मन्त रगादिति- तथैव भवति, लिम्पेदिवै.वाव जिघ्रे-त्तत्र
तद्विदेवत्येषु चेति, तदु तत्र शासनँ वेदयन्ते,ऽथ यदमू व्यभिचरतो
नान्योऽन्य मनुप्रपद्येते अध्वर्यू, तस्मा दृतु.र्ऋतु.न्नानुप्रपद्यते।।

8.9 प्रजापतिर्वै यत्प्रजा असृजत, ता वै तान्ता असृजत, ता
हिङ्कारेणैवाभ्यजिघ्र,त्ताः प्रजा अश्व मारं,स्तद्वध्यते वा एतद्यज्ञो-

यद्धवींषि पच्यन्ते- यत्सोम स्सूयते- यत्पशु रालभ्यते, हिङ्कारेण वा एत.त्प्रजापतिर्हि तमभि जिघ्रति, यज्ञस्याहततायै- यज्ञस्याऽऽस्यै- यज्ञस्य वीर्यवत्ताया इति, तस्मादु हिङ्क्रियते, तस्मादु यमेव पिता पुत्राणां सूर्क्षति- स श्रेष्ठो भवति, प्रजापतिर्हि तमभि जिघ्रति, यच्छकुनि राण्ड मध्यास्ते- यन्न सूयते- तद्धि साऽपि हिङ्कृणो,त्यथो खल्वाहु-र्महर्षिर्वा एत द्यज्ञस्याग्रेगेय मपश्य,त्तदेत द्यज्ञस्याग्रेगेयँ- यद्धिङ्कार,स्तन्देवाश्च ऋषय श्चाब्रुव,न्वसिष्ठो ऽय मस्तु- यो नो यज्ञस्याग्रेगेय मद्रागिति, तदेत द्यज्ञस्याग्रेगेयँ यद्धिङ्कार,स्ततो वै स देवानां श्रेष्ठोऽभव,द्येन वै श्रेष्ठ- स्तेन वसिष्ठ,स्तस्मा द्यस्मि न्वासिष्ठो ब्राह्मण स्स्या-त्तन्दक्षिणाया नान्तरिया,त्तथा ह्यस्य प्रीतो हिङ्कारो भव,त्यथ देवाश्च ह वा ऋषयश्च यदृक्सामे अपश्यं- स्ते ह स्मैते अपश्यं,स्ते यत्रैते अपश्यं-स्तत एवैनं सर्व न्दोह मदुह्रं,स्ते वा एते दुग्धे यातयामे- ये ऋक्सामे, ते हिङ्कारेणैवाऽऽप्यायेते, हिङ्कारेण वा ऋक्सामे आपीने यजमानाय दोह न्दुहाते, तस्मादु हिङ्कृत्याऽध्वर्यव स्सोम मभिषुण्वन्ति, हिङ्कृत्योद्गातार स्साम्ना स्तुवन्ति, हिङ्कृत्योक्थश ऋचाऽऽर्त्विज्य ङ्कुर्वन्ति, हिङ्कृत्याथर्वाणो ब्रह्मत्व.ङ्कुर्वन्ति, तस्मादु हिङ्क्रियते, प्रजापतिर्हि तमभि जिघ्र,त्यथो

खल्वाहु- रेको वै प्रजापते र्व्रतं बिभर्ति- गौरेव, तदुभये पशव उपजीवन्ति- ये च ग्राम्या ये चाऽऽरण्या इति।। 2.3.9।।

8.10 देवविशः कल्पयितव्या इत्याहु- श्छन्द श्छन्दसि प्रतिष्ठाप्यमिति, शंसावो मित्या ह्वयते प्रातस्सवने त्र्यक्षरेण- शंसावो दैवे -त्यध्वर्युः प्रति गृणाति पञ्चाक्षर-न्तदष्टाऽक्षरं संपद्यते- ऽष्टाऽक्षरा वै गायत्री- गायत्री मेवैत त्पुरस्ता.त्प्रातस्सवने ऽचीक्लृपता,मुक्थँ वाचीत्याह शस्त्वा चतुरक्षर-मोमुक्थशा- इत्यध्वर्युः प्रतिगृणाति चतुरक्षर-न्तदष्टाक्षरं संपद्यते-ऽष्टाऽक्षरा वै गायत्री- गायत्री मेवैत दुभयतः प्रातस्सवने ऽचीक्लृपता,मध्वर्यो शंसावो मित्याह्वयते माध्यन्दिने षडक्षरेण- शंसावो दैवे-त्यध्वर्युः प्रतिगृणाति पञ्चाक्षर-न्तदेकादशाक्षरं संपद्यत- एकादशाक्षरा वै त्रिष्टु.प्त्रिष्टुभ मेवैतत्पुरस्ता न्माध्यन्दिने ऽचीक्लृपता,मुक्थँ वाचीन्द्रायेत्याह शस्त्वा षडक्षर- (मो?)मुक्थशा यजे.त्यध्वर्युः प्रतिगृणाति पञ्चाक्षर-न्तदेकादशाक्षरं संपद्यत - एकादशाक्षरा वै त्रिष्टु.प्त्रिष्टुभ मेवैत दुभयतो माध्यन्दिने ऽचीक्लृपता,मध्वर्यो शंसावो (?) मित्याह्वयते तृतीयसवने सप्ताक्षरेण- शंसावो दैवे-त्यध्वर्युः प्रतिगृणाति पञ्चाक्षर-न्तद्द्वादशाक्षरं संपद्यते- द्वादशाक्षरा वै जगती-

जगती मेवैत.त्पुरस्ता.त्तृतीयसवने ऽचीक्लृपता,मुक्थँ वाचीन्द्राय देवेभ्य इत्याह शस्त्वा नवाक्षर- (मो?)मुक्थशा इत्यध्वर्युः प्रतिगृणाति त्र्यक्षर-न्तद्द्वादशाक्षरं संपद्यते- द्वादशाक्षरा वै जगती- जगती मेवैत दुभयत स्तृतीयसवने ऽचीक्लृपता-मित्येतद्वै छन्द श्छन्दसि प्रतिष्ठापयति, कल्पयत्येव देवविशो- य एवँ वेद, तदप्येषाऽभ्यनूक्ता- यद्गायत्रे अधि गायत्र माहितमिति।। 2.3.10।।

8.11 अथैत न्नानाछन्दांस्यन्तरेण गर्ता इ,वाथैते श्रविष्ठे बलिष्ठे अनार्तै देवते- ताभ्यां प्रतिपद्यते, तद्गर्तस्कन्दं रोहस्य रूपं स्वर्ग्य- न्तदनवानं सङ्ग्रामे,दमृतँ वै प्रणवो,ऽमृतेनैव तन्मृत्यु न्तरति, तद्यथा मन्त्रेण वा वंशेन वा गर्तं सङ्क्रामे-देव.न्तत्प्रणवेनोप सन्तनोति, ब्रह्म ह वै प्रणवो- ब्रह्मणैवास्मै तद्ब्रह्मोप सन्तनोति, शुद्धः प्रणव स्स्या.त्प्रजाकामानां, मकारान्तः प्रतिष्ठाकामानां- मकारान्तः प्रणव स्स्यादिति हैक आहु,श्शुद्ध इति त्वेव स्थितो, मीमांसितः प्रणवो,ऽथात इह शुद्ध- इह पूर्ण इति, शुद्धः प्रणव स्स्या.च्छस्त्रानुवचनयो र्मध्य इति ह स्माऽऽह कौषीतकि,स्तथा संहितं भवति- मकारान्तोऽवसानार्थे, प्रतिष्ठा वा अवसानं-

प्रतिष्ठित्या ए,वाथोभयो॰ कामयो राप्त्या, -एतौ वै छन्द॰प्रवाहा-ववर.ञ्छन्द॰- परञ्छन्दो ऽतिप्रवहत,स्तस्याऽऽयुर्न हिनस्ति, छन्दसा.ञ्छन्दोऽतिप्रौढं स्या,द्यत्रैव य.न्द्विष्या-त्तं मनसा प्रैव विध्ये,च्छन्दसा.ङ्कृन्तत्रे द्रवति वा- स वा शीर्यत इति, त्रि॰ प्रथमा न्त्रिरुत्तमा मन्वाह- यज्ञस्यैव तद्बसौ नह्यति स्थेम्ने बलायाविस्त्रंसाय, यद्यपि छन्द॰ प्रातस्सवने युज्येतार्धर्चश एव तस्य शंस्यं गायत्र्या रूपे,णाथो प्रातस्सवनरूपेणेति, न त्रिष्टुब्जगत्या.वेतस्मि न्स्थानेऽर्धर्च.शस्ये, यत्किञ्चि च्छन्द॰ प्रातस्सवने युज्येतां- पच्छ एवैनयो श्शास्यमिति- सा स्थितिः।। 2.3.11।।

8.12 अथात एकाहस्य प्रातस्सवनं, प्रजापतिं ह वै यज्ञ न्तन्वानं बहिष्पवमान एव मृत्यु-र्मृत्युपाशेन प्रत्युपाक्रामत, स आग्नेय्या गायत्र्याऽऽज्यं प्रत्यपद्यत, मृत्यु र्वाव तं पश्य.न्प्रजापतिं पर्यक्राम,त्तं सामाऽऽज्येष्वसीद,त्स वायव्या प्रउगं प्रत्यपद्यत, मृत्यु र्वाव तं पश्य.न्प्रजापतिं पर्यक्राम,त्तं माध्यन्दिने पवमानेऽसीद,त्स ऐन्द्या त्रिष्टुभा मरुत्वतीयं प्रत्यपद्यत, मृत्यु र्वाव तं पश्य.न्प्रजापतिं पर्यक्राम,त्स तेनैव द्रविणे पूर्वो निष्केवल्यस्य स्तोत्रिय माऽसीद,त्तमस्तृणो,त्तस्मादु य एव पूर्व मासीदति- स तत्स्तृणुते

विद्वा,न्मृत्यु रनवकाश मपाद्रव-दशंस.दितरो निष्केवल्य,न्तस्मा देक मेवोक्थं होता मरुत्वतीयेन प्रतिपद्यते निष्केवल्य मे,वात्र हि प्रजापतिं मृत्यु र्व्यजहात्।। 2.3.12।।

8.13 मित्रावरुणा.वब्रवी- द्युव न्न इमँ यज्ञस्याङ्ग मनु समाहरतं मैत्रावरुणीया,न्तथेत्यब्रूता,न्तौ सयुजौ सबलौ भूत्वा प्रासहा मृत्यु मत्यैता,न्तौ ह्यस्यैत द्यज्ञस्याङ्ग मनु समाहरतां- मैत्रावरुणीया,न्तस्मा न्मैत्रावरुणꣳ प्रातस्सवने मैत्रावरुणानि शंसति, तौ ह्यस्यैत द्यज्ञस्याङ्ग मनु समाहरताँ, यद्वेव मैत्रावरुणानि शंसति- प्रति वां सूर उदिते विधेम- नमोभि र्मित्रावरुणोत हव्यै- रुत वा मुषसो बुधि- साकं सूर्यस्य रश्मिभि रित्यृचाऽभ्यनूक्त,मा नो मित्रावरुणा-ऽऽनो गन्तं रिशादसेति- मैत्रावरुणस्य स्तोत्रियानुरूपौ, प्र वो मित्राय गायते-त्युक्थमुखं, प्र मित्रयो र्वरुणयो रिति पर्यास, आयातं मित्रावरुणेति यज,त्येते एव तद्देवते यथाभागं प्रीणाति, वषट्कृत्यानु वषट्करोति, प्रत्येवाभिमृशन्ते, नाऽऽप्याययन्ति, न ह्यनाराशंसा स्सीदन्ति।। 2.3.13।।

8.14 इन्द्र मब्रवी-त्त्वन्न इमँ यज्ञस्याङ्ग मनुसमाहर ब्राह्मणाच्छंसीया,ङ्केन सहेति- सूर्येणेति, तथेत्यब्रूता,न्तौ सयुजौ

सबलौ भूत्वा प्रासहा मृत्यु मत्यैता,न्तौ ह्यस्यैत द्यज्ञस्याङ्ग मनुसमाहरतां ब्राह्मणाच्छंसीया,न्तस्मा.द्ब्राह्मणाच्छंसी प्रातस्सवन ऐन्द्राणि सूर्यन्यङ्गानि शंसति, तौ ह्यस्यैत द्यज्ञस्याङ्ग मनुसमाहरताँ, यद्वेवैन्द्राणि सूर्यन्यङ्गानि शंस,तीन्द्र पिब प्रतिकामं सुतस्य- प्रातस्साव स्तव हि पूर्वपीति- रित्यृचाऽभ्यनूक्त,मायाहि सुषुमा हि त- आ नो याहि सुतावत- इति ब्राह्मणाच्छंसिन स्स्तोत्रियानुरूपा,वयमु त्वा विचर्षण इत्युक्थमुख,मुद्धेदभि श्रुता मघमिति पर्यास, इन्द्र क्रतुविद- मिति यज,त्येते एव तद्देवते यथाभागं प्रीणाति, वषट्कृत्यानु.वषट्करोति, प्रत्येवाभि मृशन्ते, नाऽऽप्याययन्ति- न ह्यनाराशंसा स्सीदन्ति।। 2.3.14।।

8.15 इन्द्राग्नी अब्रवी-द्युवन्न इमं यज्ञस्याङ्ग मनु समाहरत मच्छावाकीया,न्तथेत्यब्रूता,न्तौ सयुजौ सबलौ भूत्वा प्रासहा मृत्यु मत्यैता,न्तौ ह्यस्यैत द्यज्ञस्याङ्ग मनुसमाहरता मच्छावाकीया,न्तस्मा दच्छावाकः प्रातस्सवन ऐन्द्राग्नानि शंसति, तौ ह्यस्यैत द्यज्ञस्याङ्ग मनुसमाहरताँ, यद्वेवैन्द्राग्नानि शंसति- प्रातर्यावभि रागत न्देवेभि र्जेन्यावसू। इन्द्राग्नी सोमपीतय- इत्यृचाऽभ्यनूक्त,मिन्द्राग्नी आ गत- न्तोशा वृत्रहणा हुव- इत्यच्छावाकस्य

स्तोत्रियानुरूपा,विन्द्राग्नी अपसस्परी-त्युक्थमुख,मिहेन्द्राग्नी उपह्वय इति पर्यास, इन्द्राग्नी आगत-मिति यज,त्येते एव तद्देवते यथाभागं प्रीणाति, वषङ्कृत्यानु वषङ्करोति, प्रत्येवाभि मृशन्ते, नाऽऽप्याययन्ति, न ह्यनाराशंसा स्सीदन्ति।। 2.3.15।।

8.16 अथ शंसावोमिति, स्तोत्रियायाऽनुरूपा.योक्थमुखाय परिधानीयाया इति- चतुश्चतु राह्वयन्ते, चतस्रो वै दिशो- दिक्षु तत्प्रतितिष्ठ,न्त्यथो चतुष्पादः पशवः- पशूना माप्त्या,अथो चतुष्पर्वाणो हि प्रातस्सवने होत्रका-स्तस्मा च्चतु स्सर्वे गायत्राणि शंसन्ति, गायत्रं हि प्रातस्सवनं- सर्वे समवतीभिः परिदधति, तद्य.त्समवतीभिः परिदध-त्यन्तो वै पर्यासोऽन्त उदर्को- ऽन्तेनैवान्तं परि दधति, सर्वे मद्वतीभि र्यजन्ति, तद्य न्मद्वतीभि र्यजन्ति- सर्वे सुतवतीभिः पीतवतीभि रभिरूपाभि र्यजन्ति, यद्यज्ञेऽभिरूप- न्तत्समृद्धं, सर्वेऽनुवषङ्कुर्वन्ति, स्विष्टकृत्वाऽनुवषङ्कारो- नेत्स्विष्टकृत मन्त रयामे,त्ययँ वै लोकः प्रातस्सवन-न्तस्य पञ्च दिशः- पञ्चोक्थानि प्रातस्सवनस्य, स एतैः पञ्चभि रुक्थै- रेताः पञ्च दिश आप्नो-त्येताः पञ्च दिश आप्नोति।। 2.3.16।।

8.17 घ्नन्ति वा एतत्सोमँ- यदभिषुण्वन्ति, यज्ञँ वा एतद्घ्नन्ति- यद्दक्षिणा नीयन्ते, यज्ञँ वा एत द्दक्षयन्ति, तद्दक्षिणाना न्दक्षिणात्वं, स्वर्गो वै लोको माध्यन्दिनं सवनँ, यन्माध्यन्दिने सवने दक्षिणा नीयन्ते- स्वर्गस्य लोकस्य समष्ट्यै, बहु देयं, सेतुँ वा एतद्यजमान स्संस्कुरुते- स्वर्गस्य लोकस्याऽऽक्रान्त्यै प्रजाक्रान्त्यै, द्वाभ्या.ङ्गार्हपत्ये जुहो.त्यध्वर्यु, रस्याक्रान्तेनाऽऽक्रामय-त्याग्नेय्याऽऽग्नीध्रीये-ऽन्तरिक्ष.न्तेन,यन्माध्यन्दिने सवने दक्षिणा नीयन्ते- स्वर्ग एतेन लोके, हिरण्यं हस्ते भव,त्यथ नयति- सत्यं वै हिरण्यं- सत्येनैवैन न्तन्नय,त्यग्रेण गार्हपत्य-ञ्जघनेन सदो-ऽन्तराऽऽग्नीध्रीयञ्च सदश्च, ता उदीची रन्तरा ऽऽग्नीध्रीयञ्च सदश्च चात्वाल.ञ्चोत्सृज,न्त्येतेन ह स्म वा अङ्गिरस स्स्वर्गँ लोक मायं-स्ता वा एताः पन्थान मभिवहन्ति।।

8.18 अग्नीधेऽग्रे ददाति- यज्ञमुखँ वा अग्नी-द्यज्ञमुखेनैव तद्यज्ञमुखं समर्धयति, ब्रह्मणे ददाति- प्राजापत्यो वै ब्रह्मा-प्रजापति.मेव तया प्रीणा,त्यृत्विग्भ्यो ददाति- होत्रा एव तया प्रीणाति, सदस्येभ्यो ददाति- सोमपीथ न्तया निष्क्रीणीते, न हि तस्मा अर्हति, सोमपीथ न्तया निष्क्रीणीया,द्यां शुश्रूषव आर्षेयाय

ददाति- देवलोके तयाऽऽर्ध्नोति, या मशुश्रूषवेऽनार्षेयाय ददाति- मनुष्यलोके तयाऽऽर्ध्नोति, या.मप्रसृप्ताय ददाति- वनस्पतय.स्तया प्रथन्ते, याँ याचमानाय ददाति- भ्रातृव्य न्तया जिन्वते, यां भीषा क्षत्र- न्तया ब्रह्माऽतीया,द्यां प्रतिनुदन्ते- सा व्याघ्री दक्षिणा, यस्तां पुनঃ प्रतिगृह्णीया-द्व्याघ्री ह्येनं भूत्वा प्रह्लीनीया,दन्यया सह प्रतिगृह्णीया-दथ हैनन्न प्रह्लीनाति।। 18।।

8.19 यद्गा न्ददाति- वैश्वदेवी वै गौ-र्विश्वेषामेव तद्देवाना न्तेन प्रिय न्धामोपैति, यदज न्ददा- त्याग्नेयो वा अजो-ऽग्नेरेव तेन प्रिय न्धामोपैति, यदवि न्ददा-त्याव्य न्तेनाव यजति, यत्कृतान्न न्ददाति- मांस न्तेन निष्क्रीणीते, यदनो वा रथो वा ददाति- शरीर न्तेन, यद्वासो ददाति- बृहस्पति न्तेन, यद्धिरण्य न्ददा- त्यायुस्तेन वर्षीयঃ कुरुते, यदश्व न्ददाति- सौर्यो वा अश्व- स्सूर्यस्यैव तेन प्रिय न्धामोपै,त्यन्ततঃ प्रतिहर्त्रे देयं- रुद्रो वै प्रतिहर्ता- रुद्रमेव तन्निरव.यजति, यन्मध्यतঃ प्रतिहर्त्रे दद्या- न्मध्यतो रुद्र मन्वव.यजे,त्स्वर्भानु र्वा आसुरि स्सूर्य न्तमसाऽविध्य-त्तदत्रि रपनुनोद- तदत्रि रन्वपश्य,द्यदात्रेयाय हिरण्य न्ददाति- तम एव

तेनापहते,ऽथो ज्योति रुपरिष्टा द्धारयति- स्वर्गस्य लोकस्य समष्ट्यै।। 2.3.19।।

8.20 अथात एकाहस्यैव माध्यन्दिन,मृक्क वा इदमग्रे साम चाऽऽस्तां, सैव नामर्गासी- दमो नाम साम, सा वा ऋक्.सामो.पावद्- न्मिथुनं संभवाव प्रजात्या इति, नेत्यब्रवी.त्साम, ज्यायान् वा अतो मम महिमेति, ते द्वे भूत्वोपावदता,न्ते न प्रति चन समवदत, तास्तिस्रो भूत्वोपावदन्, यत्तिस्रो भूत्वोपावदं-स्तत्तिसृभि स्समभव,द्यत्तिसृभि स्समभव-त्तस्मा त्तिसृभि स्स्तुवन्ति- तिसृभि रुद्गायन्ति- तिसृभिर्हि साम सम्मितं भवति, तस्मादेकस्य बह्व्यो जाया भवन्ति, न हैकस्या बहव स्सह पतयो, यद्वै तत्सा चामश्च समवदता- न्तत्सामाभव,त्तत्साम्न स्सामत्वम्, साम.न्भवति- श्रेष्ठता.ङ्गच्छति, यो वै भवति- स साम.न्भव,त्यसामन्य इति ह निन्दन्ते, ते वै पञ्चान्य.द्भूत्वा पञ्चान्य.द्भूत्वा ऽकल्पेता,माहावश्च- हिङ्कारश्च- प्रस्तावश्च- प्रथमा चोद्गीथश्च- मध्यमा च प्रतिहार- श्चोत्तमा च निधनञ्च- वषट्कारश्च, ते यत्पञ्चान्य.द्भूत्वा पञ्चान्य.द्भूत्वाऽकल्पेता- न्तस्मादाहुः पाङ्क्तो यज्ञः- पाङ्क्ताः पशव इति, यदु विराज न्दशिनी मभिसंपद्येता- न्तस्मा दाहु- र्विराजि यज्ञो

दशिन्यां प्रतिष्ठित इति, यदु बृहत्या प्रतिपद्यते- बार्हतो वा एष- य एष तपति- तदेनं स्वेन रूपेण समर्धयति, द्वे तिस्रः करोति पुनरादायं - प्रजात्यै रूपं, द्वाविवाग्रे भवत- स्तत उप प्रजायेते।। 2.3.20।।

8.21 आत्मा वै स्तोत्रियः- प्रजा अनुरूपः- पत्नी धाय्या- पशवः प्रगाथो- ग्रहा स्सूक्तँ, यदन्तरात्मं-स्तन्निवि,त्प्रतिष्ठा परिधानीया-ऽन्नँ याज्या, सोऽस्मिंश्च लोके भव.त्यमुष्मिंश्च, प्रजया च पशुभिश्च गृहेषु भवति- य एवँ वेद।। 2.3.21।।

8.22 स्तोत्रियं शंस-त्यात्मा वै स्तोत्रिय-स्स मध्यमया वाचा शंस्तव्य- आत्मान मेवास्य तत्कल्पय,त्यनुरूपं शंसति- प्रजा वा अनुरूप-स्तस्मा.त्प्रतिरूप मनुरूप.ङ्कुर्वन्ति, प्रतिरूपो हैवास्य प्रजाया माजायते- नाप्रतिरूप,स्तस्मा.त्प्रतिरूप मनुरूप.ङ्कुर्वन्ति, स उच्चैस्तरा.मिव शंस्तव्यः- प्रजा मेवास्य तच्छ्रेयसी.ङ्करोति, धाय्यां शंसति, पत्नी वै धाय्या, सा नीचैस्तरामिव शंस्तव्या,ऽप्रतिवादिनी हैवास्य गृहेषु पत्नी भवति- यत्रैवँ विद्वा.न्नीचैस्तरा न्धाय्यां शंसति, प्रगाथं शंसति, पशवो वै प्रगाथ,स्स स्वरवत्या वाचा शंस्तव्यः, पशवो वै प्रगाथः- पशव स्स्वरः- पशूना माप्त्यै, सूक्तं शंसति, गृहा

वै सूक्तं- प्रतिवीत.न्त.त्प्रतिवीततमया वाचा शंस्तव्यं, स यद्यपि ह दूरा.त्पशू न्लभते- गृहा नेवैना नाजिगमिषति- गृहा हि पशूनां प्रतिष्ठा, निविदं शंसति, यदन्तरात्मं.स्तन्निवि- त्तदेवास्य तत्कल्पयति, परिधानीयां शंसति- प्रतिष्ठा वै परिधानीया- प्रतिष्ठाया एवैन मन्ततः प्रतिष्ठापयति, याज्यया यज-त्यन्नँ वै याज्या-ऽन्नाद्य मेवास्य तत्कल्पयति, मूलँ वा एत द्यज्ञस्य- यद्धाय्याश्च- याज्याश्च, तद्य.दन्या अन्या धाय्याश्च याज्याश्च कुर्यु-रुन्मूलमेव तद्यज्ञ.ङ्कुर्यु,स्तस्मात्ता स्समान्य एव स्युः।। 2.3.22।।

8.23 तदाहुः- किन्देवत्यो यज्ञ इ-त्यैन्द्र इति ब्रूया,दैन्द्रे वाव यज्ञे सति- यथाभाग मन्या देवता अन्वायत्ताः प्रातस्सवने मरुत्वतीये तृतीयसवने चा,थ हैत.त्केवल मेवेन्द्रस्य यदूर्ध्वं मरुत्वतीया,त्तस्मा.त्सर्वे निष्केवल्यानि शंसन्ति, यदेव निष्केवल्यानि- तत्स्वर्गस्य लोकस्य रूपँ, यद्वेव निष्केवल्या-न्येकं ह वा अग्रे सवन मासी.त्प्रातस्सवन.मे,वाथ हैतं प्रजापति रिन्द्राय ज्येष्ठाय पुत्रायैत.त्सवन न्निरमिमीत- यन्माध्यन्दिनं सवन,न्तस्मा न्माध्यन्दिने सवने सर्वे निष्केवल्यानि शंसन्ति, यदेव निष्केवल्यानि- तत्स्वर्गस्य लोकस्य रूपँ, यद्वेव निष्केवल्यानि, या

ह वै देवता॰ प्रातस्सवने होता शंसति- ता श्शस्त्वा होत्राशंसिनोऽनुशंसन्ति, मैत्रावरुण न्तृचं प्रउगे होता शंसति, तदुभयं मैत्रावरुणं मैत्रावरुणोऽनुशंस,त्यैन्द्र न्तृचं प्रउगे होता शंसति, तदुभय मैन्द्र,मैन्द्रं ब्राह्मणाच्छंस्यनु शंस,त्यैन्द्राग्न न्तृचं प्रउगे होता शंसति, तदुभय मैन्द्राग्न,मैन्द्राग्न मच्छावाकोऽनु शंस,त्यथ हैत.त्केवल मेवेन्द्रस्य यदूर्ध्वं मरुत्वतीया,त्तस्मात्सर्वै निष्केवल्यानि शंसन्ति, यदेव निष्केवल्यानि- तत्स्वर्गस्य लोकस्य रूपँ, यद्वेव निष्केवल्यानि- यदे.ददेवी रसहिष्ट माया- अथाभव.त्केवल स्सोमो अस्ये-त्यृचाऽभ्यनूक्त,न्देवान् ह यज्ञ न्तन्वाना नसुर.रक्षां- स्यजिघांसं,-स्तेऽब्रुव.न्वामदेव- न्त्व न्न इमँ यज्ञ न्दक्षिणतो गोपायेति, मध्यतो वसिष्ठ,मुत्तरतो भरद्वाजं, सर्वा.ननु विश्वामित्र,न्तस्मा न्मैत्रावरुणो वामदेवान्न प्रच्यवते- वसिष्ठा. द्ब्राह्मणाच्छंसी, भरद्वाजा दच्छावाक-स्सर्वै विश्वामित्रा,देत एवास्मै तदृषयोऽहरह र्नामगा अप्रमत्ता यज्ञं रक्षन्ति- य एवँ वेद- य एवँ वेद।। 2.3.23।।इति अथर्ववेदे गोपथब्राह्मणोत्तरभागे तृतीयः प्रपाठकः

उत्तरार्धे चतुर्थ॰ प्रपाठकः

9.1 ओम्। कया नश्चित्र आभुव- त्कया त्वन्न ऊत्येति मैत्रावरुणस्य स्तोत्रियानुरूपौ, कस्त मिन्द्रन्त्वा वसुमिति बार्हतः प्रगाथ,स्तस्योपरिष्टाद्ब्राह्मणम्, सद्यो ह जातो वृषभः कनीन इत्युक्थमुख,मेवा त्वामिन्द्र वज्रि न्नत्रेति पर्यास, उशन्नु षु ण स्सुमना उपाक इति यज,त्येतामेव तद्देवताँ यथाभागं प्रीणाति, वषड्कृत्यानु वषड्करोति प्रत्येवाभिमृशन्ते, नाऽप्याययन्ति, न ह्यनाराशंसा स्सीदन्ति।। 2.4.1।।

9.2 तँ वो दस्म मृतीषह-न्तत्त्वा यामि सुवीर्यमिति ब्राह्मणाच्छंसिन स्स्तोत्रियानुरूपा,वुदु त्ये मधुमत्तमा गिर- इति बार्हतः प्रगाथः, पशवो वै प्रगाथः- पशव स्स्वरः- पशूना माप्त्या, -अतो मध्यँ वै सर्वेषा.ञ्छन्दसां बृहती- मध्यं माध्यन्दिनं सवनाना-न्तन्मध्येनैव मध्यं समर्धय,तीन्द्रः पूर्भि दाऽतिर द्दास मर्कै रित्युक्थमुख,मुदु ब्रह्माण्यैरत श्रवस्येति पर्यास, -एवेदिन्द्रँ वृषणँ वज्रबाहुमिति परिदधाति, वसिष्ठासो अभ्यर्च न्त्यर्कै रि-त्यन्नँ वा अर्को- ऽन्नाद्य मेवास्मै तत्परि दधाति, स न स्तुतो वीरव द्धातु गोमदिति- प्रजाञ्चैवास्मै तत्पशूंश्चाऽशास्ते, यूयं पात स्वस्तिभि स्सदा न इति- स्वस्तिमती रूप समृ,द्धैतद्वै यज्ञस्य समृद्धँ-

यद्रूपसमृद्धँ, यत्कर्म क्रियमाण मृग्यजुर्वाऽभि वदति- स्वस्ति तस्य यज्ञस्य पारमश्नुते- य एवँ वेद- यश्चैवँ विद्वा.न्ब्राह्मणाच्छंस्येतया परिदधा,त्यृजीषी वज्री वृषभ स्तुराषाडिति यज-त्येतामेव तद्देवताँ यथाभागं प्रीणाति, वषड्कृत्यानु वषड्करोति, प्रत्येवाभिमृशन्ते, नाऽप्याययन्ति- न ह्यनाराशंसा स्सीदन्ति।। 2.4.2।।

9.3 तरोभिर्वो विदद्वसु-न्तरणि.रित्सिषासती.त्यच्छावाकस्य स्तोत्रियानुरूपा, -वुदिन्न्वस्य रिच्यत इति बार्हतः प्रगाथ,स्तस्योक्तं ब्राह्मणम्, भूय इद्वावृधे वीर्याये- त्युक्थमुख,मिमा मूषु प्रभृतिं सातये धा इति पर्यास,स्तस्य दशमी मुद्धरति, घोरस्य वा आङ्गिरस.स्यैतदार्षं- न्नेद्यज्ञ.न्निर्दहे च्छस्यमानं, पिबा वर्धस्व तव घा सुतास इति यज,त्येतामेव तद्देवताँ यथाभागं प्रीणाति, वषड्कृत्यानु वषड्करोति, प्रत्येवाभिमृशन्ते, नाऽप्याययन्ति- न ह्यनाराशंसा स्सीदन्ति।। 2.4.3।

9.4 अथाध्वर्यो शंसावोमिति- स्तोत्रियायानुरूपाय प्रगाथा.योक्थमुखाय परिधानीयाया इति पञ्च कृत्व आह्वयन्ते, पञ्चपदा पङ्क्तिः- पाङ्क्तो यज्ञ,स्सर्व ऐन्द्राणि त्रैष्टुभानि शंस-न्त्यैन्द्रं हि त्रैष्टुभं माध्यन्दिनं सवनं, सर्वे समवतीभिः परि.दधति,

तद्यत्समवतीभिः परिदध- त्यन्तो वै पर्यासो-ऽन्त उदर्कोऽन्तेनैवान्तं परिदधति, सर्वे मद्वतीभि र्यजन्ति, तद्यन्मद्वतीभि र्यजन्ति- सर्वे सुतवतीभिः पीतवतीभि रभिरूपाभि र्यजन्ति, यद्यज्ञेऽभिरूप- न्तत्समृद्धं, सर्वेऽनु वषट्कुर्वन्ति- स्विष्टकृत्वाऽनुवषट्कारो- नेत्स्विष्टकृत मन्त रयामे,त्यन्तरिक्षलोको माध्यन्दिनं सवन,न्तस्य पञ्च दिशः, पञ्चोक्थानि माध्यन्दिनस्य सवनस्य, स एतैः पञ्चभि रुक्थै रेताः पञ्च दिश आप्नो-त्येताः पञ्च दिश आप्नोति।। 2.4.4।।

9.5 अथ यदौपासन- न्तृतीयसवन उपाऽऽस्यन्ते- पितृनेव तेन प्रीणा,त्युपांशु पात्नीवतस्याऽऽग्नीध्रो यजति, रेतो वै पात्नीवत- उपांश्विव वै रेत स्सिच्यते, तन्नानु वषट्करोति- नेद्रेत स्सिक्तं संस्थापयानी,त्यसंस्थितमिव वै रेत स्सिक्तं समृद्धं, संस्था वा एषा - यदनुवषट्कार- स्तस्मा न्नानुवषट्करोति, नेष्टु रुपस्थे धिष्ण्यान्ते वाऽऽसीनो भक्षयति, पत्नीभाजनँ वै नेष्टा-ऽग्नी.त्पत्नीषु रेतो धत्ते, रेतस स्सिक्ताः प्रजाः प्रजायन्ते- प्रजानां प्रजननाय, प्रजावा न्प्रजनयिष्णु र्भवति- प्रजात्यै, प्रजायते प्रजया पशुभि- र्य एवँ वेद।। 2.4.5।।

9.6 अथ शाकला.न्जुह्वति, तद्यथाऽहि जीर्णाया स्त्वचो निर्मुच्ये.तेषीका वा मुञ्जा-देवं हैवैते सर्वस्मा त्पाप्मन स्सम्प्रमुच्यन्ते- ये शाकला न्जुह्वति, द्रोणकलशे धाना भवन्ति, तासां हस्तै रादधति, पशवो वै धाना- स्ता आहवनीयस्य भस्मान्ते निवपन्ति, योनिर्वै पशूना माहवनीय- स्स्व एवैनां.स्तद्गोष्ठे निरपक्रमे निदध,त्यथ सव्यावृतोऽप्सु सोमा नाप्याययन्ति, ता.न्हान्तर्वेद्यां सादयन्ति, तद्धि सोमस्याऽऽयतन,ञ्चात्वाला दपरेणाध्वर्यु श्चमसा नद्भिः पूरयि.त्वोदीचः प्रणिधाय- हरितानि तृणानि व्यवदधाति, यदा वा आप श्चौषधयश्च सङ्गच्छन्ते,ऽथ कृत्स्न स्सोम स्संपद्यते, ता वैष्णव्यर्चा निनयन्ति, यज्ञो वै विष्णु- र्यज्ञ एवैन मन्ततः प्रतिष्ठापय,त्यथ यद्भक्षप्रतिनिधि.ङ्कुर्वन्ति- मानुषेणैवैन न्तद्भक्षेण- दैवं भक्ष मन्त र्दधति।। 2.4.6।।

9.7 पूतिर्वा एषोऽमुष्मि न्लोकेऽध्वर्युञ्च यजमान.ञ्चाभि वहति, तद्यदेन न्दध्नाऽनभिहुत्यावभृथ मुपहरेयु,र्यथा कुणपँ वा.त्येव.मेवैन न्तत्करो,त्यथ यदेन न्दध्नाऽनभिहुत्यावभृथ मुपहरन्ति- सर्वमेवैनं सयोनिं सन्तनुते- समृद्धिं संभर,न्त्यभू द्देव स्सविता वन्द्यो नु न इति जुहोति- सर्व.मेवैनं सपर्वाणं सम्भरन्ति- तिसृभि,स्त्रिवृद्धि यज्ञो,

द्रप्सवतीभि रभि जुहोति, सर्वमेवैनं सर्वाङ्गं सम्भरति, सौमीभि रभि जुहोति- सर्व.मेवैनं साऽऽत्मानं सं भरति, पञ्चभि रभि जुहोति- पाङ्क्तो यज्ञो- यज्ञ.मेवाव रुन्धे, पाङ्क्तः पुरुषः- पुरुष मेवाऽऽप्नोति, पाङ्क्ताः पशवः- पशुष्वेव प्रति तिष्ठति, प्रति तिष्ठति प्रजया पशुभि- र्य एवँ वेद।। 2.4.7।।

9.8 अग्नि.र्वाव यम- इयं यमी, कुसीदँ वा एत.द्यमस्य यजमान आदत्ते- यदोषधीभि र्वेदिं स्तृणाति, ताँ यदनुपोष्य प्रयाया- द्यातयेर न्नेन ममुष्मि.न्लोके, यमे यत्कुसीद- मपमित्य मप्रतीत्तमिति वेदि मुपोष-तीहैव सन् यम.ङ्कुसीद न्निरवदायानृणो भूत्वा स्वर्गँ लोक.मेति, विश्वलोप विश्वदावस्य त्वाऽऽस न्जुहोमीत्याह (होता), यजमानस्यापराभावाय, यदु मिश्रमिव चर.न्त्यञ्जलिना सक्तू.न्प्रदाव्ये जुहुया-देष ह वा अग्नि र्वैश्वानरो- यत्प्रदाव्य,स्स्वस्या.मेवैन न्तद्योन्यां सादयति।। 2.4.8।।

9.9 अह्नाँ विधान्या मेकाष्टकाया मपूप.ञ्चतुश्शरावं पक्त्वा- प्रात रेतेन कक्ष मुपोषे,द्यदि दहति- पुण्यसमं भवति, यदि न दहति- पापसमं भव,त्येतेन ह स्म वा अङ्गिरसः पुरा विज्ञानेन दीर्घसत्र मुपयन्ति, यो ह वा उपद्रष्टार मुपश्रोतार मनुख्यातार मेवँ विद्वान्

यजते- सममुष्मि न्लोक इष्टापूर्तेन गच्छते,ऽग्निर्वा उपद्रष्टा- वायुर्वा उपश्रोताऽऽदित्यो वा अनुख्याता, तान् यन्य एवँ विद्वान् यजते- सममुष्मिन्लोक इष्टापूर्तेन गच्छते,ऽयन्नो नभसस्पति रित्याहाग्निर्वै नभसस्पति- रग्नि मेव तदाहैतन्नो गोपायेति, स त्वन्नो नभसस्पति रित्याह- वायुर्वै नभसस्पति- र्वायुमेव तदाहैतन्नो गोपायेति, देव संस्फानेत्याहाऽऽदित्यो वै देव स्संस्फान- आदित्य मेव तदाहैतन्नो गोपाये,त्ययन्ते योनि रित्यरण्यो रग्निं समारोपये,त्तदाहु- र्यदरण्यो स्समारूढो नश्ये- दुदस्याग्नि स्सीदे-त्पुनराधेय स्स्यादिति, या ते अग्ने यज्ञिया तनू स्तया मे ह्यारोह- तया मे ह्याविशा-ऽयन्ते योनि- रित्यात्म न्नग्नी.न्त्समारोपये,दे्ष ह वा अग्ने र्योनि,स्स्वस्या मेवैन न्तद्योन्यां सादयति।। 9।।

9.10 यो ह वा अग्निष्टोमं साह्नँ वेदा.ग्निष्टोमस्य साह्नस्य सायुज्यं सलोकता मश्नुते- य एवँ वेद, यो ह वा एष तप-त्येषोऽग्निष्टोम- एष साह्न,स्तं सहैवाह्ना संस्थापयेयु,स्साह्नो वै नामैष, तेनासन्त्वरमाणा श्चरेयु, र्यद्वा इदं पूर्वयो स्सवनयो रसन्त्वरमाणा श्चरन्ति, तस्माद्धेदं प्राच्या ग्रामता बहुलाविष्टा,ऽथ यद्धेद न्तृतीयसवने सन्त्वरमाणा श्चरन्ति- तस्माद्धेदं प्रत्यञ्चि दीर्घाऽऽरण्यानि भवन्ति, यथैव

प्रातस्सवन एवं माध्यन्दिने सवन एव न्तृतीयसवन, -एवमु ह यजमानो ऽप्रमायुको भवति, तेनासन्त्वरमाणा श्चरेयु,र्यदा वा एष प्रात रुदे-त्यथ मन्द्रतम न्तपति- तस्मा.न्मन्द्रतमया वाचा प्रातस्सवने शंसे,दथ यदाऽभ्ये-त्यथ बलीय स्तपति- तस्मा.द्बलीयस्या वाचा माध्यन्दिने सवने शंसे,दथो यदाऽभितरा.मे-त्यथ बलिष्ठतम न्तपति- तस्मा.द्बलिष्ठतमया वाचा तृतीयसवने शंसे,देवं शंसे- द्यदि वाच ईशीत, वाग्घि शस्त्रँ, यया तु वाचोत्त.रोत्तरि.ण्योत्सहेत, समापनाऽऽयतना प्रतिपद्ये,तैत त्सुशस्ततर .मिव भवति, स वा एष न कदाचनास्त मयति नोदयति- तद्यदेनं पश्चा दस्त मयतीति मन्यन्ते-ऽह्न एव तदन्त.ङ्गत्वाऽथाऽऽत्मानं विपर्यस्यते,ऽह रेवाधस्ता.त्कृणुते रात्रीं परस्ता,त्स वा एष न कदाचनास्त मयति नोदयति- तद्य.देनं पुरस्ता दुदयतीति मन्यन्ते- रात्रे.रेव तदन्त.ङ्गत्वाऽथाऽऽत्मानं विपर्यस्यते- रात्रि मेवाधस्ता त्कृणुते-ऽह॰ परस्ता,त्स वा एष न कदाचनास्त मयति नोदयति, न ह वै कदाचन निम्लोच,त्येतस्य ह सायुज्यं सलोकता मश्नुते, य एवँ वेद।। 2.4.10।।

9.11 अथात एकाहस्यैव तृतीयसवन,न्देवाऽसुरा वा एषु लोकेषु समयतन्त, ते देवा असुरा नभ्यजयं,स्ते जिता अहोरात्रयो स्सन्धिं समभ्यवागु,स्स हेन्द्र उवा.चेमे वा असुरा अहोरात्रयो स्सन्धिं समभ्यवागुः- कश्चाह.ञ्चेमा नसुरा नभ्युत्थास्यामहा इ,त्यह.ञ्चेत्यग्नि रब्रवी- दहञ्चेति वरुणो-ऽहञ्चेति बृहस्पति- रहञ्चेति विष्णु,- स्तानभ्युत्थायाहोरात्रयो स्सन्धे र्निर्जघ्नु,र्यदभ्युत्थायाहोरात्रयो स्सन्धे र्निर्जघ्नु- स्तस्मा.दुक्था, अभ्युत्थाय ह वै द्विषन्तं भ्रातृव्यं निर्हन्ति- य एवँ वेद, सोऽग्नि रश्वो भूत्वा प्रथमः प्रजिगाय, तस्मा दाग्नेयीभि रुक्थानि प्रणयन्ति, यदग्नि रश्वो भूत्वा प्रथमः प्रजिगाय- तस्मा.त्साकमश्वँ, यत्पञ्च देवता अभ्युत्तस्थु-स्तस्मा त्पञ्च देवता उक्थे शस्यन्ते, या वाक्.सोऽग्नि, र्यः प्राण- स्स वरुणो, यन्मन- स्स इन्द्रो, यच्चक्षु- स्स बृहस्पति, र्यच्छ्रोत्रं- स विष्णु,रेते ह वा एता न्पञ्चभिः प्राणै स्समीर्योदस्थापयं,स्तस्मादु हैवैताः पञ्च देवता उक्थे शस्यन्ते।। 2.4.11।।

9.12 प्रजापति र्ह्येतेभ्यः पञ्चभ्यः प्राणेभ्योऽन्या न्देवान्त्ससृजे- यदु चेद.ङ्किञ्च पाङ्क्तं, तत्सृष्ट्वा व्याह्वलय,त्ते होचु र्देवा- म्लानोऽयं पिता मयोभूः, पुनरिमं समीर्योत्थापयामेति, स ह सत्त्व माख्याया

ऽभ्युपतिष्ठते, यदि ह वा अपि निर्णिक्तस्यैव कुलस्य सन्ध्युक्षेण यजते- सत्त्वं हैवाऽऽख्याया ऽभ्युपतिष्ठते, यो वै प्रजापति- स्स यज्ञ,स्स एतै.रेव पञ्चभिः प्राणै स्समीर्योत्थापितो, ये ह वा एनं पञ्चभिः प्राणै स्समीर्योदस्थापयं-स्ता उ एवैताः पञ्च देवता उक्थे शस्यन्ते।। 2.4.12।।

9.13 तदाहु- यद्द्वयो र्देवतयो स्तुवत इन्द्राग्न्योरि,-त्यथ कस्मा द्भूयिष्ठा देवता उक्थे शस्यन्त इ,त्यन्तो वा आग्निमारुत- मन्त उक्था.न्यन्त आश्विन.ङ्कनीयसीषु देवतासु स्तुवतेऽन्तोष्वि,त्यथ कस्मा द्भूयिष्ठा देवता उक्थे शस्यन्त इति, द्वेद्वे उक्थमुखे भवत,स्तद्य.द्वेद्वे।। 2.4.13।।

9.14 अथ यदैन्द्रावरुणं मैत्रावरुणस्योक्थमुखं भव,त्यैन्द्राबार्हस्पत्यं ब्राह्मणाच्छंसिन उक्थं भव,त्यैन्द्रावैष्णव मच्छावाकस्योक्थं भवति, द्वे संशंसने -ऐन्द्रञ्च वारुणञ्चैक मैन्द्रावारुणं भवति, द्वे संशंसने- ऐन्द्रञ्च बार्हस्पत्यञ्चैक मैन्द्राबार्हस्पत्यं भवति, द्वे संशंसने- ऐन्द्रञ्च वैष्णव.ञ्चैक मैन्द्रावैष्णवं भवति, द्वे द्वे उक्थमुखे भवत,स्तद्यद्वे.द्वे।। 2.4.14।।

9.15 अथ यदैन्द्रावारुणं मैत्रावरुणस्योक्थं भव-तीन्द्रावरुणा सुतपा विमं- सुतं सोमं पिबतं मद्य न्धृतव्रता-वित्यृचाऽभ्यनूक्तं, मद्वद्धि तृतीयसवन,मेह्यूषु ब्रवाणि त- आऽग्नि रगामि भारत इति मैत्रावरुणस्य स्तोत्रियानुरूपौ, चर्षणी धृतं मघवान मुक्थ मित्युक्थमुख,- न्तस्योपरिष्टा.द्ब्राह्मण,मस्तभ्ना द्यामसुरो विश्ववेदा इति वारुणं सांशंसिक, - महञ्चेति वरुणोऽब्रवी- द्देवतयो स्संशंसायाऽनतिशंसा,येन्द्रावरुणा युव मध्वराय न- इति पर्यास ऐन्द्रावरुण- ऐन्द्रावरुण मस्यैत न्नित्य मुक्थ,न्तदेत.त्स्वस्मि न्नायतने स्वस्यां प्रतिष्ठायां प्रतिष्ठापयति, द्वन्द्वँ वा एता देवता भूत्वा व्यजयन्त- विजित्या एवा,ऽथो द्वन्द्वस्यैव मिथुनस्य प्रजात्यै, सैकपादिनी भव,त्येकपादिन्या होता परिदधाति, यत्र होतु र्हौत्रकाणाँ युञ्जन्ति- तत्समृद्ध,न्तद्वै ख-ल्वा वां राजाना वध्वरे ववृत्या मि,त्येवमेव केवलपर्यास.ङ्कुर्या.त्केवलसूक्त,ङ्केवलसूक्त मेवोत्तरयो र्भव,तीन्द्रावरुणा मधुमत्तमस्येति यज,त्येते एव तद्देवते यथाभागं प्रीणाति, वषड्कृत्यानु वषड्करोति, प्रत्येवाभिमृशन्ते, नाऽऽप्याययन्ति- न ह्यनाराशंसा स्सीदन्ति।। 2.4.15।।

9.16 अथ यदैन्द्राबार्हस्पत्यं ब्राह्मणाच्छंसिन उक्थं भव,तीन्द्रश्च सोमं पिबतं बृहस्पतेऽस्मि.न्यज्ञे मन्दसाना वृषण्वसू इत्यृचाऽभ्यनूक्तं, मद्वद्धि तृतीयसवनँ, वयमु त्वामपूर्व्य- यो न इदमिदं पुरेति ब्राह्मणाच्छंसिन स्स्तोत्रियानुरूपौ, प्र मंहिष्ठाय बृहते बृहद्रय इत्युक्थमुख,मैन्द्र.ञ्जागत- ञ्जागताः पशवः- पशूना माप्त्यै, जागतमु वै तृतीयसवन- न्तृतीयसवनस्य रूप,मुदप्रुतो न वयो रक्षमाणा इति बार्हस्पत्यं सांशंसिक,महश्चेति बृहस्पति रब्रवी- द्देवतयो स्संशंसाया ऽनतिशंसाया,ऽच्छा म इन्द्रं मतय स्स्वर्विद- इति पर्यास ऐन्द्राबार्हस्पत्य, -ऐन्द्राबार्हस्पत्य मस्यैत न्नित्य मुक्थ,न्तदेत.त्स्वस्मि न्नायतने स्वस्यां प्रतिष्ठायां प्रतिष्ठापयति, द्वन्द्वँ वा एता देवता भूत्वा व्यजयन्त विजित्या एवा,ऽथो द्वन्द्वस्यैव मिथुनस्य प्रजात्यै, बृहस्पतिर्नः परिपातु पश्चा- दित्यैन्द्राबार्हस्पत्यया परिदधा,तीन्द्राबृहस्पत्योरेव यज्ञं प्रतिष्ठापय,त्युतोत्तरस्मा दधरा दघायो रिन्द्रः पुरस्ता दुत मध्यतो न,स्सखा सखिभ्यो वरिवः कृणोत्विति, सर्वाभ्य एव दिग्भ्य आशिष माशास्ते नार्त्वी?,य.ङ्काम ङ्कामयते- सोऽस्मै काम स्समृध्यते- य एवँ वेद- यश्चैवँ विद्वा.न्ब्राह्मणाच्छंस्येतया परिदधाति, बृहस्पते

युव.मिन्द्रश्च वस्व इति यज,त्येते एव तद्देवते यथाभागं प्रीणाति, वषड्कृत्यानु वषड्करोति, प्रत्येवाभिमृशन्ते, नाऽऽप्याययन्ति- न ह्यनाराशंसा स्सीदन्ति।। 2.4.16।।

9.17 अथ यदैन्द्रावैष्णव मच्छावाकस्योक्थं भव,तीन्द्राविष्णू मदपती मदाना- मा सोम.ञ्जात न्द्रविणो दधाना- इत्यृचाऽभ्यनूक्तं, मद्वद्धि तृतीयसवन,मधा हीन्द्र गिर्वण - इयन्त इन्द्र गिर्वण- इत्यच्छावाकस्य स्तोत्रियानुरूपा,वृतु र्जनित्री तस्या अपस स्परी- त्युक्थमुख,न्तस्योक्तं ब्राह्मण,न्नू मर्तो दयते सनिष्यन्निति वैष्णवं सांशंसिक,महञ्चेति विष्णु रब्रवी- द्देवतयो स्संशंसाया ऽनतिशंसाय, सँ वा.ङ्कर्मणा समिषा हिनोमीति पर्यास ऐन्द्रावैष्णव, -ऐन्द्रावैष्णव मस्यैत न्नित्य मुक्थ- न्तदेत.त्स्वस्मि न्नायतने स्वस्यां प्रतिष्ठायां प्रतिष्ठापयति, द्वन्द्वँ वा एता देवता भूत्वा व्यजयन्त- विजित्या एवा,ऽथो द्वन्द्वस्यैव मिथुनस्य प्रजात्या,- उभा जिग्यथु.र्न पराजयेथे- इत्यैन्द्रावैष्णव्यर्चा परिदधा,तीन्द्राविष्णोरेव यज्ञं प्रतिष्ठापय,-तीन्द्राविष्णू पिबतं मध्वो अस्येति यज,त्येते एव तद्देवते यथाभागं प्रीणाति, वषड्कृत्यानु वषड्करोति, प्रत्येवाभि मृशन्ते, नाऽऽप्याययन्ति- न ह्यनाराशंसा स्सीदन्ति।। 2.4.17।

9.18 अथाध्वर्यो शंसावोमिति स्तोत्रिया.यानुरूपा.योक्थमुखाय परिधानीयाया इति चतुश्चतु राह्वयन्ते, चतस्रो वै दिशो- दिक्षु तत्प्रति तिष्ठन्ते,ऽथो चतुष्पादः पशवः पशूना माप्त्या,- अथो चतुष्पर्वाणो हि तृतीयसवने होत्रका,स्तस्माच्चतु,स्सर्वे त्रैष्टुभ.ञ्जागतानि शंसन्ति, जागतं हि तृतीयसवन,मथ हैत त्त्रैष्टुभा,न्यप्रतिभूतमिव हि प्रातस्सवने मरुत्वतीये तृतीयसवने च होत्रकाणां शस्त्र,न्धीतरसँ वा एतत्सवनँ- यत्तृतीयसवन,मथ हैत दधीतरसं शुक्रिय.ञ्छन्दो यत्त्रिष्टु.बयातयाम, सवनस्यैव तत्सरसतायै, सर्वे समवतीभिः परिदधति, तद्यत्समवतीभिः परिदध-त्यन्तो वै पर्यासोऽन्त उदर्कोऽन्त, स्सजाया- उ ह वा अवैनाया?न्तेनैवान्तं परि दधति, सर्वे मद्वतीभि र्यजन्ति, तद्य.न्मद्वतीभि र्यजन्ति, सर्वे सुतवतीभिः पीतवतीभि रभिरूपाभि र्यजन्ति, यद्यज्ञे ऽभिरूप- न्तत्समृद्धम्, सर्वेऽनु वषट्कुर्वन्ति, स्विष्टकृत्वाऽनुवषट्कारो- नेत्स्विष्टकृत मन्त रयामे,त्यसौ वै लोक स्तृतीयसवन- न्तस्य पञ्च दिशः- पञ्चोक्थानि तृतीयसवनस्य, स एतैः पञ्चभि रुक्थै रेताः पञ्च दिश आप्नोति, तद्यदेषां लोकानां रूपँ- या मात्रा, तेन रूपेण तया मात्रयेमा न्लोका नृध्नो,तीमा न्लोका नृध्नोतीति।। 2.4.18।।

9.19 तदाहुः- किं षोडशिन ष्षोडशित्वं, षोडश स्तोत्राणि- षोडश शस्त्राणि- षोडशभि रक्षरै रादत्ते, द्वे वा अक्षरे अतिरिच्येते- षोडशिनोऽनुष्टुभ मभिसम्पन्नस्य, वाचो वा एतौ स्तनौ, सत्यानृते वाव ते, अवत्येनं सत्य- न्नैन मनृतं हिनस्ति- य एवँ वेद।। 2.4.19।। इत्यथर्ववेदे गोपथब्राह्मणस्य चतुर्थः प्रपाठकः समाप्तः

उत्तरार्धे पञ्चमः प्रपाठकः

10.1 अहर्वै देवा अश्रयन्त रात्री मसुरा,स्तेऽसुरा स्समावद्वीर्या एवाऽऽस.न्नो व्यावर्तन्त, सोऽब्रवी दिन्द्रः- कश्चाह.ञ्चेमा नसुरा.न्रात्री मन्ववैष्यामह इति, स देवेषु न प्रत्यविन्द,दबिभयू रात्रे स्तमसो मृत्यो- स्तम इव हि रात्रि- र्मृत्युर्वै तम,स्तस्मा.द्धाप्येतर्हि भूयानिव नक्तं- स याव.न्मात्र मिवापक्रम्य बिभेति, तँ वै छन्दांस्येवान्ववायं,- स्तद्यच्छन्दांस्येवा ऽन्ववायं- स्तस्मा.दिन्द्रस्य छन्दांसि च रात्रिँ वहन्ति, न निवि.च्छस्यते- न पुरोरु-ङ्ग धाय्या- नान्या देव,तेन्द्रस्य ह्येव छन्दांसि च रात्रिँ वहन्ति, ता.न्वै पर्यायैः पर्याय मनुदन्त, यत्पर्यायैः पर्याय मनुदन्त- तस्मा.त्पर्याया,स्तत्पर्यायाणां पर्यायत्व,न्तान् वै प्रथमैरेव पर्यायैः पूर्वरात्रा दनुदन्त- मध्यमै र्मध्यरात्रा- दुत्तमै रपररात्रा,दपिशर्वर्या

अपिस्मसी.त्यब्रुवं,स्तद्य.दपिशर्वर्या

अपिस्मसी.त्यब्रुवं,स्तदपिशर्वराणा मपिशर्वरत्वं, शर्वराणि खलु ह वा अस्यैतानि छन्दांसीति ह स्माऽऽ,हैतानि ह वा इन्द्रं रात्र्या स्तमसो मृत्यो रभिपत्याऽवारयं,-स्तदपिशर्वराणा मपिशर्वरत्वम्।। 2.5.1।।

10.2 प्रथमेषु पर्यायेषु स्तुवते, प्रथमान्येव पदानि पुन राददते, यदेवैषां मनोरथा आसं-स्तदेवैषा.न्तेनाऽऽददते, मध्यमेषु पर्यायेषु स्तुवते, मध्यमान्येव पदानि पुन राददते, यदेवैषा मश्वा गाव आसं-स्तदेवैषा न्तेनाऽऽददत, -उत्तमेषु पर्यायेषु स्तुवत, -उत्तमान्येव पदानि पुन राददते, यदेवैषाँ वासो हिरण्यं मणि रध्यात्म मासी-त्तदेवैषा न्तेनाऽऽददत, -आ द्विषतो वसु दत्ते- निरेवैन मेभ्य स्सर्वेभ्यो लोकेभ्यो नुदते- य एवँ वेद।। 2।।

10.3 पवमान.वदह रित्याहु, र्न रात्रिः पवमानवती- कथ मुभे पवमानवती भवतः- केन ते समावद्भाजौ भवत इति, यदे.वेन्द्राय मद्वने सुत- मिदँ वसो सुत.मन्ध- इदं ह्यन्वोजसा सुत- मिति स्तुवन्ति च शंसन्ति च, तेन रात्रिः पवमानवती, तेनोभे पवमानवती भवत- स्तेन ते समावद्भाजौ भवतः, पञ्चदशस्तोत्र मह

रित्याहु, र्न रात्रिः पञ्चदश स्तोत्रा- कथ.मुभे पञ्चदशस्तोत्रे भवतः-केन ते समावद्भाजौ भवत इति, द्वादश स्तोत्रा.ण्यपिशर्वराणि-तिसृभि र्दैवताभि स्सन्धिना राथन्तरेणाऽऽश्विनाय स्तुवते- तेन रात्रिः पञ्चदशस्तोत्रा- तेनोभे पञ्चदशस्तोत्रे भवत-स्तेन ते समावद्भाजौ भवतः, परिमितं स्तुव.न्त्यपरिमित मनुशंसन्ति-परिमितं भूत मपरिमितं भव्य,मपरिमिता.न्येवावरुन्ध्या.दित्यति शंसति स्तोम,मति वै प्रजाऽस्यात्मान मति पशव,स्तद्यदेवास्या ऽऽत्मान न्तदेवास्यैतेना ऽऽप्यायय,न्त्यथो द्वयँ वा इदं सर्वं स्नेहश्चैव तत्तेज,श्चाथ तदहोरात्राभ्या माप्त्यं स्नेहतेजसो राप्त्यै, गायत्रा.न्स्तोर्त्रियानुरूपा.न्छंसन्ति, तेजो वै गायत्री- तमः पाप्मा रात्रि-स्तेन तेजसा तमः पाप्मान न्तरन्ति, पुनरादायं शंस-न्त्येवं हि सामगा स्स्तुवते, यथास्तुत मनुशस्तं भवति, न हि तत्स्तुतँ यन्नानुशस्त,न्तदाहु- रथ कस्मा दुत्तमा.त्प्रतीहारा दाहूय साम्ना शस्त्र मुप.सन्तन्वन्तीति।। 2.5.3।।

10.4 पुरुषो वै यज्ञ,स्तस्य शिर एव हविर्धानं, मुख माहवनीय, उदरं सदोऽन्त रुक्थानि, बाहू मार्जालीय श्चाऽऽग्नीध्रीयश्च, या इमा देवता स्तेऽन्तस्सदस.न्धिष्ण्याः, प्रतिष्ठे गार्हपत्य.व्रतश्रपणा.वि,

त्यथापर- न्तस्य मन एव ब्रह्मा- प्राण उद्गाता-ऽपानः प्रस्तोता- व्यानः प्रतिहर्ता- वाग्घोता- चक्षु रध्वर्युः- प्रजापति स्सदस्यो- ऽङ्गानि होत्राऽऽशंसिन- आत्मा यजमान,स्तद्य.दध्वर्यु स्स्तोत्र मुपाऽऽकरोति- सोमः पवत इति- चक्षुरेव तत्प्राणै स्सन्दधा,त्यथ यत्प्रस्तोता ब्रह्माण मामन्त्रयते- ब्रह्म.न्त्स्तोष्यामः प्रशास्तरिति- मनोऽग्रणी र्भव त्येतेषां प्राणानां, मनसा हि प्रसूता स्स्तोमेन स्तुयामेति- प्राणानेव तन्मनसा सन्दधा,त्यथ य.द्ब्रह्मा स्तुते-त्युच्चै रनुजानाति- मनो वै ब्रह्मा- मन एव तत्प्राणै स्सन्दधा,त्यथ यत्प्रस्तोता प्रस्तौ.त्यपान मेव तत्प्राणै स्सन्दधा,त्यथ यत्प्रतिहर्ता प्रतिहरति- व्यानमेव तदपानै स्सन्दधा,त्यथ य.दुद्गातोद्गायति- समान.मेव तत्प्राणै स्सन्दधा,त्यथ यद्धोता साम्ना शस्त्र मुप.सन्तनोति- वाग्वै होता- वाच.मेव तत्प्राणै स्सन्दधा,त्यथ यत्सदस्यो ब्रह्माण मुपाऽऽसीदति- प्रजापतिर्वै सदस्यः- प्रजापति.मेवाऽऽप्नो,त्यथ यद्धोत्राऽऽशंसिन स्सामसन्तति कुर्व- न्त्यङ्गानि वै होत्राऽऽशंसिनो.ऽङ्गा न्येवास्य तत्प्राणै स्सन्दधा,त्यथ यद्यजमान स्स्तोत्र मुपाऽऽसीद- त्यात्मा वै यजमान- आत्मान मेवास्य तत्कल्पयति, तस्मा.न्नैनं बहिर्वे.द्यभ्या.श्रावये- न्नाभ्युदिया-

न्नाभ्यस्त मिया- न्नाधिष्ण्ये प्रतपे- न्नेत्प्राणेभ्य आत्मान मन्त रगादिति।। 2.5.4।।

10.5 प्रथमेषु पर्यायेषु स्तुवते- प्रथमेषु पदेषु निनर्दयन्ति- प्रथमरात्रा.देव तदसुरा न्निर्घ्नन्ति, मध्यमेषु पर्यायेषु स्तुवते- मध्यमेषु पदेषु निनर्दयन्ति- मध्यमरात्रा.देव तदसुरा न्निर्घ्नं,न्त्युत्तमेषु पर्यायेषु स्तुवत- उत्तमेषु निनर्दय-न्त्युत्तमरात्रा.देव तदसुरा न्निर्घ्नन्ति, तद्यथाऽभ्याघारा.त्पुनः पुनः पाप्मानं निर्हर. न्त्येव मेवैत त्स्तोत्रियानुरूपाभ्या महोरात्राभ्या मेव तदसुरा न्निर्घ्नन्ति, गायत्री श्शंसन्ति, तेजो वै ब्रह्मवर्चस.ङ्गायत्री- तेज एवास्मै तद्ब्रह्मवर्चसँ यजमाने दधति, गायत्री श्शस्त्वा जगती श्शंसन्ति- ब्रह्म ह वै जगती- ब्रह्मणैवास्मै तद्ब्रह्मवर्चसँ यजमाने दधति, व्याह्वयन्ते गायत्रीश्च जगती श्चान्तरेण, छन्दांस्येव त.न्नानावीर्याणि कुर्वन्ति- जगती श्शस्त्वा त्रिष्टुभ श्शंसन्ति- पशवो जगती पशूनेव तत्त्रिष्टुब्भिः परि दधति- बलँ वै वीर्य न्त्रिष्टु,ब्बलमेव तद्वीर्येऽन्ततः प्रतिष्ठापय,त्यन्धस्वत्यो मद्वत्य स्सुतवत्यः पीतवत्य स्त्रिष्टुभो याज्या स्समृद्धा स्सुलक्षणा- एतद्वै रात्रीरूप,ञ्जागृया द्रात्रिँ, यावदु ह वै न वा स्तुवते न वा शस्यते- ताव.दीश्वरा असुररक्षांसि च यज्ञ

मन्वव.नयन्ति, तस्मा दाहवनीयं समिद्ध माग्नीध्रीयं गार्हपत्य न्धिष्ण्या.न्तसमुज्ज्वलयतेति भाषेर-न्ज्वलयेर,न्प्रकाशमिव वै तत्स्या,दारेभन्त श्शयीरं- स्तान् हत श्श्रेष्ठो वा इति पाप्मा नाभिवृक्णोति, ते तमः पाप्मान मपाघ्नते, ते तमः पाप्मान मपाघ्नते।। 2.5.5।।

10.6 विश्वरूपँ वै त्वाष्ट्र मिन्द्रोऽह,न्स्त्र त्वष्टा हतपुत्रोऽभिचरणीय मपेन्द्रं सोम माऽहर,त्तस्येन्द्रो यज्ञवेशस.ङ्कृत्वा प्रासहा सोम मपिब,त्स विष्वङ्ख्यार्च्छ,त्तस्मात्सोमो नानुपहूतेन न पातव्य- स्सोमपीथोऽस्य व्यर्धुको भवति, तस्य मुखा.त्प्राणेभ्य श्श्री र्यशांस्यूर्ध्वा.न्युदक्रामं,स्तानि पशू न्प्राविशं- स्तस्मा त्पशवो यशो, यशो ह भवति- य एवँ वेद, ततोऽस्मा एत.दश्विनौ च सरस्वती च यज्ञं समभर.न्सौयशत्रामणिं भैषज्याय, तयेन्द्र मभ्यषिञ्चं- स्ततो वै स देवानां श्रेष्ठोऽभव,च्छ्रेष्ठ स्स्वाना.ञ्चान्येषाञ्च भवति- य एवँ वेद- यश्चैवँ विद्वा.न्त्सौत्रामण्या ऽभिषिच्यते।। 2.5.6।।

2.5.7 अथ साम गायति ब्रह्मा, क्षत्रँ वै साम- क्षत्रेणैवेन न्तदभिषिञ्च,त्यथो साम्राज्यँ वै साम- साम्राज्येनैवेन न्तत्साम्राज्य.ङ्गमय,त्यथो सर्वेषाँ वा एष वेदानां रसो- यत्साम-

सर्वेषा.मेव तद्वेदानां रसेनाभिषिञ्चति, बृहत्या.ज्ञायति- बृहत्याँ वा असा.वादित्य श्श्रियां प्रतिष्ठायां प्रतिष्ठित.स्तप,त्यैन्द्र्यां बृहत्या.ज्ञाय-त्यैन्द्रो वा एष यज्ञक्रतु र्यत्सौत्रामणि- रैन्द्राऽऽयतन एष एतर्हि यो यजते, स्व एवैन न्तदायतने प्रीणा,त्यथ कस्मा.त्संश्यानानि ना,मैतैर्वै सामभि र्देवा इन्द्र मिन्द्रियेण वीर्येण समश्यं,स्तथैवैत द्यजमाना एतैरेव सामभि रिन्द्रियेणैव वीर्येण संश्यन्ति, संश्रवसे विश्रवसे सत्यश्रवसे श्रवस इति सामानि भव-न्त्येष्वेवैनँ लोकेषु प्रतिष्ठापयति, चतुर्निधनं भवति- चतस्रो वै दिशो- दिक्षु तत्प्रतितिष्ठन्ते-ऽथो चतुष्पादः पशवः- पशूना माप्त्यै, तदाहु-र्यदेत.त्साम गीयते,ऽथ क्वैतस्य साम्न उक्थं- का प्रतिष्ठा- त्रयो देवा एकादशेत्याहु,रेतद्वा एतस्य साम्न उक्थ- मेषा प्रतिष्ठा, त्रयस्त्रिंश.ङ्ग्रह.ङ्गृह्णाति- साम्नः प्रतिष्ठायै प्रतिष्ठायै।। 2.5.7।।

10.8 प्रजापति रकामयत- वाज माप्नुयां- स्वर्गँ लोकमिति, स एतँ वाजपेय मपश्य,द्वाजपेयो वा एष- य एष तपति, वाज मेतेन यजमान स्स्वर्गं लोक माप्नोति, शुक्रवत्यो ज्योतिष्मत्यः प्रातस्सवने भवन्ति, तेजो ब्रह्मवर्चस न्ताभि राप्नोति, वाजवत्यो माध्यन्दिने सवने स्वर्गस्य लोकस्य समष्ट्या, -अन्नवत्यो गणवत्यः पशुमत्य

स्तृतीय सवने भवन्ति- भूमान न्ताभि राप्नोति, सर्व स्सप्तदशो भवति- प्रजापतिर्वै सप्तदशः- प्रजापति मेवाऽऽप्नोति, हिरण्यस्त्रज ऋत्विजो भवन्ति- महस एव तद्रूप.ङ्क्रियत, -एष मेऽमुष्मि न्लोके प्रकाशोऽसदिति, ज्योतिर्वै हिरण्य-ञ्ज्योतिषैवैन मन्त द्र्धति,त्याजि न्धावन्ति- यजमान मुज्जापयन्ति, नाकं रोहति- समहसे रोहति- विश्वमहसे रोहति- सर्वमहसे रोहति, मनुष्यलोका देवैन मन्त द्र्धति, देवस्य सवितु स्सवे- स्वर्गँ लोकँ वर्षिष्ठ न्नाकं रोहेयमिति- ब्रह्मा रथचक्रं सर्पति, सवितृप्रसूत एवैन न्तत्सर्पय,त्यथो प्रजापतिर्वै ब्रह्मा- प्रजापति मेवैनँ वज्रा दधि प्रसुवति- नाकस्योज्जित्यै- वाजिनां सन्तत्यै, वाजि.सामाभि गायति- वाजिमा न्भवति, वाजो वै स्वर्गो लोक- स्स्वर्ग.मेव तँ लोकं रोहति, विष्णो श्शिपिविष्टवतीषु बृह दुत्तमं भवति, स्वर्गमेव तँ लोकं रूढ्वा ब्रध्नस्य विष्टप मतिक्राम.त्यतिक्रामति।। 2.5.8।।

10.9 अथातोऽप्तोर्यामाः, प्रजापतिर्वै यत्प्रजा असृजत, ता वै तान्ता असृजत, तास्सृष्टाः पराच्य एवाऽऽस-न्नोपाऽऽवर्तन्त, ता एकेन स्तोमेनोपागृह्ण,त्ता अत्यरिच्यन्त, ता द्वाभ्या- न्तास्सर्वै,स्तस्मा त्सर्वस्तोम,स्ता एकेन पृष्ठेनोपागृह्ण,त्ता

अत्यरिच्यन्त, ता द्वाभ्या न्ता स्सर्वै स्तस्मा.त्सर्वपृष्ठ,स्ता अतिरिक्तोक्थे वारवन्तीये.नावारयं,स्तस्मा देषोऽतिरिक्तोक्थवा न्भवति, तस्मा द्वारवन्तीय,न्ता यदाप्त्वाऽयच्छ,दतो वा अप्तोर्यामा, अथो प्रजा वा अप्तु रित्याहुः- प्रजानाँ यमन, इति हैवैत.दुक्थ,न्ता बर्हिः प्रजा श्श्नायेरं-स्तर्हि हैतेन यजते, स एषोऽष्टापृष्ठो भवति, तद्यथाऽन्यस्मि.न्यज्ञे विश्वजितः पृष्ठ मनुसञ्चरं भवति- कथ मेत.देव मत्रेति, पितैष यज्ञाना,न्तद्यथा श्रेष्ठिनि सँवशेयु- रपि विद्विषाणा- एव मेवैत.च्छ्रेष्ठिनो वशेयान्न मन्नस्याऽऽनुचर्याय क्षमन्ते।। 2.5.9।।

10.10 तद्यथैवादोऽह्न उक्थाना माग्नेयं प्रथमं भव,त्येव मेवैत दत्रा.प्याग्नेयं प्रथमं भव,त्यैन्द्रे वाव तत्रोत्तरे- ऐन्द्रे वा एते, ऐन्द्रावैष्णव मच्छावाकस्योक्थं भवति, चतुराहावा.न्यतिरिक्तोक्थानि भवन्ति, पशवो वा उक्थानि- चतुष्टया वै पशवोऽथो चतुष्पादः पशवः- पशूना माप्त्यै, त एते स्तोत्रियानुरूपा स्तृचा अर्धर्च.शस्याः- प्रतिष्ठा वा अर्धर्चः प्रतिष्ठित्या एवा,ऽथैतेषा मेवाऽऽश्विनानां सूक्ताना न्द्वेद्वे समाहाव मेकैक महरह श्शंस,त्यश्विनौ वै देवानां भिषजौ- तस्मा दाश्विनानि

सूक्तानि शंसन्ति- तदश्विभ्यां प्रददु रिदं भिषज्यत-मिति, क्षेत्रवत्यः परिधानीया भवन्ति, यत्र हत स्तत्प्रजा अशनायन्तीः पिपासन्ती स्संरुद्धा स्स्थिता आसं-स्ता दीना एताभि र्यथाक्षेत्रं पाययाञ्चकार-तर्पयाञ्चकारा,ऽथो इयँ वै क्षेत्रं पृथि-व्यस्या मदीनाया मन्ततः प्रतिष्ठास्यामहा इति, त्रिष्टुभो याज्या भवन्ति- यत्र हत स्तत्प्रजा अशनायन्तीः पिपासन्ती स्संरुद्धा स्स्थिता बभूवु,स्ता हैवैना एताभि र्यथौकसँ व्यवसाययाञ्चकार, तस्मा.देता याज्या भवन्ति- तस्मा.देता याज्या भवन्ति।। 2.5.10।।

10.11 अथातोऽनैकाहिकं श्वस्स्तोत्रिय मद्यस्तोत्रियस्यानुरूप ङ्कुर्वन्ति प्रातस्सवने,ऽहीनमेव तत्सन्तन्व.न्त्यहीनस्य सन्तत्यै, तद्यथा ह वा एकाह स्सुत- एव महीन स्सुत,स्तद्यथैकाहस्य सुतस्य सवनानि सन्तिष्ठमानानि य-न्त्येव महीनस्य सुतस्याहानि सन्तिष्ठमानानि यन्ति, तद्य.च्छ्वस्स्तोत्रिय मद्यस्तोत्रियस्यानुरूप.ङ्कुर्वन्ति- प्रातस्सवनेऽहरेव तदह्नो रूप.ङ्कुर्व,न्त्यपरेणैव तदह्नाऽपर मह रभ्यारभन्ते, तत्तथा न माध्यन्दिने सवने, श्रीर्वै पृष्ठानि तानि तस्मि न्नेवावस्थितानि

भव,न्त्येतेनैव विधिना तृतीयसवने, न श्वस्स्तोत्रिय मद्यस्तोत्रियस्यानुरूप.ङ्कुर्वन्ति।। 2.5.11।।

10.12 अथात आरम्भणीया एव- ऋजुनीती नो वरुण इति मैत्रावरुणस्य, मित्रो नयतु विद्वानिति, प्रणेता वा एष होत्रकाणाँ- यन्मैत्रावरुण,स्तस्मा देषा प्रणेतृमती भव,तीन्द्रँ वो विश्वतस्परीति ब्राह्मणाच्छंसिनो, हवामहे जनेभ्य इ-तीन्द्र मेवैतयाऽहरह र्निर्ह्वयन्ते, न हैवैषाँ विहवेऽन्य इन्द्रँ वृङ्क्ते, यत्रैवँ विद्वा न्ब्राह्मणाच्छंस्येता महरह श्शंसति, यत्सोम आ सुते नर- इत्यच्छावाक-स्येन्द्राग्नी अजोहवु रि-तीन्द्राग्नी एवैतयाऽहरह र्निर्ह्वयन्ते, न हैवैषाँ विहवेऽन्य इन्द्राग्नी वृङ्क्ते- यत्रैवँ विद्वा नच्छावाकस्यैता महरह श्शंसति, ता वा एता स्स्वर्गस्य लोकस्य नाव स्सन्तारण्य,स्स्वर्ग मेवैताभि र्लोक मनुसञ्चरन्ति।। 2.5.12।।

10.13 अथातः परिधानीया एव, ते स्याम देव वरुणेति- मैत्रावरुण.स्येषंश्च स्वश्च धीमही,-त्ययँ वै लोक इष मि-त्यसौ वै लोक स्स्व.रि,त्युभा वेवैनौ तौ लोका.वारभते, व्यन्तरिक्ष मतिर दिति ब्राह्मणाच्छंसिनो, विवृ.त्तृचं- स्वर्ग मेवैताभि र्लोकँ विवृणोति, मदे सोमस्य रोच.नेन्द्रो यदभिन द्बलमिति- सिषासवो ह वा एते

यद्दीक्षिता स्तस्मा.देषा बलवती भव,卐त्युद्रा आज दङ्गिरोभ्य आवि ष्कृण्व न्गुहा सतीः। अर्वाञ्च न्नुनुदे वल-मिति, सनिमितेभ्य एतयाऽवरुन्धे।

卐 इन्द्रेण रोचना दिवो दृढानि दृंहितानि च। स्थिराणि न पराणुदे - इति, स्वर्ग मेवैतयाऽहरह लौंक मव रुन्धे।

आऽहं सरस्वतीवतो रित्यच्छावाक,स्येन्द्राग्न्यो रवो वृण इ,त्येतद्ध वा इन्द्राग्न्योः प्रियं धाम- यद्वागिति, प्रियेणैवैनौ तद्धाम्ना समर्धयति, प्रियेणैव धाम्ना समृध्यते- य एवँ वेद।। 2.5.13।।

10.14 उभय्यो होत्रकाणां परिधानीया भव-न्त्यहीनपरिधानीया श्चैकाहिक्यश्च, तत ऐकाहिकीभिरेव मैत्रावरुणः परिदधाति- तेनास्मा.ल्लोका.न्न प्रच्यवत,-आहिनीकीभि रच्छावाक-स्स्वर्गस्य लोकस्याप्त्या, उभयीभि र्ब्राह्मणाच्छंसी- एव मसा वुभौ व्यन्वारभमाण ए.तीमञ्च लोक ममुञ्चा,ऽथोऽहीन.ञ्चैकाहञ्चा-ऽथो सँवत्सर ञ्चाग्निष्टोमञ्चा-ऽथो मैत्रावरुण.ञ्चाच्छावाक,ञ्चैव मसा वुभौ व्यन्वारभमाण ए,त्यथ तत ऐकाहिकीभिरेव तृतीयसवने होत्रकाः परि दधति- तेनास्मा.ल्लोका.न्न प्रच्यवत,- आहिनीकीभि रच्छावाक-स्स्वर्गस्य लोकस्य समष्ट्यै, काम न्तद्धोता शंसे,द्यद्धोत्रकाः पूर्वेद्यु

श्शंसेयु,र्यद्वै होता- तद्धोत्रका॰, प्राणो वै होता-ऽङ्गानि होत्रका, स्समानो वा अयं प्राणोऽङ्गा.न्यनु.सञ्चरति, तस्मा.त्तत्कामं होता शंसे,द्यद्धोत्रका॰ पूर्वेद्यु श्शंसेयु,र्यद्वै होता- तद्धोत्रका, आत्मा वै होता-ऽङ्गानि होत्रका,स्समाना वा इमेऽङ्गाना मन्ता,स्तस्मा त्तत्कामं होता शंसे,द्यद्धोत्रका॰ पूर्वेद्यु श्शंसेयु,र्यद्वै होता- तद्धोत्रका,स्सूक्तान्तै र्होता परिदधा,त्यथ समान्य एव होत्रकाणां परिधानीया भवन्ति।। 2.5.14।।

10.15 यश्श्वस्स्तोत्रिय मद्यस्तोत्रियस्यानुरूप.ङ्कुर्वन्ति प्रातस्सवने,ऽहीनमेव तत्सन्तन्व-न्त्यहीनस्य सन्तत्यै, त एते होत्रका॰ प्रातस्सवने षडह.स्तोत्रियं शस्त्वा माध्यन्दिनेऽहीनसूक्तानि शंस,न्त्या सत्यो यातु मघवाँ ऋजीषीति- सत्यव.न्मैत्रावरुणो-ऽस्मा इदु प्रतवसे तुरायेति ब्राह्मणाच्छंसी, शास द्वह्नि र्दुहितु र्नस्त्यङ्गा-दित्यच्छावाक,स्तदाहु॰- कस्मा दच्छावाको वह्निव.देतत्सूक्त मुभयत्र शंसति- स पराक्षु चैवाह.स्व् र्वाक्षु चेति, वीर्यवा.न्वा एष बह्वृचो- यदच्छावाको, वहति ह वै वह्ने र्धुरो यासु युज्यते- तस्मा.दच्छावाको वह्निव देतत्सूक्त मुभयत्र शंसति, स पराक्षु चैवाह.स्व्तर्वाक्षु चेति, तानि पञ्च.स्वहस्सु

शस्यन्ते- चतुर्विंशेऽभिजिति विषुवति विश्वजिति महाव्रते, तान्येता.न्यहीनसूक्तानीत्या चक्षते, न ह्येषु किञ्चन हीयते, पराञ्चि ह वा एतान्यहा न्यभ्यावर्तीनि भवन्ति, तस्मादेता न्येते.ष्वहस्सु शस्यन्ते, यदेतानि शंसन्ति- तत्स्वर्गस्य लोकस्य रूपँ, यद्वेवैतानि शंस-तीन्द्र मेवैतै र्निर्ह्वयन्ते, यथ ऋषभँ वाशितायै, ते वै देवाश्च ऋषय श्चाब्रुव.न्स्ोमानेन यज्ञं सन्तन्वामहा इति, तदेत द्यज्ञस्य समान मपश्य,त्समाना न्प्रगाथा.न्त्समानीः प्रतिपद- स्समानानि सूक्ता,न्योकस्सारी वा इन्द्रो, यत्र वा इन्द्रः पूर्व.ङ्गच्छति- गच्छत्येव तत्रापरँ- यज्ञस्यैव सेन्द्रतायै।। 2.5.15।।

इति गोपथब्राह्मणोत्तरभागे पञ्चमः प्रपाठकः समाप्तः

उत्तरार्धे षष्ठः प्रपाठकः

11.1 ओम्। तान् वा एतान्त्संपातान् विश्वामित्रः प्रथम मपश्य,देवा त्वा मिन्द्र वज्रि न्नत्र- यन्न इन्द्रो जुजुषे यच्च वष्टि- कथामहा मवृध त्कस्य होतु-रिति, तान् विश्वामित्रेण दृष्टान् वामदेवोऽसृजत, स हेक्षाञ्चक्रे विश्वामित्रो- यान् वा अहं संपाता नदर्शे-न्तान् वामदेवोऽसृजत, कानि न्वहं सूक्तानि सम्पातां- स्तत्प्रतिमा.न्सृऽवजेयमिति, स एतानि सूक्तानि सम्पातां-

स्तत्प्रतिमा नसृजत, सद्यो ह जातो वृषभः कनीन- उदु ब्रह्माण्यैरत श्रव,स्याभितष्टे वदीधया मनीषा-मिति विश्वामित्र, इन्द्रः पूर्भि दाऽतिर द्वास मर्कै- र्य एक इद्धव्य श्चर्षणीनाँ- यस्तिग्मश्रृङ्गो वृषभो न भीम इति वसिष्ठ, इमा.मूषु प्रभृतिं सातये धा- इच्छन्ति त्वा सोम्यास स्सखाय- श्शास द्वह्नि र्दुहितु र्नप्त्य.ङ्गा-दिति भरद्वाज, एतैर्वै संपातै रेत ऋषय इमा.न्लोका न्त्समपतं,स्तद्यत्समपतं.स्तस्मात्सम्पाता - स्तत्सम्पातानां संपातत्व, न्ततो वा एतां-स्त्रीन्त्सम्पाता.न्मैत्रावरुणो विपर्यास मेकैक महरह श्शंस,त्येवा त्वामिन्द्र वज्रि न्नत्रेति प्रथमेऽहनि, यन्न इन्द्रो जुजुषे यच्च वष्टीति द्वितीये, कथामहा मवृध त्कस्य होतु- रिति तृतीये, त्रीनेव सम्पाता.न्ब्राह्मणाच्छंसी विपर्यास मेकैक महरह श्शंस,तीन्द्रः पूर्भि दाऽतिर द्वास मर्कै.रिति प्रथमेऽहनि, य एक इद्धव्य श्चर्षणीना-मिति द्वितीये, यस्तिग्मश्रृङ्गो वृषभो न भीम इति तृतीये, त्रीनेव संपाता नच्छावाको विपर्यास मेकैक महरह श्शंस,तीमा मूषु प्रभृतिं सातये धा इति प्रथमेऽह,नीच्छन्ति त्वा सोम्यास स्सखाय इति द्वितीये, शास द्वह्नि र्दुहितु र्नप्त्य.ङ्गादिति तृतीये, तानि वा एतानि नव त्रीणि चाहरह श्शंस्यानि- तानि द्वादश भवन्ति, द्वादश ह वै मासा स्सँवत्सर-

स्सँवत्सरः प्रजापतिः- प्रजापति र्यज्ञ,स्तत्सँवत्सरं प्रजापतिँ यज्ञ माप्नोति, तस्मि.न्त्सँवत्सरे प्रजापतौ यज्ञेऽहरहः प्रतितिष्ठन्तो यन्ति, प्रतितिष्ठत इदं सर्व मनु प्रतितिष्ठति, प्रति तिष्ठति प्रजया पशुभि- र्य एवँ वेद, तान्यन्तरेणाऽऽवाप मावपेर,न्नन्यूखा विराज श्चतुर्थेऽहनि, वैमदीश्च पङ्क्तीः पञ्चमे, पारुच्छेपी ष्षष्ठे,ऽथ या.न्यन्यानि महास्तोत्रा.ण्यष्टर्चा. न्यावपेरन्न्।। 2.6.1।।

11.2 को अद्य नर्यो देवकाम- इति मैत्रावरुणो, वने न वा यो न्यधायि चाकन्निति ब्राह्मणाच्छं,स्यायाह्यर्वा.ङुपबन्धुरेष्ठा- इत्यच्छावाक, एतानि वा आवपना,न्येतै रेवाऽऽवपनै र्देवाश्च ऋषयश्च स्वर्गँ लोक मायं,स्तथैवैत द्यजमाना एतै रेवाऽऽवपनै स्स्वर्गँ लोकँ यन्ति, सद्यो ह जातो वृषभः कनीन- इति मैत्रावरुणः पुरस्ता.त्संपाताना महरह श्शंसति- तदेत.त्सूक्तं स्वर्ग्य,मेतेन सूक्तेन देवाश्च ऋषयश्च स्वर्गँ लोक मायं,स्तथैवैत द्यजमाना एतेनैव सूक्तेन स्वर्गँ लोकँ यन्ति, तदृषभव.त्पशुम.द्भवति पशूना माप्त्यै, तत्पञ्चर्चं भव- त्यन्नँ वै पङ्क्ति- रन्नाद्यस्यावरुध्या,-अरिष्टैर्नः पथिभिः पारयन्तेति स्वर्गताया एवैत दहरह श्शंस,-त्युदु ब्रह्माण्यैरत श्रवस्येति ब्राह्मणाच्छंसी, ब्रह्मण्व.देतत्सूक्तं समृद्ध- मेतेन सूक्तेन

देवाश्च ऋषयश्च स्वर्गँ लोक मायं-स्तथैवैत द्यजमाना एतेनैव सूक्तेन स्वर्गँ लोकँ यन्ति, तदु वै षडर्चं- षड्वा ऋतव- ऋतूना माप्त्यै, तदुपरिष्टा.त्संपाताना महरह श्शंस,-त्यभितष्टेव दीधया मनीषा मित्यच्छावाकोऽहरह श्शंस,त्यभि वदति तत्यै रूप, मभि प्रियाणि मर्मृश.त्पराणीति यान्येव पराण्यहानि- तानि प्रियाणि- तानेव तदभि.मर्मृशन्तो य.न्त्यभ्यारभमाणाः, परो वा अस्मा ल्लोका.त्स्वर्गो लोक, स्स्वर्गमेव तँ लोक मभि मृशन्ति, कवीः रिच्छामि सन्दृशे सुमेधा इति, ये ह वा अनेन पूर्वं प्रीतास्ते वै कवय-स्तानेव तदभ्यति.वदति, यदु वै दशर्चं- न्दश वै प्राणाः- प्राणानेव तदाप्नोति- प्राणानां सन्तत्यै, यदु वै दशार्चं- न्दश वै पुरुषे प्राणा-दश स्वर्गा लोकाः- प्राणांश्चैव तत्स्वर्गांश्च लोका नाप्नोति, प्राणेषु चैवैत.त्स्वर्गेषु च लोकेषु प्रतितिष्ठन्तो यन्ति, यदु वै दशर्चं-न्दशाक्षरा विरा.डियँ वै स्वर्गस्य लोकस्य प्रतिष्ठा- तदेत.दस्यां प्रतिष्ठायां प्रतिष्ठापयति, सकृदिन्द्र न्निराह- तेनैन्द्रा.द्रूपान्न प्रच्यवते, तदुपरिष्टा.त्संपाताना महरह श्शंसति।। 2.6.2।।

11.3 कस्त मिन्द्र त्वा वसु-ङ्कन्नव्यो अतसीना-ङ्कदून्व1(अ)स्याकृत- मिति कद्वन्तः प्रगाथा अहरह श्शंस,त्येको वै

प्रजापतिः- प्रजापते राप्त्यै, यदेव कद्वन्त.स्तत्स्वर्गस्य लोकस्य रूपँ, यद्वेव कद्वन्तो,ऽथो अन्नँ वै क-मथो अन्नस्यावरुद्ध्यै, यद्वेव कद्वन्तो.ऽथो सुखँ वै क-मथो सुखस्यावरुद्ध्यै, यद्वेव कद्वन्तो.ऽथो अहरहर्वा एते शान्ता न्यहीनसूक्ता न्युपयुञ्जाना यन्ति, तानि कद्वद्भिः प्रगाथै श्शमयन्ति, तान्येभ्य श्शान्तानि कं भवन्ति, तान्येता न्छान्तानि स्वर्गँ लोक मभि वहन्ति, त्रिष्टुभ स्सूक्तप्रतिपद श्शंसेयु,स्ता हैके पुरस्ता.त्प्रगाथानां शंसन्ति- धाय्या इति वदन्त,स्तदु तथा न कुर्या,त्क्षत्रँ वै होता- विशो होत्राऽऽशंसिनः,~ क्षत्रस्यैव तद्विशं प्रत्युद्यामिनी.ङ्कुर्युः पापवस्यस,त्रिष्टुभो वा इमा स्सूक्तप्रतिपद इत्येवँ विद्या,द्यथा वै समुद्रं प्रतरेयु- रेवं हैवैते प्रप्लवन्ते- ये सँवत्सर न्द्वादशाहँ वोपाऽऽसते, तद्यथा सैरावती.न्नावं पारकामा स्समारोहेयु- रेवं हैवैता स्त्रिष्टुभ स्स्वर्गकामा स्समारोहन्ति, न ह वा एत च्छन्दो गमयित्वा स्वर्गँ लोक मुपाऽऽवर्तन्ते- वीर्यवत्तमं हि, ताभ्यो न व्याह्वयीत, समानं हि छन्दो,ऽथो नेद्धाय्याः करवाणीति- यदेना श्शंसन्ति, तत्स्वर्गस्य लोकस्य रूपँ, यद्वेवैना श्शंस,न्तीन्द्र मेवैताभि र्निर्ह्वयन्ते, यथर्षभँ वाशितायै।। 2.6.3।।

11.4 अपेन्द्र प्राचो मघव न्नमित्रा- निति मैत्रावरुणः पुरस्ता.त्संपाताना महरह श्शंस,त्यपापाचो अभिभूते नुदस्वाऽपोदीचो अप शूराधराच उरौ यथा तव शर्म.न्मदेमे- त्यभयस्य रूप,मभयमिव ह्यन्विच्छति, ब्रह्मणा ते ब्रह्मयुजा युनज्मीति- ब्राह्मणाच्छंस्येता महरह श्शंसति युक्तवतीँ, युक्त इव ह्यहीनो-ऽहीनस्य रूप,मुरुन्नो लोक मनुनेषी,त्यच्छावाकोऽहरह श्शंस,त्यनु नेषीत्येत इव ह्यहीनो-ऽहीनस्य रूप,न्नेषीति सत्रायणरूप,मोकस्सारी हैवैषा मिन्द्रो भवति, यथा गौः प्रज्ञात.ङ्गोष्ठँ- यथर्षभो वाशिताया- एवं हैवैषा मिन्द्रो यज्ञ मागच्छति, शुनँहुयया ऽहीनस्य परिदध्या,त्क्षत्रियो ह राष्ट्रा.च्च्यवते, यो हैव परो भवति- तमभि ह्वयति।। 2.6.4।।

11.5 अथातोऽहीनस्य युक्तिश्च विमुक्तिश्च, व्यन्तरिक्ष मतिर दित्यहीनँ युङ्क्त-एवेदिन्द्र- मिति विमुञ्चति, नूनं सा त इत्यहीनँ युङ्क्ते- नू ष्टुत इति विमुञ्च,त्येष ह वा अहीन न्तन्तु मर्हति- य एनँ योक्रञ्च विमोक्रञ्च वेद, तस्य हैषैव युक्ति- रेषा विमुक्ति,स्तद्य.त्प्रथमेऽहनि चतुर्विंश ऐकाहिकीभिः परिदध्युः- प्रथम एवाहनि यज्ञं संस्थापयेयु- र्नाहीनकर्म कुर्यु,रथ यदहीन.परिधानीयाभिः परिदध्यु- स्तद्यथा

युक्तो विमुच्यमान उत्कृत्ये-तैवँ यजमाना उत्कृत्येरन्, नाहीनकर्म कुर्यु,रथ यदुभयीभिः परिदध्यु,स्तद्यथा दीर्घाध्व उपविमोकँ यायात्तादृक्त,त्समानीभिः परिदध्यु,स्तदाहु रेकया द्वाभ्याँ वा स्तोम मतिशंसे- द्दीर्घाऽऽरण्यानि भवन्ति, यत्र बह्वीभि स्स्तोमोऽतिशस्यते,ऽथो क्षिप्र न्देवेभ्योऽन्नाद्यं संप्रयच्छामी,त्यपरिमिताभि रुत्तरयो स्सवनयो,-रपरिमितो वै स्वर्गो लोक- स्स्वर्गस्य लोकस्य समष्ट्यै, तद्यथाऽभिहेषते पिपासते क्षिप्रं प्रयच्छे-त्तादृक्तत्, समानीभिः परिदध्यु,स्सन्ततो हैवैषा मारब्धो विस्त्रस्तो यज्ञो भवति, सन्तत मृचा वषट्कृत्यं सन्तत्यै, सन्धीयते प्रजया पशुभि- र्य एवँ वेद।। 2.6.5।।

11.6 तदाहुः, कथ.न्द्युक्थो होतै.कसूक्त - एकोक्था होत्रा द्विसूक्ता इ,त्यसौ वै होता योऽसौ तपति- स वा एक एव- तस्मा देकसूक्त,स्स यद्विध्यातो द्वाविवाऽऽभवति- तेज एव मण्डलं भा- अपरं शुक्ल- मपर.ङ्कृष्ण-न्तस्माद्द्युक्थो, रश्मयो वाव होत्रा-स्ते वा एकैक-न्तस्मा देकोक्था,स्तद्यदेकैकस्य रश्मे द्वौंद्वौ वर्णौ भवत- स्तस्मा द्विसूक्ता,स्सँवत्सरो वाव होता- स वा एक एव- तस्मादेकसूक्त,स्तस्य यद्द्वया-न्यहानि भवन्ति- शीता न्यन्या-न्युष्णा

न्यन्यानि- तस्माद्द्युक्थ, ऋतवो वाव होत्रा-स्ते वा एकैक- न्तस्मा देकोक्था- स्तद्य.देकैकस्यतौं द्वौद्वौ मासौ भवत- स्तस्मा द्विसूक्ता॰, पुरुषो वाव होता- स वा एक एव- तस्मादेकसूक्त,स्स यत्पुरुषो भव.त्यन्यथैव प्रत्यङ्गव.त्यन्यथा प्रा.ङ्गस्माद्द्युक्थो,ऽङ्गानि वाव होत्रा-स्तानि वा एकैक- न्तस्मा देकोक्था,स्तँ यदेकैक मङ्ग.न्द्युति र्भवति- तस्माद्विसूक्ता,स्तदाहु र्यद्द्युक्थो होतै.कसूक्त- एकोक्था होत्रा द्विसूक्ता॰- कथ.न्तत्समं भवति, यदेव द्विदेवत्याभि र्यज-न्त्यथो यद्विसूक्ता होत्रा इति ब्रूया,त्तदाहु र्यदग्निष्टोम एव सति यज्ञे- द्वे होतु रुक्थे अतिरिच्येते- कथ न्ततो होत्रा न व्यवच्छिद्यन्त इति, यदेव द्विदेवत्याभि र्यज -न्त्यथो यद्विसूक्ता होत्रा इति ब्रूया,त्तदाहु-र्यदग्निष्टोम एव सति यज्ञे- सर्वा देवता स्सर्वाणि छन्दां.स्याप्याययन्त्यथ कतमेन छन्दसाऽयातयामा.न्युक्थानि प्रणयन्ति- कया देवतयेति, गायत्रेण छन्दसाऽग्निना देवतयेति ब्रूया,द्देवान् ह यज्ञ न्तन्वाना असुर.रक्षांस्यभि चेरिरे- यज्ञपर्वणि- यज्ञमेषां हनिष्याम स्तृतीयसवनं प्रति, तृतीयसवने ह यज्ञ.स्त्वरिष्टो बलिष्ठ॰- प्रतनुमेषाँ यज्ञं हनिष्याम इति, ते वरुण न्दक्षिणतोऽयोजय,न्मध्यतो बृहस्पति- मुत्तरतो विष्णु,न्तेऽब्रुव- न्नैकैका.स्स्मो- नेद मुत्सहामहा

इ-त्यस्तु नो द्वितीयो- येनेदं सह व्यश्नवामहा इति, तानिन्द्रोऽब्रवी,त्सर्वे मद्द्वितीया स्स्थेति, ते सर्व इन्द्रद्वितीया-.स्तस्मा दैन्द्रावारुण मैन्द्राबार्हस्पत्य मैन्द्रावैष्णव मनुशस्यते, द्वितीयवन्तो ह वा एतेन स्वा भवन्ति- द्वितीयवन्तो मन्यन्ते- य एवँ वेद।। 2.6.6।।

11.7 आग्नेयीषु मैत्रावरुणस्योक्थं प्रणयन्ति- वीर्यँ वा अग्नि- वीर्येणैवास्मै तत्प्रणय,न्त्यैन्द्रावारुण मनुशस्यते- वीर्यँ वा इन्द्रः~ क्षत्रँ वरुणः- पशव उक्थानि- वीर्येणैव तत्क्षत्रेण चोभयतः पशू न्परिगृह्णाति- स्थित्या अनपक्रान्त्या, -ऐन्द्रीषु ब्राह्मणाच्छंसिन उक्थं प्रणयन्ति- वीर्यँ वा इन्द्रो- वीर्येणैवास्मै तत्प्रणय,न्त्यैन्द्राबार्हस्पत्य मनुशस्यते- वीर्यँ वा इन्द्रो- ब्रह्म बृहस्पतिः- पशव उक्थानि- वीर्येणैव तद्ब्रह्मणा चोभयतः पशू.न्परि गृह्णाति- स्थित्या अनपक्रान्त्या, -ऐन्द्री.ष्वच्छावाकस्योक्थं प्रणयन्ति- वीर्यँ वा इन्द्रो- वीर्येणैवास्मै तत्प्रणय,न्त्यैन्द्रावैष्णव मनुशस्यते, वीर्यँ वा इन्द्रो- यज्ञो विष्णुः- पशव उक्थानि- वीर्येणैव तद्यज्ञेन चोभयतः पशू.न्परिगृह्य- क्षत्रेऽन्ततः प्रतिष्ठापयति, तस्मादु क्षत्रियो भूयिष्ठं हि पशूना मीशते- योऽधिष्ठाता प्रदाता- यस्मै प्रत्ता वेदा अवरुद्धा-

स्तान्येता.न्यैन्द्राणि- जागतानि शंस,न्त्यथो एतैरेव सेन्द्र न्तृतीयसवन-मेतै र्जागतं सवन,न्धराणि ह वा अस्यैता.न्युक्थानि भवन्ति- यन्नाभानेदिष्ठो- वालखिल्यो- वृषाकपि- रेवयामरुत्- तस्मा.त्तानि सार्ध.मेवोपेयु,स्सार्ध मिदं रेत स्सिक्तं- समृद्ध मेकधा प्रजनयामेति, ये ह वा एतानि नानूपेयु - र्यथा रेत स्सिक्तं विलुम्पे,त्कुमारँ वा जात मङ्गशो विभजे-त्तादृक्त,त्तस्मा.त्तानि सार्धं मेवोपेयु,स्सार्धमिदं रेत स्सिक्तं समृद्ध मेकधा प्रजनयामेति, शिल्पानि शंसति- यदेव शिल्पा-न्येतेषाँ वै शिल्पाना मनुकृतिर्हि शिल्प मधिगम्यते- हस्ती कंसो वासो हिरण्य मश्वतरीरथ श्शिल्पं, शिल्पं हास्य समधिगम्यते- य एवँ वेद, यदेव शिल्पानि शंसति- तत्स्वर्गस्य लोकस्य रूपँ, यद्वेव शिल्पा,न्यात्मसंस्कृतिर्वै शिल्पा-न्यात्मान मेवास्य तत्संस्कुर्वन्ति।। 7।।

11.8 नाभानेदिष्ठं शंसति- रेतो वै नाभानेदिष्ठो- रेत एवास्य तत्कल्पयति, तद्रेतोमिश्रं भवति- क्ष्मया रेत स्सञ्जग्मानो निषिञ्चदिति- रेतस स्समृध्या एव, तन्नाराशंसं शंसति- प्रजा वै नरो-वाक्शंसः- प्रजासु तद्वाच न्दधाति- तस्मा दिमाः प्रजा वदन्त्यो जायन्ते, तं हैके पुरस्ता.त्प्रगाथानां शंसन्ति- पुरस्ता.दायतना

वागिति वदन्त, उपरिष्टा देक- उपरिष्टादायतना वागिति वदन्तो, मध्य एव शंसे- न्मध्याऽऽयतना वा इयं वा.गुपरिष्टा न्नेदीयसीव, तं होता रेतोभूतं शस्त्वा- मैत्रावरुणाय संप्रयच्छ-त्येतस्य त्वं प्राणा न्कल्पयेति, वालखिल्या श्शंसन्ति- प्राणा वै वालखिल्याः- प्राणा.नेवास्य तत्कल्पयति, ता विहृता श्शंसति- विहृता वै प्राणाः- प्राणेनापानोऽपानेन व्यान- स्स पच्छः प्रथमे सूक्ते विहर- त्यर्धर्चशो द्वितीय- ऋक्श.स्तृतीये, स यत्प्रथमे सूक्ते विहरति- वाच.श्चैव तन्मनश्च विहरति, यद्द्वितीये- चक्षु.श्चैव तच्छ्रोत्रञ्च विहरति, यत्तृतीये- प्राण.श्चैव तदात्मानञ्च विहरति, तदुपाऽऽप्तो विहरे,त्कामो नेत्तु वै प्रगाथाः कल्पन्ते,ऽतिमर्शं समेव विहरे,त्तथा वै प्रगाथाः कल्पन्ते, यदेवातिमर्श- न्तत्स्वर्गस्य लोकस्य रूपँ, यद्वेवातिमर्श- मात्मा वै बृहती- प्राणा स्सतोबृहती, स बृहती मशंसी,त्स आत्माऽथ सतोबृहती- न्ते प्राणा- अथ बृहती- मथ सतो बृहती- न्तदात्मानं प्राणैः परिवृह.न्नेति, यद्वेवातिमर्श- मात्मा वै बृहती- प्रजा स्सतो बृहती, स बृहती मशंसी,त्स आत्माऽथ सतोबृहती न्ते प्रजा- अथ बृहती- मथ सतोबृहती- न्तदात्मानं प्रजया परिवृह.न्नेति, यद्वेवातिमर्श -मात्मा वै बृहती- पशव स्सतोबृहती, स

बृहती मशंसी,त्स आत्माऽथ सतोबृहती- न्ते पशवो,ऽथ बृहती - मथ सतो बृहती-न्तदात्मानं पशुभिः परिवृह.न्नेति, तस्य मैत्रावरुणः प्राणा.न्कल्पयित्वा- ब्राह्मणाच्छंसिने संप्रयच्छ-त्येतस्य त्वं प्रजनयेति, सुकीर्तिं शंसति- देवयोनिर्वै सुकीर्ति - स्तद्यज्ञियायां देवयोन्याँ यजमानं प्रजनयति, वृषाकपिं शंस-त्यात्मा वै वृषाकपि- रात्मान मेवास्य तत्कल्पयति, तन्न्यूङ्ख्य- त्यन्नँ वै न्यूङ्खोऽन्नाद्य मेवास्मै तत्संप्रयच्छति- यथा कुमाराय जाताय स्तनं, स पाङ्क्तो भवति- पाङ्क्तो ह्ययं पुरुषः- पञ्चधा विहितो- लोमानि त्व.गस्थि मज्जा मस्तिष्कं, स यावानेव पुरुष स्तावन्तँ यजमानं संस्कृत्याच्छावाकाय संप्रयच्छ- त्येतस्य त्वं प्रतिष्ठा.ङ्कल्पये,त्येवयामरुतं शंसति- प्रतिष्ठा वा एवयामरु.त्प्रतिष्ठाया मेवैन मन्ततः प्रतिष्ठापयति, याज्यया यज-त्यन्नँ वै याज्याऽन्नाद्य मेवास्मै तत्प्रयच्छति।। 2.6.8।।

11.9 तानि वा एतानि सहचरणानीत्या चक्षते- यन्नाभानेदिष्ठो वालखिल्यो वृषाकपि रेवयामरु,त्तानि सह वा शंसे,त्सह वा न शंसे,द्यदेषा मन्तरिया- त्तद्यजमानस्यान्त.रिया,द्यदि नाभानेदिष्ठं- रेतोऽस्यान्त.रिया,द्यदि वालखिल्याः- प्राणा नस्यान्त.रिया,द्यदि

वृषाकपि- मात्मान मस्यान्त.रिया,द्यद्येवयामरुतं- प्रतिष्ठा वा एवयामरु-त्प्रतिष्ठाया एवैन न्तं श्रावये-द्दैव्याश्च मनुष्याश्च, तानि सह वा शंसे,त्सह वा न शंसे,त्स ह बुडिल आश्वितरास्यु र्विश्वजितो होता स.न्नीक्षाञ्चक्र - एतेषाँ वा एषां शिल्पानाँ विश्वजिति साँवत्सरिके द्वे होतु रुक्थे माध्यन्दिन मभि.प्रच्यवेते- हन्ताह मित्थ मेवयामरुतं शंसयानीति, तद्ध तथा शंसयाञ्चक्रे, तद्ध तथा शस्यमाने गोश्ल आजगाम- स होवाच- होतः कथा ते शस्त्रँ विचक्रं प्लवत इति, किं ह्यभूदि- त्येवयामरु दय- मुत्तरत श्शस्यत इति, स होवा.चैन्द्रो वै माध्यन्दिनः- कथेन्द्रं माध्यन्दिना. न्निनीषसीति, नेन्द्रं माध्यन्दिना न्निनीषामीति- स होवाच, छन्द स्त्विद ममाध्यन्दिनं साचि जागतँ वा-ऽतिजागतँ वा, स उ मारुतो - मैवं संसृष्टेति, स होवा.चाꣳर मच्छावाके,ऽथाऽस्मि.न्ननुशासन मीषे, स होवा.चैन्द्र मेष विष्णुन्यङ्गानि शंस,त्यथ त्वं होत- रुपरिष्टा द्रौद्रिया धाय्यायाः पुरस्ता न्मारुतस्य सूक्तस्या.प्यस्यथा इति- तथेति, तद.प्येतर्हि तथैव शस्यते- यथा षष्ठे पृष्ठ्याहनि- कल्पत एव यज्ञः, कल्पते यजमानस्य प्रजातिः, कथ.मत्राशस्त एव नाभानेदिष्ठो भव,त्यथ वालखिल्या श्शंसति- रेतो वा अग्रेऽथ प्राणा- एवं

ब्राह्मणाच्छं.स्यशस्त एव नाभानेदिष्ठो भव,त्यथ वृषाकपिं शंसति- रेतो वा अग्रेऽथाऽऽत्मा- कथ.मत्र यजमानस्य प्रजातिः- कथं प्राणा अवरुद्धा भवन्तीति, यजमानँ वा एतेन सर्वेण यज्ञक्रतुना संस्कुर्वन्ति- स यथा गर्भो योन्या मन्त रेव सम्भव न्छेते- न ह वै सकृ द्देहोऽग्रे सर्वं सम्भव- त्येकैकं वाऽङ्गं सम्भवति, सर्वाणि चे.त्समानेऽहनि क्रियेर,न्कल्पत एव यज्ञः- कल्पते यजमानस्य प्रजाति,रथ हैवैवयामरुतं होता शंसे,त्तस्याऽस्य प्रतिष्ठा- तस्या एवैन मन्ततः प्रतिष्ठापयति प्रतिष्ठापयति।।

11.10 देवक्षेत्रँ वै षष्ठमह- र्देवक्षेत्रँ वा एत आगच्छन्ति- ये षष्ठ मह रागच्छन्ति, न वै देवा अन्योऽन्यस्य गृहे वसन्ति- नर्तुर् ऋतो र्गृहे वसतीत्याहु,स्तद्यथायथ मृत्विज ऋतुयाजान् यज.न्त्यसम्प्रदाय- न्तद्य दृतू.न्कल्पयति यथायथ.ञ्जनता,स्तदाहु र्नर्तुप्रैषैः प्रेष्येयु- र्नर्तुप्रैषै र्वषट्कुर्यु,र्वाग्वा ऋतुप्रैषा, आप्यते वै वाक्.षष्ठेऽहनीति, यदृतुप्रैषै र्वषट्कुर्यु- र्वाच मेव तदाप्तां शान्ता मृक्णवहीं वह.राविणी मृच्छेयु- रच्युता द्यज्ञस्य च्यवेरन्,यज्ञा न्प्राणा न्प्रजायाः पशुभ्यो जिह्मायेयु- स्तस्मा दृग्मेभ्य एव प्रेषितव्य- मृग्मेभ्योऽधि वषट्कृत्य,न्तन्न वाच माप्तां शान्ता मृक्णवहीं

वहराविणी मृच्छन्ति- नाच्युता द्यज्ञस्य च्यवेरन्,यज्ञा न्प्राणा न्प्रजाया॰ पशुभ्यो जिह्मायन्ति, पारुच्छेपी रुप.दधति- द्वयो स्सवनयो॰ पुरस्ता.त्प्रस्थितयाज्यानां, रोहितँ वै नामैत.च्छन्दो-यत्पारुच्छेप,मेतेन ह वा इन्द्र स्सप्त स्वर्गा न्लोका नाऽरोह,दारोहति सप्त स्वर्गा न्लोकान् य एवँ वेद, तदाहु- र्यत्पञ्चपदा एव पञ्चमस्याह्नो रूपं- षद्पदा ष्षष्ठस्या,ऽथ कस्मा.त्सप्तपदा ष्षष्ठेऽहनि शस्यन्त इति, षड्भि.रेव पदै ष्षष्ठ.मह रवाऽऽप्नुव,न्त्यविच्छि.द्यैवैत दह-र्यत्सप्तम,न्तदेव सप्तमेन पदेनाभ्यारुह्य वसन्ति, सन्ततै स्त्र्यहै रव्यवच्छिन्नै र्यन्ति- य एवँ विद्वांस उपयन्ति।। 2.6.10।।

11.11 देवासुरा वा एषु लोकेषु समयतन्त- ते देवा ष्षष्ठेनाह्नैभ्यो लोकेभ्योऽसुरा.न्पराऽणुदन्त, तेषाँ यान्यन्त.र्हस्तानि वसू.न्यासं, स्तान्यादाय समुद्रं प्रारूप्यन्त, तेषाँ वै देवा अनुहायैतेनैव छन्दसाऽन्तर्हस्तानि वसून्याऽददत, तदेवैतत्पदं पुन॰पदं, स ए.वाङ्कुश आकुञ्चनाया,ऽऽद्विषतो वसु दत्ते- निरेवैन मेभ्य स्सर्वेभ्यो लोकेभ्यो नुदते- य एवँ वेद, द्यौर्वै देवता षष्ठ.मह र्वहति, त्रयस्त्रिंशस्तोमो रैवतं सामातिच्छन्द श्छन्दो- यथादेवत मेनेन यथास्तोमं यथासाम यथाछन्द स्समृध्नोति- य एवँ वेद, यद्वै

समानोदर्कं- न्तत्षष्ठस्याह्नो रूपँ, यद्येव प्रथम मह- स्तदुत्तम मह,स्तदेवैतत्पदं- पुन र्यत्षष्ठँ, यदश्वव- द्यद्रतव- द्यत्पुनरावृत्तँ- यत्पुनर्निनृत्तँ- यदन्तरूपँ- यदसौ लोकोऽभ्युदितो- यन्नाभानेदिष्ठँ- यत्पारुच्छेपँ- यन्नाराशंसँ- यद्वैपदा- यत्सप्तपदा- यत्कृतँ- यद्रैवत- न्तत्तृतीयस्याह्नो रूप,मेतानि वै षष्ठस्याह्नो रूपाणि- छन्दसामु ह षष्ठेनाह्नाऽक्तानां रसोऽत्यनेद,त्तं प्रजापति रुदाना.न्नाराशंस्या गायत्र्या रैभ्या त्रिष्टुभा पारिक्षित्या जगत्या गाथयाऽनुष्टु,भैतानि वै छन्दांसि षष्ठेऽहनि शस्तानि भव.न्त्ययातयामानि, छन्दसामेव तत्सरसताया अयातयामतायै, सरसानि हास्य छन्दांसि षष्ठेऽहनि शस्तानि भवन्ति, सरसै श्छन्दोभि रिष्टं भवति- सरसै श्छन्दोभि र्यज्ञ न्तनुते- य एवँ वेद।। 11।

11.12 अथ यद्वैपदौ स्तोत्रियानुरूपौ भवत- इमानुकं भुवना सीषधामेति, द्विपाद्वै पुरुषो- द्विप्रतिष्ठः पुरुषः- पुरुषो वै यज्ञ- स्तस्मा द्वैपदौ स्तोत्रियानुरूपौ भवतो,ऽथ सुकीर्तिं शंस-त्यपेन्द्र प्राचो मघव न्नमित्रा.निति, देवयोनिर्वै सुकीर्ति- स्स य एव.मेता न्देवयोन्यां सुकीर्तिं वेद- कीर्तिं प्रतिष्ठापयति भूताना,ङ्कीर्तिमा.न्त्स्वर्गे लोके प्रति तिष्ठति- प्रति तिष्ठति प्रजया

पशुभि र्य एवँ वेदा,थ वृषाकपिं शंसति- वि हि सोतो रसृक्षते,त्यादित्यो वै वृषाकपि- स्तद्य.त्कम्पयमानो रेतो वर्षति- तस्मा.द्वृषाकपि- स्तद्वृषाकपे र्वृषाकपित्वं, वृषाकपिरिव वै स सर्वेषु लोकेषु भाति- य एवँ वेद, तस्य तृतीयेषु पादे.ष्वाद्यन्तयो र्न्यूङ्ख- निनर्दा न्करो,त्यन्नँ वै न्यूङ्खो- बल न्निनर्दोऽन्नाद्य मेवास्मै तद्बले निदधा,त्यथ कुन्तापं शंसति, कुयं ह वै नाम कुत्सितं भवति- तद्य.त्तपति- तस्मा.त्कुन्तापा,स्तत्कुन्तापाना.ङ्कुन्तापत्व- न्तप्यन्तेऽस्मै कुयानिति तत्तकुय- स्स्वर्गे लोके प्रति तिष्ठति, प्रति तिष्ठति प्रजया पशुभि- र्य एवं वेद, तस्य चतुर्दश प्रथमा भव,न्ती- द.ञ्जना उपश्रुतेति, ताः प्रग्राहं शंसति- यथा वृषाकपिँ, वार्षरूपं हि- वृषाकपे स्तन्न्याय मेत्ये,वाथ रैभी श्शंसति- वच्यस्व रेभ वच्यस्वेति, रेभन्तो वै देवाश्च ऋषयश्च स्वर्गँ लोक मायं.स्तथैवैत.द्यजमाना रेभन्त एव स्वर्गँ लोकँ यन्ति, ताः प्रग्राह.मित्ये,वाथ पारिक्षिती श्शंसति- राज्ञो विश्वजनीनस्येति, सँवत्सरो वै परिक्षि.त्सँवत्सरो हीदं सर्वं परिक्षियती,त्यथो खल्वाहु- रग्नि र्वै परिक्षि.दग्नि र्हीदं सर्वं परिक्षियती,त्यथो खल्वाहु- र्गाथा एवैताः कारव्या राज्ञः परिक्षित इति, स न स्त.द्यथा कुर्या-द्गाथा

एवैता श्शस्ता भवन्ति, यद्यु वै गाथा- अग्ने.रेव गाथा- स्सँवत्सरस्य वेति ब्रूया,द्यद्युवै मन्त्रोऽग्नेरेव मन्त्र- स्सँवत्सरस्य वेति ब्रूया,त्ता॰ प्रग्राहमित्ये,वाथ कारव्या श्शंस-तीन्द्र॰ कारु मबूबुध- दिति, यदेव देवा॰ कल्याण.ङ्कर्माकुर्वं-स्तत्कारव्याभि रवाऽऽप्नुवं,स्तथैवैत द्यजमाना यदेव कल्याण.ङ्कर्म कुर्वन्ति- तत्कारव्याभि रवाऽऽप्नुवन्ति, ता॰ प्रग्राह.मित्ये,वाथ दिशा.ङ्कॢप्ती॰ पूर्वं शस्त्वा- य.स्सभेयो विदथ्य इति जनकल्पा उत्तरा श्शंसति- योऽनाक्ताक्षोऽनभ्यक्त इ,त्यृतवो वै दिश॰ प्रजनन,स्तद्य.द्दिशा.ङ्कॢप्ती॰ पूर्वं शस्त्वा- यस्सभेयो विदथ्य इति जनकल्पा उत्तरा श्शंस-त्यृतूनेव तत्कल्पय-त्यृतुषु प्रतिष्ठापयति, प्रतितिष्ठन्ती रिदं सर्व मनु प्रति तिष्ठति, प्रति तिष्ठति प्रजया पशुभि- र्य एवँ वेद, ता अर्धर्चश श्शंसति- प्रतिष्ठित्या ए,वाथेन्द्रगाथा श्शंसति- यदिन्द्रादो दाशराज्ञ- इ,तीन्द्रगाथाभिर्ह वै देवा असुरा नागायाऽथैना नत्यायं,स्तथैवैत द्यजमाना इन्द्रगाथाभि रेवाप्रियं भ्रातृव्य मागायाऽथैन मतियन्ति, तामर्धर्चश श्शंसति- प्रतिष्ठित्या एव।। 2.6.12।।

11.13 अथैतशप्रलापं शंस,त्येता अश्वा आप्लवन्त इ-त्यैतशो ह मुनि र्यज्ञस्याऽऽयु र्ददर्श, स ह पुत्रा नुवाच- पुत्रका यज्ञस्याऽऽयु

रदर्श- न्तदभि लपिष्यामि, मा मा दृप्तं मन्यध्वमिति- तथेति, तदभि ललाप, तस्य हाभ्यग्नि रैतशायनो ज्येष्ठः पुत्रोऽभिद्रुत्य- मुखमपि जग्राह ब्रुव-न्दृप्तो नः पितेति, स होवाच- धित्त्वा जाल्माऽपरस्य पापिष्ठान्ते प्रजा.ङ्करिष्यामीति- यो मे मुखं प्राग्रही,र्यदि जाल्म मे मुखं प्राग्रहीष्य- श्शताऽऽयुष.ङ्गा मकरिष्यं- सहस्राऽऽयुषं पुरुषमिति, तस्मा दभ्यग्नय ऐतशायना आजानेया स्सन्तः पापिष्ठा मन्येषां बलिहृतः पित्रा यच्छप्ता- स्स्वेन प्रजापतिना- स्वया देवतया, यदैतशप्रलाप-स्तत्स्वर्गस्य लोकस्य रूपँ- यद्वे.वैतशप्रलापो- ऽयातयामा वा अक्षिति रैतशैतशप्रलापो, यातयामा मे यज्ञोऽस- दक्षिति मे यज्ञो ऽसदिति, तँ वा ऐतशैतश प्रलापं शंसति पदावग्राह,न्तासा मुत्तमेन पदेन प्रणौति- यथा निविदो,ऽथ प्रवह्लिकाः पूर्वं शस्त्वा- विततौ किरणौ द्वाविति, प्रतिराधा नुत्तरा श्शंसति- भु.गित्यभिगत इति, प्रवह्लिकाभि र्ह वै देवा असुराणां रसा न्प्रववृहु,स्तद्यथाऽऽभि.र्ह वै देवा असुराणां रसा न्प्रववृहु- स्तस्मा.त्प्रवह्लिका, स्तत्प्रवह्लिकानां प्रवह्लिकात्व,न्ता वै प्रतिराधैः प्रत्यराध्नुवं- स्तद्य.त्प्रतिराधैः प्रत्यराध्नुवं- स्तस्मा त्प्रतिराधा- स्तत्प्रतिराधानां प्रतिराधत्वं, प्रवह्लिकाभिरेव द्विषतां

भ्रातृव्याणां रसा न्प्रवह्लिका- स्ता वै प्रतिराधैः प्रति राध्नुवन्ति, ताः प्रग्राह.मित्ये,वाथाऽऽजिज्ञासेन्या श्शंस-तीहेत्थ प्रागपा.गुद.गधरागि, त्याजिज्ञासेन्याभि र्ह वै देवा असुरा नाज्ञायाऽथैना नत्यायं,स्तथैवैत द्यजमाना आजिज्ञासेन्याभि रेवाप्रियं भ्रातृव्य माज्ञायाऽथैन मतियन्ति, ता अर्धर्चश श्शंसति- प्रतिष्ठित्या ए,वाथातिवादं शंसति- वीमे देवा अक्रंसतेति, श्रीर्वा अतिवाद- स्तमेकर्चं शंस,त्येक स्ता वै श्री- स्ताँ वै विरेभं शंसति, विरेभै श्श्रियं पुरुषो वहतीति, तामर्धर्चश श्शंसति- प्रतिष्ठित्या एव।। 2.6.13।।

11.14 अथाऽऽदित्याऽऽश्चाङ्गिरसीश्च शंस- त्यादित्या ह जरित रङ्गिरोभ्यो दक्षिणा मनयन्निति, तद्देवनीथ मित्याचक्षत- आदित्याश्च ह वा अङ्गिरसश्च स्वर्गे लोके ऽस्पर्धन्त- वयं पूर्वे स्व.रेष्यामो- वयं पूर्व इति, ते हाङ्गिरस श्श्वस्सुत्या न्ददृशु,स्ते हाऽग्नि मूचुः- परेह्यादित्येभ्य श्श्वस्सुत्यां प्रब्रूही,त्यथाऽऽदित्या अद्यसुत्या न्ददृशु,स्ते हाग्नि मूचु- रद्यसुत्याऽस्माक न्तेषा न्नस्त्वं होताऽऽसी,त्युपेम स्त्वामिति, स एत्याग्नि रुवाचा-ऽथाऽऽदित्या अद्यसुत्या मीक्षन्ते- कँ वो होतार मवोच.न्वाऽह्वयन्ते- युष्माकँ

वयमिति, ते हाङ्गिरस श्चुक्रुधु- र्मा त्व.ङ्गमो नु वयमिति, नेति हाग्नि रुवा.चानिन्द्या वै माऽऽह्वयन्ते किल्बिषं हि त,द्यो ऽनिन्द्यस्य ह्व न्नैति- तस्मा दतिदूर मत्यल्पमिति यजमानस्य ह्व मिया.देव, किल्बिषं हि तद्योऽनिन्द्यस्य ह्व.न्नैति, ता.न्हाऽऽदित्या नङ्गिरसो याजयाञ्चक्रु,स्तेभ्यो हीमां पृथिवी न्दक्षिणा न्निन्यु,स्तं ह न प्रतिजगृहु,स्सा हीय- न्निवृत्तोभयत.श्शीर्ष्णी दक्षिणा शुचिविद्धा शोचमाना व्यचर त्कुपिता- मा नः प्रतिग्रहीषु रिति, तस्या एता निरदीर्यन्त, य एते प्रदरा अधिगम्यन्ते, तस्मा न्निवृत्तदक्षिणा न्नोपाऽऽकुर्या- न्नैनां प्रमृजे- न्नेद्दक्षिणां प्रमृणजानीति, तस्माद्य एवास्य समानजन्मा भ्रातृव्य स्स्या,द्धूणहूयु- स्तस्मा एना न्दद्या,त्तन्नः पराची दक्षिणा विवृणक्ति, द्विषति भ्रातृव्ये-ऽन्तत श्शुचं प्रतिष्ठापयति- योऽसौ तपति, स वै शंस- त्यादित्या ह जरित रङ्गिरोभ्यो दक्षिणा मनयं-स्तां ह जरितः प्रत्यायन्निति, न हीमां पृथिवीं प्रत्यायं-स्तामु ह जरितः प्रत्यायन्निति, प्रति हि तेऽमु माऽयं-स्तां ह जरित र्नः प्रत्यगृभ्णन्निति, प्रगृह्याऽऽदित्य मगृभ्ण- न्नहानेतरस न्नविचेतनानी,त्येष ह वा अह्नाँ विचेता- योऽसौ तपति, स वै शंसति, यज्ञा नेतरस.न्न पुरोगवास इ,त्येषा ह वै यज्ञस्य

पुरोगवी- यद्दक्षिणा, यथाऽर्हाम स्स्रस्त मितरे तदन्ते.त्येष एवेश्वर उन्नेता।

卐 उत श्वेत आशुपत्वा उतो पद्याभि र्यविष्ठः। उते.माशु मा नः पिपर्ती-त्येष एव, श्वेत एष आशुप,त्वैष उतो पद्याभि र्यविष्ठ-उतेमाशु मानं पिपर्तीति।

卐 आदित्या रुद्रा वसवस्ते नुत- इदं राधः प्रतिगृभ्णी.ह्यङ्गिरः। इदं राधो विभुः प्रभु रिदं राधो बृह.त्पृथुः।

卐 देवा दद त्वासुर न्तद्वो अस्तु सुचेतनम्। युष्माँ अस्तु दिवे दिवे प्रत्येव गृभायतेति-, तद्य.दादित्याश्चाऽऽङ्गिरसीश्च शंसति- स्वर्गताया एवैत दहरह श्शंसति- यथा निविदो,ऽथ भूतेच्छद श्शंसति- त्वमिन्द्र शर्म रिणे,ती.मे वै लोका भूतेच्छदो,ऽसुरा.न्ह वै देवा अन्नं सेचिरे- भूतेनभूतेन जिघांसन्त स्तितीर्षमाणा,स्तानिमे देवा स्सर्वेभ्यो भूतेभ्योऽच्छादयं,स्तद्य देता निमे देवा स्सर्वेभ्यो भूतेभ्योऽच्छादयं,स्तस्मा.द्भूतेच्छद,स्तद्भूतेच्छदां भूतेच्छत्व्द,ञ्छादयन्ति ह वा पर मिमे लोका स्सर्वेभ्यो भूतेभ्यो निरघ्न,न्स्सर्वेभ्यो भूतेभ्य श्छन्दते, य एवँ वेद।। 2.6.14।।

11.15 अथाऽऽहनस्या श्शंसति- यदस्या अंहुभेद्या इ,त्याहनस्याद्वा इदं सर्वं प्रजात,माहनस्याद्वा एत दधि प्रजायते-ऽस्यैव सर्वस्याऽऽस्यै प्रजात्यै, ता वै षड्ढंसेत्- षड्वा ऋतव- ऋतवः पितरः- पितरः प्रजापतिः- प्रजापति राहनस्या,स्ता दश शंसेदिति शाम्भव्यस्य वचो, दशाक्षरा विरा.ड्वैराजो यज्ञ-स्त.ङ्गर्भा उपजीवन्ति- श्रीर्वै विरा.ड्यशोऽन्नाद्यं- श्रिय मेव तद्विराजँ यश.स्यन्नाद्ये प्रतिष्ठापयति, प्रतितिष्ठन्ती.रिदं सर्व मनु प्रति तिष्ठति, प्रति तिष्ठति प्रजया पशुभि- र्य एवं वेद, तिस्र श्शंसे.दिति वात्स्य-स्त्रिवृद्वै रेत स्सिक्तं सम्भव- त्याण्ड- मुल्ब-ञ्जरायु, त्रिवृत्प्रत्ययं, माता पिता यज्जायते- तत्तृतीय, मभूतोद्य मेवैत- द्यच्चतुर्थीं शंसे,त्सर्वा एव षोडश शंसेदिति हैके, कामाऽऽर्तो वै रेत स्सिञ्चति, रेतस स्सिक्ता.त्प्रजाः प्रजायन्ते- प्रजानां प्रजननाय, प्रजावा.न्प्रजनयिष्णु र्भवति प्रजात्यै- प्रजायते प्रजया पशुभि- र्य एवँ वेद।। 2.6.15।।

11.16 अथ दाधिक्रीं शंसति- दधिक्राव्णो अकारिषमिति, तत उत्तराः पावमानी श्शंसति- सुतासो मधुमत्तमा इ,त्यन्नँ वै दधिक्री- पवित्रं पावमान्य,स्तदु हैके पावमानीभि रेव पूर्वं शस्त्वा- तत उत्तरा

न्दाधिक्रीं शंस,तीयँ वा.गन्नाद्या- य॰ पवत इति वदन्त,स्तदु तथा न कुर्या,दुपनश्यति ह वा.गशनायती, स दाधिक्री मेव पूर्वं शस्त्वा- तत उत्तरा॰ पावमानी श्शंसति, तद्य.द्दाधिक्रीं शंस-तीयँ वा-गाहनस्याँ वाच मवादी,त्तद्देवपवित्रेणैव वाचं पुनीते- स वा अनुष्टु.ब्भवति- वाग्वा अनुष्टुप्. तत्स्वेनैव छन्दसा वाचं पुनीते, तामर्धर्चंश श्शंसति- प्रतिष्ठित्या ए,वाथ पावमानी श्शंसति- पवित्रँ वै पावमान्य, इयँ वा-गाहनस्याँ वाच मवादी,त्तत्पावमानीभि.रेव वाचं पुनीते, ता स्सर्वा अनुष्टुभो भवन्ति- वाग्वा अनुष्टुप्.तत्तत्स्वेनैव छन्दसा वाचं पुनीते, ता अर्धर्चंश श्शंसति- प्रतिष्ठित्या ए,वाव द्रप्सो अंशुमती मतिष्ठ-दि.त्येत.न्तृच मैन्द्राबार्हस्पत्यं सूक्तं शंस,त्यथ हैत दुत्सृष्ट- न्तद्यदेत न्तृच मैन्द्राबार्हस्पत्य मन्त्य न्तृच मैन्द्राजागतं शंसति- सवनधारण मिदं गुल्मह इति वदन्त,स्तदु तथा न कुर्या,त्त्रिष्टुबायतना वा इयँ वा.गेषां होत्रकाणां यदैन्द्राबार्हस्पत्या तृतीयसवने, तद्यदेत न्तृच मैन्द्राबार्हस्पत्य मन्त्य न्तृच मैन्द्राजागतं शंसति- स्व एवैन न्तदायतने प्रीणाति स्वयो र्दैवतयो॰, काम न्नित्यमेव परिदध्या,त्काम न्तृचस्योत्तमया, तदाहु- स्संशंसे.त्षष्ठेऽहनि न संशंसेत्, कथ मन्ये.ष्वहस्सु संशंसति- कथ.मत्र न संशंसती-त्यथो

खल्वाहु,नैंव संशंसे,त्स्वर्गो वै लोक ष्षष्ठ मह,रसमायी वै स्वर्गो लोक॰, कश्चिद्वै स्वर्गे लोके समेतीति- तस्मान्न संशंसति, यदेव न संशंसति- तत्स्वर्गस्य लोकस्य रूपँ, यद्वेवैना स्संशंसति- यन्नाभानेदिष्ठो- वालखिल्यो- वृषाकपि- रेवयामरु- देतानि वा अत्रोक्थानि भवन्ति, तस्मान्न संशंस,त्यैन्द्रो वृषाकपि, स्सर्वाणि छन्दांस्यैतशप्रलाप, उपाऽऽप्तो यदैन्द्राबार्हस्पत्या तृतीयसवने, तद्य.देत न्तृच मैन्द्राबार्हस्पत्यं सूक्तं शंस,-त्यैन्द्राबार्हस्पत्या परिधानीया- विशो अदेवी रभ्याचरन्ती रि-त्यपरजना ह वै विशो ऽदेवी- र्न ह्यस्यापरजनं भयं भवति, शान्ता॰ प्रजा॰ क्लृप्ता स्सहन्ते- यत्रैवँविदं शंसति- यत्रैवँविदं शंसतीति ब्राह्मणम्।। 2.6.16।।

इत्यथर्ववेदे उत्तरभागे गोपथब्राह्मणस्य षष्ठः प्रपाठकः समाप्तः।। उत्तरार्धं समाप्तम्। समाप्तश्चायं गोपथ ब्राह्मण ग्रन्थः

ᑌ उपनिषदः

मुण्डकोपनिषत्

ओं भद्रं कर्णेभिः ... ।। ओं शान्तिः शान्तिः शान्तिः।।

।। ओम् ब्रह्मणे नमः।।

卐 प्रथममुण्डके प्रथमः खण्डः।।

卐 ओं ब्रह्मा देवानां प्रथम स्संबभूव विश्वस्य कर्ता भुवनस्य गोप्ता। स ब्रह्मविद्यां सर्वविद्याप्रतिष्ठा- मथर्वाय ज्येष्ठपुत्राय प्राऽऽह।। 1।।

卐 अथर्वणे यां प्रवदेत ब्रह्माथर्वा तां पुरोवाचाङ्गिरे ब्रह्मविद्याम्। स भारद्वाजाय सत्यवाहाय प्राऽऽह भारद्वाजोऽङ्गिरसे परावराम्।। 2।।

卐 शौनको ह वै महाशालोऽङ्गिरसँ विधिव दुपसन्नः पप्रच्छ। कस्मिन्नु भगवो विज्ञाते सर्वमिदँ विज्ञातं भवतीति।। 3।।

卐 तस्मै स होवाच। द्वे विद्ये वेदितव्ये- इति ह स्म यद्ब्रह्मविदो वदन्ति परा चैवापरा च।। 4।।

卐 तत्रापरा ऋग्वेदो यजुर्वेद स्सामवेदो ऽथर्ववेद श्शिक्षा कल्पो व्याकरण.न्निरुक्त.ञ्छन्दो ज्योतिषमिति। अथ परा- यया तदक्षर मधिगम्यते।। 5।।

卐 यत्त.दद्रेश्य मग्राह्य मगोत्र मवर्ण मचक्षुश्श्रोत्र न्तदपाणिपादम्। नित्यं विभुं सर्वगतं सुसूक्ष्म न्तदव्ययँ यद्भूतयोनिं परिपश्यन्ति धीराः।। 6।।

卐 यथोर्णनाभि स्सृजते गृह्णते च यथा पृथिव्या मोषधय स्सम्भवन्ति। यथा सतः पुरुषा.त्केशलोमानि तथाऽक्षरा.त्संभवतीह विश्वम्।। 7।।

卐 तपसा चीयते ब्रह्म ततोऽन्न मभिजायते। अन्ना.त्प्राणो मन स्सत्यँ लोकाः कर्मसु चामृतम्।। 8।।

卐 य.स्सर्वज्ञ स्सर्वविद्यस्य ज्ञानमय न्तपः। तस्मा.देतद्ब्रह्म नाम रूप.मन्नञ्च जायते।। 9।।

इति मुण्डकोपनिषदि प्रथममुण्डके प्रथमः खण्डः।।

अथ द्वितीयः खण्डः।।

卐 तदे.तत्सत्यं मन्त्रेषु कर्माणि कवयो यान्यपश्यं- स्तानि त्रेतायां बहुधा सन्ततानि। तान्याचरथ नियतं सत्यकामा एष वः पन्था स्सुकृतस्य लोके।। 1।।

卐 यदा लेलायते ह्यर्चि स्समिद्धे हव्यवाहने। तदाऽऽज्यभागा.वन्तरेणाऽऽहुतीः प्रतिपादयेत्- श्रद्धया हुतम्।। 2।।

卐 यस्याग्निहोत्र मदर्श मपौर्णमास- मचातुर्मास्य मनाग्रयण मतिथिवर्जितञ्च। अहुत मवैश्वदेव मविधिना हुत - मासप्तमां-स्तस्य लोकान् हिनस्ति।। 3।।

卐 काली कराली च मनोजवा च सुलोहिता या च सुधूम्रवर्णा। स्फुलिङ्गिनी विश्वरुची च देवी लेलायमाना इति सप्त जिह्वाः।। 4।।

卐 एतेषु यश्चरते भ्राजमानेषु यथाकालञ्चाऽऽहुतयो ह्याददायन्। तन्नय.न्त्येता स्सूर्यस्य रश्मयो यत्र देवानां पति रेकोऽधिवासः।। 5।।

卐 एह्येहीति तमाहुतय स्सुवर्चस स्सूर्यस्य रश्मिभि र्यजमानँ वहन्ति। प्रियाँ वाच मभिवदन्त्योऽर्चयन्त्य- एष वः पुण्य स्सुकृतो ब्रह्मलोकः।। 6।।

卐 प्लवा ह्येते अदृढा यज्ञरूपा अष्टादशोक्त मवरँ येषु कर्म। एतच्छ्रेयो येऽभिनन्दन्ति मूढा जरामृत्यु.न्ते पुनरेवापि यन्ति।। 7।।

卐 अविद्याया मन्तरे वर्तमाना स्स्वयन्धीराः पण्डितं मन्यमानाः। जङ्घन्यमानाः परियन्ति मूढा अन्धेनैव नीयमाना यथाऽन्धाः।। 8।।

Sri Ganapati Sachchidananda Avadhoota Datta Peetham • Mysore •

卐 अविद्यायां बहुधा वर्तमाना वयङ्कृतार्था इत्यभिमन्यन्ति बालाः। यत्कर्मिणो न प्रवेदयन्ति रागा.त्तेनाऽऽतुराः~ क्षीणलोका श्च्यवन्ते।। 9।।

卐 इष्टापूर्तं मन्यमाना वरिष्ठ- न्नान्यच्छ्रेयो वेदयन्ते प्रमूढाः। नाकस्य पृष्ठे ते सुकृतेऽनुभूत्वा- इमँ लोकं हीनतरञ्चाऽऽविशन्ति।। 10।।

卐 तपश्श्रद्धे ये ह्युपवस.न्त्यरण्ये शान्ता विद्वांसो भैक्षचर्या.ञ्चरन्तः। सूर्यद्वारेण ते विरजाः प्रयान्ति यत्रामृत.स्स पुरुषो ह्यव्ययात्मा।। 11।।

卐 परीक्ष्य लोका.न्कर्मचिता.न्ब्राह्मणो निर्वेद माया.न्नास्त्यकृतः कृतेन। तद्विज्ञानार्थं स गुरु मेवाभिगच्छे-त्समित्पाणि श्श्रोत्रियं ब्रह्मनिष्ठम्।। 12।।

卐 तस्मै स विद्वा नुपसन्नाय सम्य-क्प्रशान्तचित्ताय शमान्विताय। येनाक्षरं पुरुषँ वेद सत्यं प्रोवाच ता.न्तत्त्वतो ब्रह्मविद्याम्।। 13।।

इति मुण्डकोपनिषदि प्रथममुण्डके द्वितीयः खण्डः।। प्रथम मुण्डकं समाप्तम्।।

अथ द्वितीय मुण्डके प्रथमः खण्डः

卐 तदेत.त्सत्यँ यथा सुदीप्ता.त्पावका.द्विस्फुलिङ्गा स्सहस्रश꞉ प्रभवन्ते सरूपाः। तथाऽक्षरा द्विविधा स्सोम्य भावा꞉ प्रजायन्ते तत्र चैवापि यन्ति।। 1।।

卐 दिव्यो ह्यमूर्त꞉ पुरुष- स्स बाह्याभ्यन्तरो ह्यजः। अप्राणो ह्यमना श्शुभ्रो ह्यक्षरा.त्परत꞉ परः।। 2।।

卐 एतस्मा.ज्जायते प्राणो मन स्सर्वेन्द्रियाणि च। खँ वायु ज्योंति राप꞉ पृथिवी विश्वस्य धारिणी।। 3।।

卐 अग्नि.र्मूर्धा चक्षुषी चन्द्रसूर्यौ दिश श्श्रोत्रे वा.ग्विवृताश्च वेदाः। वायु꞉ प्राणो हृदयँ विश्व.मस्य पद्भ्यां पृथिवी ह्येष सर्वभूतान्तरात्मा।। 4।।

卐 तस्मा.दग्नि स्समिधो यस्य सूर्य स्सोमा-त्पर्जन्य ओषधय꞉ पृथिव्याम्। पुमा.न्रेत स्सिञ्चति योषितायां बह्वी꞉ प्रजा꞉ पुरुषा.त्सम्प्रसूताः।। 5।।

卐 तस्मा.दृच स्साम यजूंषि दीक्षा यज्ञाश्च सर्वे क्रतवो दक्षिणाश्च। सँवत्सरश्च यजमानश्च लोका स्सोमो यत्र पवते यत्र सूर्यः।। 6।।

卐 तस्माच्च देवा बहुधा सम्प्रसूता स्साध्या मनुष्या꞉ पशवो वयांसि। प्राणापानौ व्रीहियवौ तपश्च श्रद्धा सत्यं ब्रह्मचर्यँ विधिश्च।। 7।।

卐 सप्त प्राणाः प्रभवन्ति तस्मा-त्सप्तार्चिष स्समिध स्सप्त होमाः। सप्त इमे लोका येषु चरन्ति प्राणा गुहाशया निहिता स्सप्तसप्त।। 8।।

卐 अत स्समुद्रा गिरयश्च सर्वेऽस्मा-त्स्यन्दन्ते सिन्धव स्सर्वरूपाः। अतश्च सर्वा ओषधयो रसश्च- येनैष भूतै.स्तिष्ठते ह्यन्तरात्मा।। 9।।

卐 पुरुष एवेदँ विश्व- ङ्कर्म तपो ब्रह्म परामृतम्। एतद्यो वेद निहित.ङ्गुहायां सोऽविद्याग्रन्थिँ विकिरतीह सोम्य।। 10।।

इति मुण्डकोपनिषदि द्वितीयमुण्डके प्रथमः खण्डः।।

अथ द्वितीय मुण्डके द्वितीयः खण्डः

卐 आवि स्सन्निहित.ङ्गुहाचर न्नाम महत्पद मत्रैत.त्समर्पितम्। एज.त्प्राण.न्निमिषच्च यदेत- ज्जानथ सदस.द्वरेण्यं परँ विज्ञाना.द्यद्वरिष्ठं प्रजानाम्।। 1।।

卐 यदर्चिम.द्यदणुभ्योऽणु च यस्मि.न्लोका निहिता लोकिनश्च। तदेत.दक्षरं ब्रह्म स प्राण स्तदु वाङ्मनः। तदेत.त्सत्य न्तदमृत न्तद्वेद्धव्यं सोम्य विद्धि।। 2।।

卐 धनु.र्गृहीत्वौपनिषदं महाऽस्त्रं शरं ह्युपासा.निशितं सन्धयीत। आयम्य तद्भाव.गतेन चेतसा लक्ष्य न्तदेवाक्षरं सोम्य विद्धि।। 3।।

卐 प्रणवो धनु श्शरो ह्यात्मा ब्रह्म तल्लक्ष्य.मुच्यते। अप्रमत्तेन वेद्धव्यं शरव.त्तन्मयो भवेत्।। 4।।

卐 यस्मिन्द्यौ॰ पृथिवी चान्तरिक्ष मोतं- मन स्सह प्राणैश्च सर्वैः। तमेवैक.ञ्जानथ आत्मान- मन्या वाचो विमुञ्चथाऽमृतस्यैष सेतुः।। 5।।

卐 अरा इव रथनाभौ संहता यत्र नाड्यः। स एषोऽन्त.श्चरते बहुधा जायमानः। ओमित्येव.न्ध्यायथ आत्मानं, स्वस्ति व॰ पाराय तमस॰ परस्तात्।। 6।।

卐 य.स्सर्वज्ञ स्सर्ववि-द्यस्यैष महिमा भुवि। दिव्ये ब्रह्मपुरे ह्येष व्योम्न्यात्मा प्रतिष्ठितः।। 6।।

卐 मनोमय॰ प्राणशरीर.नेता प्रतिष्ठितोऽन्ने हृदयं सन्निधाय। तद्विज्ञानेन परिपश्यन्ति धीरा आनन्दरूप ममृतँ यद्विभाति।। 7।।

卐 भिद्यते हृदयग्रन्थि- श्छिद्यन्ते सर्वसंशयाः। क्षीयन्ते चास्य कर्माणि तस्मि.न्दृष्टे परावरे।। 8।।

卐 हिरण्मये परे कोशे विरजं ब्रह्म निष्कलम्। तच्छुभ्र.ञ्ज्योतिषा.ञ्ज्योति- स्तद्य.दात्मविदो विदुः।। 9।।

卐 न तत्र सूर्यो भाति न चन्द्रतारक- न्नेमा विद्युतो भान्ति कुतोऽय.मग्निः। तमेव भान्त मनुभाति सर्व- न्तस्य भासा सर्वमिदँ विभाति।। 10।।

卐 ब्रह्मैवेद ममृतं पुरस्ता.द्ब्रह्म पश्चा.द्ब्रह्म दक्षिणत श्चोत्तरेण। अध.श्चोर्ध्वञ्च प्रसृतं ब्रह्मैवेदँ विश्वमिदँ वरिष्ठम्।। 11।।

इति मुण्डकोपनिषदि द्वितीयमुण्डके द्वितीयः खण्डः।।

अथ तृतीय मुण्डके प्रथमः खण्डः

卐 द्वा सुपर्णा सयुजा सखाया समानँ वृक्षं परिषस्वजाते। तयोरन्यꣳ पिप्पलं स्वाद्व-त्त्यनश्न न्नन्यो अभिचाकशीति।। 1।।

卐 समाने वृक्षे पुरुषो निमग्नो-ऽनीशया शोचति मुह्यमानः। जुष्टँ यदा पश्य.त्यन्य मीश- मस्य महिमान.मिति वीतशोकः।। 2।।

卐 यदा पश्यꣳ पश्यते रुक्मवर्ण-ङ्कर्तार.मीशं पुरुषं ब्रह्मयोनिम्। तदा विद्वा.न्पुण्यपापे विधूय निरञ्जनꣳ परमं साम्य.मुपैति।। 3।।

卐 प्राणो ह्येष यस्सर्वभूतै र्विभाति - विजान.न्विद्वा.न्भवते नातिवादी। आत्मक्रीड आत्मरतिः क्रियावा- नेष ब्रह्मविदाँ वरिष्ठः।। 4।।

卐 सत्येन लभ्य स्तपसा ह्येष आत्मा सम्यग्ज्ञानेन ब्रह्मचर्यैण नित्यम्। अन्तश्शरीरे ज्योतिर्मयो हि शुभ्रो यं पश्यन्ति यतयः~ क्षीणदोषाः।। 5।।

卐 सत्यमेव जयते नाऽनृतं- सत्येन पन्था विततो देवयानः। येनाऽऽक्रम.न्त्यृषयो ह्याप्तकामा यत्र त.त्सत्यस्य परम.न्निधानम्।। 6।।

卐 बृहच्च तद्दिव्य.मचिन्त्यरूपं सूक्ष्माच्च तत्सूक्ष्मतरँ विभाति। दूरा.त्सुदूरे तदिहान्तिके च- पश्य.त्स्विहैव निहित.ङ्गुहायाम्।। 7।।

卐 न चक्षुषा गृह्यते नापि वाचा नान्यै र्देवै स्तपसा कर्मणा वा। ज्ञानप्रसादेन विशुद्धसत्त्व- स्ततस्तु तं पश्यते निष्कल न्ध्यायमानः।। 8।।

卐 एषोऽणु रात्मा चेतसा वेदितव्यो यस्मि.न्प्राणः पञ्चधा सँविवेश। प्राणै.श्चित्तं सर्व.मोतं प्रजानाँ यस्मि.न्विशुद्धे विभवत्येष आत्मा।। 9।।

卐 यँ यँ लोकं मनसा सँविभाति विशुद्धसत्त्वः कामयते यांश्च कामान्। तन्तँ लोक.ञ्जयते तांश्च कामां- स्तस्मा दात्मज्ञं ह्यर्चये.द्भूतिकामः।। 10।।

इति मुण्डकोपनिषदि तृतीयमुण्डके प्रथमः खण्डः।।

अथ तृतीयमुण्डके द्वितीयः खण्डः

卐 स वेदैत.त्परमं ब्रह्म धाम यत्र विश्व.न्निहितं भाति शुभ्रम्। उपाऽऽसते पुरुषँ ये ह्यकामा- स्ते शुक्र.मेत दतिवर्तन्ति धीराः।। 1।।

卐 कामान् यः कामयते मन्यमान- स्स कामभि र्जायते तत्र तत्र। पर्याप्तकामस्य कृताऽऽत्मनस्तु - इहैव सर्वे प्रविलीयन्ति कामाः।। 2।।

卐 नाय मात्मा प्रवचनेन लभ्यो न मेधया न बहुना श्रुतेन। यमे.वैष वृणुते तेन लभ्य- स्तस्यैष आत्मा विवृणुते तनूं स्वाम्।। 3।।

卐 नाय मात्मा बलहीनेन लभ्यो न च प्रमादा.त्तपसो वाऽप्यलिङ्गात्। एतै रुपायै र्यतते यस्तु विद्वां- स्तस्यैष आत्मा विशते ब्रह्मधाम।। 4।।

卐 संप्राऽप्यैन मृषयो ज्ञानतृप्ता॰ कृताऽत्मानो वीतरागा॰ प्रशान्ताः। ते सर्वगं सर्वत॰ प्राऽप्य धीरा युक्ताऽत्मान स्सर्वमेवाऽविशन्ति।। 5।।

卐 वेदान्त.विज्ञान सुनिश्चितार्था- स्सन्न्यास.योगा.द्यतय श्शुद्धसत्त्वाः। ते ब्रह्मलोकेषु परान्तकाले पराऽमृता॰ परिमुच्यन्ति सर्वे।। 6।।

卐 गता॰ कला॰ पञ्चदश प्रतिष्ठा देवाश्च सर्वे प्रतिदेवतासु। कर्माणि विज्ञान.मयश्च आत्मा परेऽव्यये सर्व एकीभवन्ति।। 7।।

卐 यथा नद्य स्स्यन्दमाना स्समुद्रे-ऽस्तङ्गच्छन्ति नामरूपे विहाय। तथा विद्वा.न्नामरूपा.द्विमुक्त॰ परात्परं पुरुष.मुपैति दिव्यम्।। 8।।

卐 स यो ह वैत.त्परमं ब्रह्म वेद- ब्रह्मैव भवति, नास्याब्रह्मवि.त्कुले भवति। तरति शोकं तरति पाप्मानं गुहा - ग्रन्थिभ्यो विमुक्तोऽमृतो भवति।। 9।।

卐 तदेत.दृचाऽभ्युक्तम्। क्रियावन्त.श्श्रोत्रिया ब्रह्मनिष्ठा स्स्वय.ञ्जुह्वत एकर्षिं श्रद्धयन्तः। तेषा.मेवैतां ब्रह्मविद्याँ वदेत शिरोव्रतँ विधिव.द्यैस्तु चीर्णम्।। 10।।

卐 तदेत.त्सत्य मृषि रङ्गिरा॰ पुरोवाच- नैत दचीर्णव्रतोऽधीते। नम॰ परम ऋषिभ्यो नम॰ परम ऋषिभ्यः।। 11।। ओं भद्रं कर्णेभिः ... दधातु।। ... शान्तिः।।

इति मुण्डकोपनिषदि तृतीयमुण्डके द्वितीयः खण्डः।। मुण्डकोपनिषत्समाप्ता।।

प्रश्नोपनिषत्

ओं भद्रङ्कर्णेभि श्शृणुयाम ... ओम् शान्ति.श्शान्ति.श्शान्तिः।

अथ प्रथम प्रश्नः

卐 ओं सुकेशाश्च भारद्वाज- श्शैब्यश्च सत्यकाम- स्सौर्यायणी च गार्ग्य॰- कौसल्यश्चाऽऽश्वलायनो- भार्गवो वैदर्भि॰- कबन्धी कात्यायन- स्ते हैते ब्रह्मपरा ब्रह्मनिष्ठा॰ परं ब्रह्मान्वेषमाणा- एष ह वै तत्सर्वँ वक्ष्यतीति, ते ह समि.त्पाणयो भगवन्तं पिप्पलाद मुपसन्नाः।। 1।।

卐 तान् ह स ऋषिरुवाच- भूय एव तपसा ब्रह्मचर्येण श्रद्धया सँवत्सरं सँवत्स्यथ- यथाकामं प्रश्ना.न्पृच्छत- यदि विज्ञास्याम स्सर्वँ ह वो वक्ष्याम इति।। 2।।

卐 अथ कबन्धी कात्यायन उपेत्य पप्रच्छ। भगव-न्कुतो ह वा इमाः प्रजाः प्रजायन्त इति।। 3।।

卐 तस्मै स होवाच- प्रजाकामो वै प्रजापति स्स.तपोऽतप्यत- स तप.स्तप्त्वा- स मिथुन मुत्पादयते - रयिञ्च प्राण.ञ्चे-त्येतौ मे बहुधा प्रजाः करिष्यत इति।। 4।।

卐 आदित्यो ह वै प्राणो- रयिरेव चन्द्रमा, रयिर्वा एतत्सर्वँ- यन्मूर्त.ञ्चामूर्तञ्च, तस्मा न्मूर्ति.रेव रयिः।। 5।।

卐 अथाऽऽदित्य उदयन्- यत्प्राची न्दिशं प्रविशति- तेन प्राच्या.न्प्राणा.न्रश्मिषु सन्निधत्ते। यद्दक्षिणाँ यत्प्रतीचीँ यदुदीचीँ यदधो यदूर्ध्वँ यदन्तरा दिशो- य.त्सर्वं प्रकाशयति- तेन सर्वा.न्प्राणा.न्रश्मिषु सन्निधत्ते।। 6।।

卐स एष वैश्वानरो विश्वरूपः प्राणोऽग्नि.रुदयते। तदेत.दृचाऽभ्युक्तम्।। 7।।

卐 विश्वरूपं हरिणं.ज्ञातवेदसं परायण.ञ्ज्योति.रेकं तपन्तम्। सहस्ररश्मि श्शतधा वर्तमानः प्राणः प्रजाना मुदय.त्येष सूर्यः।। 8।।

卐 सँवत्सरो वै प्रजापति स्तस्यायने दक्षिण.ञ्चोत्तरञ्च। तद्ये ह वै तदिष्टापूर्ते कृत मित्युपाऽऽसते। ते चान्द्रमस.मेव लोक मभि.जयन्ते। त एव पुनरावर्तन्ते- तस्मादेत ऋषयः प्रजाकामा दक्षिणं प्रतिपद्यन्ते। एष ह वै रयि.र्यः पितृयाणः।। 9।।

卐 अथोत्तरेण तपसा ब्रह्मचर्येण श्रद्धया विद्ययाऽऽत्मान मन्विष्याऽऽदित्य मभि.जयन्ते। एतद्वै प्राणाना मायतन- मेत दमृत मभय- मेत.त्परायण मेतस्मा.न्न पुन रावर्तन्त इत्येष निरोध- स्तदेष श्लोकः।। 10।।

卐 पञ्चपादं पितर न्द्वादशाऽऽकृति न्दिव आहुः परे अर्धे पुरीषिणम्। अथेमे अन्य उपरे विचक्षणं सप्तचक्रे षडर आहु.रर्पित.मिति।। 11।।

卐 मासो वै प्रजापति,स्तस्य कृष्णपक्ष एव रयि- श्शुक्लः प्राण, स्तस्मा.देत ऋषय श्शुक्ल इष्ट.ङ्कुर्वन्तीतर इतरस्मिन्न्।। 12।।

卐 अहोरात्रो वै प्रजापति,स्तस्याह.रेव प्राणो- रात्रि रेव रयिः, प्राणँ वा एते प्रस्कन्दन्ति- ये दिवा रत्या सँयुज्यन्ते, ब्रह्मचर्यमेव त- द्य.द्रात्रौ रत्या सँयुज्यन्ते।। 13।।

卐 अन्नँ वै प्रजापति,स्ततो ह वै तद्रेत- स्तस्मा.दिमा॰ प्रजा॰ प्रजायन्त इति।। 14।।

卐 तद्ये ह वै तत्प्रजापतिव्रत.ञ्चरन्ति- ते मिथुन मुत्पादयन्ते, तेषा.मेवैष ब्रह्मलोको- येषा न्तपो ब्रह्मचर्यँ येषु सत्यं प्रतिष्ठितम्।। 15।।

卐 तेषा मसौ विरजो ब्रह्मलोको- न येषु जिह्म मनृत- न्न माया चेति।। 16।। इति प्रश्नोपनिषदि प्रथमः प्रश्नः।।

अथ द्वितीयः प्रश्नः

卐 अथ हैनं भार्गवो वैदर्भि॰ पप्रच्छ। भगव-न्कत्येव देवा॰ प्रजाँ विधारयन्ते- कतर एत.त्प्रकाशयन्ते- क॰ पुन.रेषाँ वरिष्ठ इति।। 1।।

卐 तस्मै स होवाचा.ऽऽकाशो ह वा एष देवो. वायु रग्नि राप॰ पृथिवी- वाड्मन.श्चक्षु.श्श्रोत्रञ्च। ते प्रकाश्याभि.वदन्ति- वय मेत.द्बाण.मवष्टभ्य विधारयामः।। 2।।

卐 ता.न्वरिष्ठ॰ प्राण उवाच- मा मोह मापद्यथा- ऽहमेवै.तत्पञ्चधा.ऽऽत्मानं प्रविभज्यैत.द्बाण.मवष्टभ्य विधारयामीति- तेऽश्रद्दधाना बभूवुः।। 3।।

卐 सोऽभिमाना.दूर्ध्वं मुत्क्रामत इव- तस्मि न्नुत्क्राम.त्यथेतरे सर्व एवोत्क्रामन्ते- तस्मिंश्च प्रतिष्ठमाने सर्व एव प्रातिष्ठन्ते। तद्यथा मक्षिका मधुकर.राजान मुत्क्रामन्तं सर्वा एवो.त्क्रामन्ते- तस्मिंश्च प्रतिष्ठमाने सर्वा एव प्रातिष्ठन्त- एवँ वाङ्मन.श्चक्षु.श्श्रोत्रञ्च ते प्रीता<br>प्राणं स्तुन्वन्ति।। 4।।

卐 एषोऽग्नि स्तप- त्येष सूर्य- एष पर्जन्यो मघवा- नेष वायु- रेष पृथिवी रयि.र्देव- स्स.दस.च्चामृतञ्च यत्।। 5।।

卐 अरा इव रथनाभौ प्राणे सर्वं प्रतिष्ठितम्। ऋचो यजूँषि सामानि यज्ञः~ क्षत्रं ब्रह्म च।। 6।।

卐 प्रजापति श्चरसि गर्भे त्वमेव प्रतिजायसे। तुभ्यं प्राण प्रजा.स्त्विमा बलिं हरन्ति- यः प्राणैः प्रतितिष्ठसि।। 7।।

卐 देवाना.मसि वह्नितमः पितृणां प्रथमा स्वधा। ऋषीणा.ञ्चरितं सत्य -मथर्वाऽङ्गिरसा.मसि।। 8।।

卐 इन्द्रस्त्वं प्राण तेजसा रुद्रोऽसि परिरक्षिता। त्व.मन्तरिक्षे चरसि सूर्यस्त्व.ञ्ज्योतिषां पतिः।। 9।।

卐 यदा त्वमभिवर्ष-स्यथेमाः प्राण ते प्रजाः। आनन्दरूपा स्तिष्ठन्ति कामायान्नं भविष्यतीति।। 10।।

卐 व्रात्यस्त्वं प्राणैक ऋषि-रत्ता विश्वस्य सत्पतिः। वय माद्यस्य दातारꣳ पिता त्वं मातरिश्वनः।। 11।।

卐 या ते तनू र्वाचि प्रतिष्ठिता या श्रोत्रे या च चक्षुषि। या च मनसि सन्तता शिवा.न्तां कुरु मोत्क्रमीः।। 12।।

卐 प्राणस्येदँ वशे सर्व- न्त्रिदिवे यत्प्रतिष्ठितम्। मातेव पुत्रा.न्रक्षस्व- श्रीश्च प्रज्ञाञ्च विधेहि न इति।। 13।। इति प्रश्नोपनिषदि द्वितीयः प्रश्नः।।

अथ तृतीयः प्रश्नः

卐 अथ हैन.ङ्कौशल्यश्चाऽऽश्वलायनꣳ पप्रच्छ। भगव-न्कुत एष प्राणो जायते- कथ माया.त्यस्मि.न्छरीर, आत्मानँ वा प्रविभज्य कथं प्रातिष्ठते- केनोत्क्रमते- कथं बाह्य मभिधत्ते- कथ मध्यात्म.मिति।। 1।।

卐 तस्मै स होवाचातिप्रश्ना.न्पृच्छसि, ब्रह्मिष्ठोऽसीति- तस्मात्तेऽहं ब्रवीमि।। 2।।

卐 आत्मन एष प्राणो जायते- यथैषा पुरुषे छा-यैतस्मि न्नेत.दाततं मनोकृतेनाऽऽया.त्यस्मि.न्छरीरे।। 3।।

卐 यथा सम्रा.डेवाधिकृता.न्विनियुङ्क्ते। एता.न्ग्रामा नेता.न्ग्रामा नधितिष्ठस्वे- त्येव.मेवैष प्राण इतरा.न्प्राणा.न्पृथ.क्पृथगेव सन्निधत्ते।। 4।।

卐 पायूपस्थेऽपान- ञ्चक्षुश्श्रोत्रे- मुखनासिकाभ्यां प्राण स्स्वयं प्रातिष्ठते, मध्ये तु समानः। एष ह्येत.द्धुत.मन्नं सम.न्नयति- तस्मादेता स्ससप्तार्चिषो भवन्ति।। 5।।

卐 हृदि ह्येष आत्मा। अत्रैत.देकशत.न्नाडीना- न्तासां शतं शत-मेकैकस्या द्वासप्तति.द्वासप्तति॰- प्रतिशाखा नाडी.सहस्राणि भव-न्त्यासु व्यान श्चरति।। 6।।

卐 अथैकयोर्ध्व उदान॰- पुण्येन पुण्यँ लोक.न्नयति- पापेन पाप-मुभाभ्यामेव मनुष्यलोकम्।। 7।।

卐 आदित्यो ह वै बाह्य॰ प्राण उदय-त्येष ह्येन.ञ्चाक्षुषं प्राण मनु.गृह्णानः। पृथिव्याँ या देवता- सैषा पुरुषस्यापान.मवष्टभ्याऽन्तरा- यदाकाश.स्स समानो वायु र्व्यानः।। 8।।

卐 तेजो ह वा उदान- स्तस्मा दुपशान्त.तेजाः। पुन.र्भव मिन्द्रियै र्मनसि सम्पद्यमानैः।। 9।।

卐 यच्चित्त.स्तेनैष प्राण मायाति। प्राण.स्तेजसा युक्तः। सहाऽऽत्मना यथा.सङ्कल्पितँ लोक.न्नयति।। 10।।

卐 य एवँ विद्वा.न्प्राणँ वेद। न हास्य प्रजा हीयतेऽमृतो भवति, तदेष श्लोकः।। 11।।

卐 उत्पत्ति मायतिं स्थानँ - विभुत्व.ञ्चैव पञ्चधा। अध्यात्म.ञ्चैव प्राणस्य - विज्ञायामृत मश्नुते- विज्ञायामृत.मश्नुत इति।। 12।।

इति प्रश्नोपनिषदि तृतीयः प्रश्नः।।

अथ चतुर्थः प्रश्नः

卐 अथ हैनं सौर्यायणी गार्ग्यः पप्रच्छ। भगव- न्नेतस्मि.न्पुरुषे- कानि स्वपन्ति- कान्यस्मि न्जाग्रति- कतर एष देव स्स्वप्ना.न्पश्यति- कस्यैत.त्सुखं भवति- कस्मिन्नु सर्वे संप्रतिष्ठिता भवन्तीति।। 1।।

卐 तस्मै स होवाच। यथा गार्ग्य- मरीचयोऽर्कस्यास्त.ङ्गच्छत स्सर्वा एतस्मिं.स्तेजोमण्डल एकीभवन्ति- ताः पुनःपुन रुदयतः प्रचर-न्त्येवं ह वैत.त्सर्वं परे देवे मनस्येकीभवति। तेन तर्ह्येष पुरुषो- न श्रृणोति न पश्यति न जिघ्रति न रसयते न स्पृशते

नाभिवदते नाऽऽदत्ते नाऽऽनन्दयते न विसृजते नेयायते स्वपितीत्याचक्षते।। 2।।

卐 प्राणाग्नय एवैतस्मि.न्पुरे जाग्रति। गार्हपत्यो ह वा एषोऽपानो, व्यानोऽन्वाहार्यपचनो, यद्गार्हपत्या.त्प्रणीयते- प्रणयना दाहवनीयः प्राणः।। 3।।

卐 यदुच्छ्वास-निश्श्वासा.वेता.वाहुती सम न्नयतीति- स समानः। मनो ह वाव यजमानः। इष्टफल.मेवोदानः। स एनँ यजमान महरह.र्ब्रह्म गमयति।। 4।।

卐 अत्रैष देव.स्स्वप्ने महिमान मनु.भवति। यद्दृष्ट न्दृष्ट मनुपश्यति- श्रुतं श्रुत मेवार्थ मनु.श्शृणोति- देश.दिगन्तरैश्च प्रत्यनुभूतं पुनः पुनः प्रत्यनुभवति- दृष्ट.ञ्चादृष्टञ्च- श्रुत.ञ्चाश्रुत-ञ्चानुभूत.ञ्चाननुभूतञ्च- सच्चासच्च सर्वं पश्यति, सर्वः पश्यति।। 5।।

卐 स यदा तेजसाऽभिभूतो भवति। अत्रैष देव.स्स्वप्ना.न्न पश्य-त्यथ तदैतस्मि.न्छरीर एत.त्सुखं भवति।। 6।।

卐 स यथा सोम्य- वयांसि वासो वृक्षं संप्रतिष्ठन्ते। एवं ह वैत.त्सर्वं पर आत्मनि संप्रतिष्ठते।। 7।।

卐 पृथिवी च पृथिवीमात्रा चाऽऽपश्चाऽऽपोमात्रा च, तेजश्च तेजोमात्रा च, वायुश्च वायुमात्रा चाऽऽकाशश्चाऽऽकाशमात्रा च, चक्षुश्च द्रष्टव्यञ्च, श्रोत्रञ्च श्रोतव्यञ्च, घ्राणञ्च घ्रातव्यञ्च, रसश्च रसयितव्यञ्च, त्वक्क स्पर्शयितव्यञ्च, वाक्क वक्तव्यञ्च, हस्तौ चाऽऽदातव्य-ञ्चोपस्थश्चाऽऽनन्दयितव्यञ्च, पायुश्च विसर्जयितव्यञ्च, पादौ च गन्तव्यञ्च, मनश्च मन्तव्यञ्च, बुद्धिश्च बोद्धव्यञ्चा,ऽहङ्कार श्चाहङ्कर्तव्यञ्च, चित्तञ्च चेतयितव्यञ्च, तेजश्च विद्योतयितव्यञ्च, प्राणश्च विधारयितव्यञ्च।। 8।।

卐 एष हि द्रष्टा स्प्रष्टा श्रोता घ्राता रसयिता मन्ता बोद्धा कर्ता विज्ञानाऽऽत्मा पुरुषः। स परेऽक्षर आत्मनि सम्प्रतिष्ठते।। 9।।

卐 पर.मेवाक्षरं प्रतिपद्यते, स यो ह वैत.दच्छाय-मशरीर.मलोहितं-शुभ्र- मक्षरँ वेदयते यस्तु सोम्य। स सर्वज्ञ स्सर्वो भवति, तदेष श्लोकः।। 10।।

卐 विज्ञानाऽऽत्मा सह देवैश्च सर्वैः - प्राणा भूतानि सम्प्रतिष्ठन्ति यत्र। तदक्षरँ वेदयते यस्तु सोम्य - स सर्वज्ञ स्सर्व.मेवाऽऽविवेशेति।। 11।।

इति प्रश्नोपनिषदि चतुर्थः प्रश्नः।।

## अथ पञ्चमः प्रश्नः

卐 अथ हैनं शैब्य.स्सत्यकामꣳ पप्रच्छ। स यो ह वैतद्भगव-न्मनुष्येषु प्रायणान्त.मोङ्कार मभि.ध्यायीत। कतमँ वाव स तेन लोक.ञ्जयतीति। तस्मै स होवाच।। 1।।

卐 एतद्वै सत्यकाम- परञ्चापरञ्च ब्रह्म- यदोङ्कारः। तस्मा.द्विद्वा नेतेनैवाऽऽयतने.नैकतर.मन्वेति।। 2।।

卐 स यद्येकमात्र मभिध्यायीत- स तेनैव सँवेदित.स्तूर्णमेव जगत्या मभि.संपद्यते। तमृचो मनुष्यलोक.मुप.नयन्ते- स तत्र तपसा ब्रह्मचर्येण श्रद्धया सम्पन्नो महिमान.मनु भवति।। 3।।

卐 अथ यदि द्विमात्रेण मनसि सम्पद्यते- सोऽन्तरिक्षँ यजुर्भि.रुन्नीयते सोमलोकम्। स सोमलोके विभूति मनुभूय पुन रावर्तते।। 4।।

卐 यꣳ पुन.रेत.न्त्रिमात्रेणो3 मित्येतेनैवाक्षरेण परं पुरुष मभिध्यायीत- स तेजसि सूर्ये सम्पन्नः। यथा पादोदर.स्त्वचा विनिर्मुच्यत- एवं ह वै स पाप्मना विनिर्मुक्त- स्स सामभि.रुन्नीयते ब्रह्मलोकं- स एतस्मा ज्जीवघना.त्परात्परं पुरिशयं पुरुष मीक्षते। तदेतौ श्लोकौ भवतः।। 5।।

卐 तिस्रो मात्रा मृत्युमत्यः प्रयुक्ता- अन्योऽन्य.सक्ता अनवि.प्रयुक्ताः। क्रियासु बाह्याभ्यन्तर मध्यमासु - सम्य.क्प्रयुक्तासु न कम्पते ज्ञः।। 6।।

卐 ऋग्भि रेतँ यजुर्भि रन्तरिक्षं - सामभि र्यत्त.त्कवयो वेदयन्ते। तमोङ्कारेणैवऽऽयतनेनाऽन्वेति विद्वान्- यत्तच्छान्त मजर ममृत मभयं परञ्चेति।। 7।। इति प्रश्नोपनिषदि पञ्चमः प्रश्नः।।

अथ षष्ठः प्रश्नः

卐 अथ हैनं सुकेशा भारद्वाजः पप्रच्छ। भगव-न्हिरण्यनाभः कौसल्यो राजपुत्रो- मामुपे.त्यैतं प्रश्न मपृच्छत। षोडशकलं भारद्वाज- पुरुषँ वेत्थ। तमह.ङ्कुमार मब्रुव-न्नाह.मिमँ वेद। यद्यह.मिम.मवेदिष-ङ्कथन्ते नावक्ष्यमिति।

समूलो वा एष परिशुष्यति- योऽनृत मभिवदति, तस्मा न्नार्हा.म्यनृतँ वक्तुम्। स तूष्णीं रथ मारुह्य प्रवव्राज। तन्त्वा पृच्छामि क्वासौ पुरुष इति।। 1।।

卐 तस्मै स होवाच। इहैवान्त.श्शरीरे सोम्य स पुरुषो- यस्मि.न्नेता ष्षोडश कलाः प्रभवन्तीति।। 2।।

Sri Sacchidananda Avadhoota Datta Peetham • Mysore •

卐 स ईक्षाञ्चक्रे। कस्मि.न्नह मुत्क्रान्त- उत्क्रान्तो भविष्यामि, कस्मिन्वा प्रतिष्ठिते- प्रतिष्ठास्यामीति।। 3।।

卐 स प्राण मसृजत, प्राणा.च्छ्रद्धा.ङ्खँ- वायु र्ज्योति राप॰ पृथिवीन्द्रियं मनः। अन्न मन्ना.द्वीर्य न्तपो मन्त्रा॰ कर्मलोका लोकेषु नाम च।। 4।।

卐 स यथेमा नद्य स्स्यन्दमाना स्समुद्रायणा स्समुद्रं प्राऽऽप्यास्त.ङ्गच्छन्ति- भिद्येते तासा न्नामरूपे- समुद्र इत्येवं प्रोच्यते। एव.मेवास्य परिद्रष्टु- रिमा ष्षोडश कला॰ पुरुषायणा॰ पुरुषं प्राऽऽप्यास्त.ङ्गच्छन्ति- भिद्येते तासा.न्नाम.रूपे- पुरुष इत्येवं प्रोच्यते- स एषोऽकलो ऽमृतो भवति- तदेष श्लोकः।। 5।।

卐 अरा इव रथनाभौ - कला यस्मि.न्प्रतिष्ठिताः। तँ वेद्यं पुरुषँ वेद- यथा मा वो मृत्यु॰ परिव्यथा इति।। 6।।

卐 तान् होवा.चैताव.देवाह.मेत.त्परं ब्रह्म वेद। नात॰ परमस्तीति।। 7।।

卐 ते तमर्चयन्त-स्त्वं हि न॰ पिता- योऽस्माक मविद्याया॰ परं पार न्तारयसीति। नम॰ परम ऋषिभ्यो नम॰ परमऋषिभ्यः।। 8।।

卐 ओं भद्रं कर्णेभि श्शृणुयाम .. ओं शान्ति श्शान्ति श्शान्तिः।

इति प्रश्नोपनिषदि षष्ठः प्रश्नः।। समाप्ता प्रश्नोपनिषत्।

ॐ माण्डूक्योपनिषत्

श्रीः।।卐 ओं भद्रं कर्णेभि श्शृणुयाम ... श्शान्ति श्शान्तिः।।

卐 ओम् भद्रन्नो अपि वातय मनः।। ओं शान्ति श्शान्ति श्शान्तिः।।

प्रणव वर्णनम्

卐 ओमित्येत दक्षरम्। इदँ सर्व न्तस्योपव्याख्यानं - भूतं भव.द्भविष्य.दिति- सर्व.मोङ्कार एव। यच्चान्य.त्त्रिकालातीत-न्तदप्योङ्कार एव।। 1।।

卐 सर्वँ ह्येत.द्ब्रह्माऽय.मात्मा ब्रह्म, सोऽय मात्मा चतुष्पात्।। 2।।

卐 जागरितस्थानो बहिष्प्रज्ञ स्सप्ताङ्ग एकोनविंशति.मुख स्स्थूलभु.ग्वैश्वानरः प्रथमः पादः।। 3।।

卐 स्वप्नस्थानोऽन्तःप्रज्ञ स्सप्ताङ्ग एकोनविंशतिमुखः प्रविविक्तभु.क्तैजसो द्वितीयः पादः।। 4।।

卐 यत्र सुप्तो न कञ्चन काम.ङ्कामयते- न कञ्चन स्वप्नं पश्यति-तत्सुषुप्तम्। सुषुप्तस्थान एकीभूतः प्रज्ञानघन एवाऽऽनन्दमयो ह्यानन्दभु.क्चेतोमुखः- प्राज्ञ स्तृतीयः पादः।। 5।।

卐 एष सर्वेश्वर एष सर्वज्ञ एषोऽन्तर्या.म्येष योनि स्सर्वस्य-प्रभवाप्ययौ हि भूतानाम्।। 6।।

卐 नान्त꞉प्रज्ञ- न्न बहिष्प्रज्ञ- न्नोभयत꞉प्रज्ञ- न्नप्रज्ञानघन- न्नप्रज्ञ-न्नाप्रज्ञम्। अदृष्ट मव्यवहार्य मग्राह्य मलक्षण मचिन्त्य मव्यपदेश्य-मेकात्म.प्रत्ययसारं प्रपञ्चोपशमं शान्तं- शिव मद्वैत.ञ्चतुर्थं मन्यन्ते, स आत्मा स विज्ञेयः।। 7।।

卐 सोऽय मात्माऽध्यक्षर मोङ्कारोऽधिमात्रं- पादा मात्रा मात्राश्च पादा- अकार- उकारो- मकार इति।। 8।।

卐 जागरितस्थानो वैश्वानरोऽकार꞉ प्रथमा मात्रा,ऽऽप्ते.रादिमत्त्वा.द्वाऽऽप्नोति ह वै सर्वा.न्कामा- नादिश्च भवति य एवँ वेद।। 9।।

卐 स्वप्नस्थान स्तैजस उकारो द्वितीया मात्रो.त्कर्षा. दुभयत्वा द्वो.त्कर्षति ह वै ज्ञानसन्ततिं, समानश्च भवति- नास्याब्रह्मवि.त्कुले भवति य एवँ वेद।। 10।।

卐 सुषुप्तस्थान꞉ प्राज्ञो- मकार स्तृतीया मात्रा, मिते. रपीते र्वा-मिनोति ह वा इदँ सर्व मपीतिश्च भवति य एवँ वेद।। 11।।

卐 अमात्र श्चतुर्थो ऽव्यवहार्यः प्रपञ्चोपशम श्शिवोऽद्वैत-एव.मोङ्कार आत्मैव, सँविश.त्यात्मनाऽऽत्मानँ य एवँ वेद - य एवँ वेद।। 12।।

卐 भद्रङ्कर्णेभि श्शृणुयाम ..... शान्ति शान्ति श्शान्तिः।।

समाप्ता माण्डूक्योपनिषत्

卐पाता न्नो द्यावापृथिवी अभिष्टये पातु ग्रावा पातु सोमो नो अंहसः। पातु नो देवी सुभगा सरस्वती पात्वग्नि श्शिवा ये अस्य पायवः।।